# ॥ श्री ललितोपाख्यानम् ॥

॥

ॐ श्रीविद्यावल्लभ महागणपतये नमः ।

श्री शारदाम्बायै नमः ।

श्री लक्ष्मीनृसिम्हाय नमः ।

श्री ललितामहात्रिपुरसुन्दरी पराभट्टारिका समेताय श्री चन्द्रमौलीश्वर परब्रह्मणे नमः ।

जय जय शङ्कर ।

Sri Lalitopakhyana is a part of Brahmanda Purana. It details the Avatara and Lila of Parashakti Lalita Mahatripurasundari. The Parayana of this sacred text is considered to be more fruitful than even Saptashati. A single Parayana of this great text confers a merit, equal to thousand (Sahasra) repetitions of Chandi. Bhagavan Hayagriva has instructed the Sadhakas to obtain limitless merit by chanting this Aakhyaana. All devotees of Sridevi, especially the Upasakas of Srividya, should necessarily chant this great hymn during the Navaratra and Pancha Parvas. Each chapter in this hymn confers individual benefits. But the collective effect is the attainment of Sridevi. Like the Saptashati in the north, this has been very popular in the south. The immense power of this hymn can only be felt and not described in words. I say this with my own personal experience. I shall consider myself blessed if even a single person finds this transliteration useful.
Various copies of this Aakhyana have been printed, but none seem to be available now. A version of this was published by Sri Venkateshwara steam press of Bombay in 1912. This copy has thirty-two chapters. This seems to be appropriate since this text is referred to as 'Dwatrimshikaa Shastra' in the Phala Sruti (like Chandi is Saptashati Shastra, this is called Dwatrimshika Shastra). Some Telugu prints of this text are also available. There are some extra chapters like the Kanchi Maahatmya Varnanam and others in some printed versions. But these are not used for Parayana traditionally. I have included the Dhyana Shlokas that have been used by my lineage of gurus at the beginning of each chapter. The text here follows the Nirnaya Sagara version. I have also included a brief English translation.

॥ अथ मङ्गलाचरण श्लोकः ॥

अस्तु वः श्रेयसे नित्यं वस्तुवामाङ्गमैश्वरम् ।

यतस्तृतीयो विदुषां तुरीयं तत्परं महः ॥

॥ पारायणविधिः ॥

अथ शिष्यः प्रातरुत्थाय श्रीमद्गुरुं ध्यात्वा ततो बहिर्विनिर्गत्य शौचादिकाः क्रियाः

कृत्वाऽगत्य शुद्धेनोष्णेन वारिणा सुस्नातः - शुद्धवस्त्रं परिधाय आचम्य पराम्बिकां

ध्यायन् त्रिपुण्ड्रं भाले धृत्वा शुद्धात्मा सन्ध्यावन्दनमाचरेत्। ततश्च मार्ताण्डायार्घ्यं समुक्षिपेत्। ततः सङ्कल्प्य अन्ङ्गन्यास करन्यासादि पूर्वकं गुरूपदिष्टं मूलमनुं सहस्रं त्रिशतं शतं वा यथा शक्ति जपत्वा श्री ललितोपाख्यानं यतचित्तः पठेत्। तदनन्तरं च पुनः मूलमनुं पूर्वोक्त संख्याक्रमेणैव जप्त्वा उत्तरन्यासादिकं कृत्वा अम्बिकायै सम्यगर्घ्यं दद्यात्॥

The Upasaka should wake up early, and meditate on his guru in the Sahasrara, chanting the Gurupaduka Mahamantra. He should finish his morning duties and take bath with hot water. Wearing clean robes, either white or reddish orange in color, he should wear Tripundra with Bhasma, chanting the Moola mantra. Then he should proceed to do the Sandhyavandana, first the Vedic and then the Tantric, offering Arghya to Sri Soorya. He should perform the Sankalpa and then chant Aryaa Kavacha, which happens to be a part of Lalita Stavaratnam. He should then repeat Lalita Stavaraja (Chapter eight of this text). He should then perform Anganyasa and Karanyasa and chant the Moola mantra (Bala, Panchadashi or Shodashi) obtained from his guru, thousand, three hundred or hundred and eight times. He should then meditate on Sridevi and start chanting the great hymn with concentration, pronouncing the words clearly. Since this invokes various Shaktis of Srichakra, proper pronunciation is absolutely necessary. After finishing the Parayana, Uttara nyasa should be performed with the Moola mantra. Then Sri Lalita Stuti (Chapter 24 - Shlokas 10 to 42). Then Aparadha Stuti should be chanted. Sridevi should be offered Arghya with milk after this (There is also a custom of offering Arghya after every chapter). To conclude one should chant all the three chapters of Sri Lalita Sahasranama Stotra. Chanting just the Sahasranama makes the Japa chidra (broken) according to some scholars. To compensate for all errors that could have taken place during the Parayana, offer Arghya to Aditya Bhagavan, with milk and kesar, reciting the mantra :

ॐ ऐं ह्रीं श्रीं ह्रां ह्रीं सः श्री सूर्य एष तेऽर्घ्यः स्वाहा॥

श्रीविद्या खण्डत्रयुक्त तत्वैराचम्य मूल मन्त्रेण प्राणायामत्रयं कुर्यात्।

॥ अथ सङ्कल्पः॥

श्री आदिगुरोः परशिवस्याज्ञया प्रवर्तमान देवीमनेन षट्त्रिंशत् तत्वात्मक सकलप्रपञ्चसृष्टिस्थितिसम्हारतिरोधानानुग्रहकारिण्याः श्रीपराशक्त्याः ऊर्ध्वभ्रूविभ्रमे - - - घटिकोदये - - - वासरे - - - तिथिनित्यायां - - - दिननित्यायां - - - तत्वदिवसे - - - कला मासे सं वायुतत्ववर्षे थं त्वक्तत्वपरिवृत्तौ खं सदाशिवतत्वयुगे श्री ललितामहात्रिपुरसुन्दरी पराभट्टारिका प्रीत्यर्थं सर्व पाप क्शयार्थं पूर्वाङ्ग उत्तराङ्ग जप समेत श्री ललितोपाख्यान पारायणाख्य कर्म करिष्ये ॥

॥ अथ श्री आर्या कवचम् ॥

ॐ ऐं ह्रिं श्रीं

ललिता पातु शिरो मे ललाटमम्बा च मधुमतीरूपा ।
भ्रूयुग्मं च भवानी पुष्पशरा पातु लोचनद्वन्द्वम् ॥ १ ॥
पायान्नासां बालसुभगा दन्तान्श्च सुन्दरी जिह्वाम् ।
अधरोष्टं आदिशक्तिः चक्रेशी पातु मे चिरं चिबुकम् ॥ २ ॥
कामेश्वरी च कर्णौ कामाक्षी पातु गण्डयोर्युगलम् ।
शृङ्गारनायिकाव्याद्वदनं सिम्हासनेश्वरी च गलम् ॥ ३ ॥
स्कन्दप्रसूश्च पातु स्कन्धौ बाहू च पाटलाङ्गी मे ।

पाणी च पद्मनिलया पायादनिशं नखावलीर्विजया ॥ ४ ॥

कोदण्डिणी च वक्शः कुक्षिं चाव्यात्कुलाचलतनूजा ।

कल्याणी च वलग्नं कटिं च पायात्कलाधरशिखण्डा ॥ ५ ॥

ऊरूद्वयं च पायादुमा मृडाणी च जानुनी रक्शेत् ।

जङ्घे च षोडषी मे पायात्पादौ च पाशसृणिहस्ता ॥ ६ ॥

प्रातः पातु परा मां मध्याह्ने पातु मणिगृहाधीशा ।

शर्वाण्यवतु च सायं पायाद्रात्रौ च भैरवी साक्शात् ॥ ७ ॥

भार्यां रक्शतु गौरी पायात् पुत्राम्श्च बिन्दुगृहपीठा ।

श्रीविद्या च यशो मे शीलं चाव्याच्चिरं महाराज्ञी ॥ ८ ॥

पवनमयि पावकमयि क्षोणीमयि गगनमयि कृपीटमयि ।

रविमयि शशिमयि दिङ्ग्मयि समयमयि प्राणमयि शिवे पाहि ॥ ९ ॥

कालि कपालिनि शूलिनि भैरवि मातङ्गि पञ्चमि त्रिपुरे ।

वाग्देवि विन्ध्यवासिनि बाले भुवनेशि पालय चिरं माम् ॥ १० ॥ ॐ ऐं ह्रीं श्रीं

॥ अथ श्री ललिता स्तवराजः ॥

ॐ ऐं ह्रीं श्रीं

जय देवि जगन्मातर्जय देवि परात्परे ।

जय कल्याणनिलये जय कामकलात्मिके ॥ १ ॥

जय कामेशवामाक्षि जय कामाक्षि सुन्दरि ।

ज्याऽखिलसुराराध्ये जय कामेशि कामदे ॥ २ ॥

जय ब्रह्ममये देवि ब्रह्मानन्दरसात्मिके ।

जय नारायणि परे नन्दिताशेशविष्टपे ॥ ३ ॥

जय श्रीकण्ठदयिते जय श्री ललिताम्बिके ।

जय श्रीविजये देवि विजयश्री समृद्धिदे ॥ ४ ॥

जातस्य जायमानस्य चेष्टापूर्तस्य हेतवे ।

नमस्तस्यै त्रिजगतां पालयित्र्यै नमो नमः ॥ ५ ॥

कला मुहूर्तकाष्ठाहं मासमम्वत्सरात्मने ।

नमः सहस्त्रशीषयै सहस्त्रमुखलोचने ॥ ६ ॥

नमः सहस्त्रहस्ताब्ज पादपङ्कजशोभिते ।

अणोरणुतरे देवी महतोऽपि महीयसि ॥ ७ ॥

परात्परतरे मातस्तेजस्त्वं तेजसामपि ।

अतलं तु भवेत्पादौ वितलं जानुनी तव ॥ ८ ॥

रसातलं कटीदेशः कुक्षिस्ते धरणी भवेत् ।

हृदयं तु भुवर्लोकः स्वस्ते मुखमुदाहृतम् ॥ ९ ॥

दृशश्चन्द्रार्कदहना दिशस्ते बाहवोऽम्बिके ।

मरुतस्ते तनूच्छ्वासा वाचस्ते श्रुतयोऽखिलाः ॥ १० ॥

क्रीडा ते लोकरचना सखा ते चिन्मयश्शिवः ।

आहरस्ते सदानन्दो वासस्ते हृदयं सताम्॥ ११।

दृश्यादृश्यस्वरूपाणि रूपाणि भुवनानि ते।

शिरोरुहा नभस्ते तु तारकाः कुसुमानि ते॥ १२॥

धर्माद्या बाहवस्ते स्युरधर्माध्यायुधानि ते।

यमाश्च नियमाश्चैव करपादरुहास्तथा॥ १३॥

स्तनौ स्वाहा स्वधाकारौ लोकोज्जीवनकारकौ।

प्राणायामस्तु ते नासा रसना ते सरस्वती॥ १४॥

प्रत्याहारस्त्विन्द्रियाणि ध्यानं ते धीस्तृडासनम्।

मनस्ते धारणा शक्तिर्हृदयं ते समाधिका॥ १५॥

महीरुहास्तेऽङ्गरुहाः प्रभातं वसनं तव।

भूतं भव्यं भविष्यच्च नित्यं च तव विग्रहम्॥ १६

यज्ञरूपा जगद्धात्री विश्वग्रूपा च पावनी।

आधारं त्वां प्रपश्यन्ति न सम्यङ्ङ्निखिलाः प्रजाः॥ १७॥

हृदयस्थापि लोकानां अदृश्या मोहनात्मिका।

नामरूपविभागं च या करोति स्वलीलया॥ १८॥

तान्यधिष्ठाय तिष्ठन्ती तेष्वसक्ता च कामदा।

नमस्तत्स्यै महादेव्यै सर्वशक्त्यै नमो नमः॥ १९॥

या देवी परमाशक्तिः परब्रह्माभिधायिनी।

ब्रह्मानन्दाभिदायिन्यै तस्यै देव्यै नमो नमः॥ २०॥

यदाज्ञया प्रवर्तन्ते वह्निसूर्येन्दुमारुताः ।
पृथिव्यादीनि भूतानि तस्यै देव्यै नमो नमः ॥ २१ ॥
या ससर्ज विधातारं सर्गादावादिभूरियं ।
दधार स्वयमेवैका तस्यै देव्यै नमो नमः ॥ २२ ॥
यया धृता तु धरणी ययाऽकाशाद्यमेयया ।
यस्यामुदेति सविता तस्यै देव्यै नमो नमः ॥ २३ ॥
यदन्तरस्थं त्रिदिवं यदाधारोऽन्तरिक्षकः ।
यन्मयश्चाखिलो लोकः तस्यै देव्यै नमो नमः ॥ २५ ॥
यत्रोदेति जगत्कृत्स्नं यत्र तिष्ठति निर्भरम् ।
यत्रान्तमेति काले तु तस्यै देव्यै नमो नमः ॥ २६ ॥
नमो नमस्ते रजसोभवायै नमो नमः सात्विकसम्स्थितायै ।
नमो नमस्ते तमसो हरायै नमो नमो निर्गुणतः शिवायै ॥ २६ ॥
नमो नमस्ते जगदेकमात्रे नमो नमस्ते जगदेकपित्रे ।
नमो नमस्तेऽखिल तन्त्ररूपे नमो नमस्तेऽखिल यज्ञरूपे ॥ २७ ॥
नमो नमो लोकगुरुप्रधाने नमो नमस्तेऽखिलवाग्विभूत्यै ।
नमोऽस्तु लक्ष्म्यै जगदेकतुष्ट्यै नमो नमः शाम्भवि सर्वशक्त्यै ॥ २८ ॥
अनादिमध्यान्तमपाञ्चभौतिकं ह्यवान्ङ्ग्मनोगम्यमतर्क्यवैभवम् ।
अरूपमद्वन्द्वमदृष्टिगोचरं प्रभावमग्र्यं कथमम्ब वर्ण्यते ॥ २९ ॥
प्रसीद विश्वेश्वरि विश्ववन्दिते प्रसीद विश्वेश्वरि वेदरूपिणि ।

प्रसीद मायामयि मन्त्रविग्रहे प्रसीद सर्वेश्वरि सर्वरूपिणि ॥ ३० ॐ ऐं ह्रीं श्रीं

अङ्गन्यास करन्यास पूर्वकं मूलमन्त्रं जपेत् ॥

तदनन्तरं देव्यै जपं समर्पयेत् ॥

॥ अथ प्रथमोऽध्यायः ॥

॥ ध्यानम् ॥

श्रीमत्सुन्दरमीशानं श्रीमत्सिद्धिविनायकम्
षण्मुखं स्कन्दमानन्दं ब्रह्माणं विष्णुमाश्रये ।
अस्तु वः श्रेयसे नित्यं वस्तुवामाङ्गमैश्वरम् ।
यतस्तृतीयो विदुषां तुरीयं तत्परं महः ॥

[ अगस्त्यमहर्षेः तीर्थयात्रा - काञ्चीनगर्यां हयग्रीवमूर्ति साक्षात्कारः - जगदुद्धार प्रश्नः - हयग्रीवकृत पराशक्तिपूजोपदेशः ]

ॐ ऐं ह्रीं श्रीं

अगस्त्यो नाम देवर्षिर्वेदवेदाङ्गपारगः ।
सर्वसिद्धान्तसारज्ञो ब्रह्मानन्दो दयात्मकः ॥ १ ॥
चचाराद्भुतहेतूनि तीर्थान्यायतनानि च ।

शैलारण्यापगामुख्याः सर्वान् जनपदानपि ॥ २ ॥

तेषु तेष्वखिलान् जन्तून् अज्ञानतिमिरावृतान् ।

शिश्नोदरपरान् दृष्ट्वा चिन्तयामास तान् प्रति ॥ ३ ॥

चिरं चिन्तयमानस्य चरतो वसुधामिमाम् ।

प्राप्तमासीन्महापुण्यं काञ्चीनगरमद्भुतम् ॥ ४ ॥

तत्र वारणशैलेन्द्रं एकाम्रनिलयं शिवम् ।

कामक्षीं कलिदोषघ्नीं अपूजयदथात्मवान् ॥ ५ ॥

लोकहेतोरथर्द्रस्य चिन्तयानस्य धीमतः ।

चिरकालेन तपसा तोषितोऽभूज्जनार्दनः ॥ ६ ॥

हयग्रीवां तनुं कृत्वा साक्षाच्चिन्मात्रविग्रहाम् ।

शङ्खचक्राक्षवलय पुस्तकोज्ज्वलबाहुकाम् ॥ ७ ॥

पूरयित्रीं जगत्कृत्स्नं प्रभया देहजातया ।

प्रादुर्बभूव पुरतो मुनेरमिततेजसः ॥ ८ ॥

तं दृष्ट्वाऽनन्दभरितः प्रणम्य च मुहुर्मुहुः ।

विनयावनतो भूत्वा स तुष्टाव जगत्पतिम् ॥ ९ ॥

Long ago, the mountain Vindhya (central India) started growing upward in gigantic proportion due to egoism. The sage Agastya decided to subdue the pride of Vindhya. For this purpose, he came from Varanasi (Uttara Pradesh, India) and settled in South India. By the divine presence of the sage Agastya, the entire South India gradually became prosperous and pious.

Eventually the Kali Yuga started (As per the tradition of India, Kali Yuga is the fourth Age, the others being Kruta, Treta and Dvapara). Inspite of the severe inspection of the sage Agastya, the evil traits of the Kali Yuga started sprouting slowly. Noting this trend, the sage felt sad and proceeded on a pilgrimage. He visited marvelous countries, Tirthas,

temples, mountains, forests, lakes, rivers and various civilizations. In all these places he noticed that the people were interested only in food and sex, entangled in duality and ignorance. In the course of his travel, he arrived in Kanchipuram, one of the seven Mokshapuris. That great sage, who was a Atmajnani (knower of the self), worshipped Ekamreshwara and goddess Sri Kamakshi. For the welfare of the entire humanity, he then performed a severe penance, by which Lord Janardana was pleased. Vishnu appeared to the sage in the form of Hayagriva, holding conch, discus, rosary and book in his four arms. The entire world was filled with the divine light that radiated from his body.

अथोवाच जगन्नाथस्तुष्टोऽस्मि तपसा तव ।

वरं वरय भद्रं ते भविता भूसुरोत्तम ॥ १० ॥

इति पृष्टो भगवता प्रोवाच द्विजसत्तमः ।

यदि तुष्टोऽसि भगन्निमे पामरजन्तवः ॥ ११ ॥

केनोपायेन मुक्ताः स्युरेतन्मे वक्तुमर्हसि ।

इति पृष्टो द्विजेनाह देवदेवो जनार्दनः ॥ १२ ॥

The Lord asked Agastya to ask a boon. Agastya asked Lord Hayagriva "Oh Lord! What is the path of salvation to these ignorant people"?

एष एव पुरा प्रश्नः शिवेन कथितो मम ।

अयमेव कृतप्रश्नो ब्रह्मणा च ततः परम् ।

कृतो दुर्वाससा पश्चाद्भवता तु ततः परम् ॥ १३ ॥

भवद्भिः सर्वलोकानां गुरुभूतैर्महात्मभिः ।

ममोपदेशो लोकेषु प्रथितोऽस्तु वरान्मम ॥ १४ ॥

अहमादिर्हि भूतानामादिकर्ता स्वयं प्रभुः ।

सृष्टिस्थितिलयानां तु सर्वेषामपि कारकः ॥ १५ ॥

त्रिमूर्तिस्त्रिगुणातीतो गुणहीनो गुणाश्रयः ।

इच्छाविहारी भूतात्मा प्रधानपुरुषात्मकः ॥ १६ ॥

एवं भूतस्य मे ब्रह्मंस्त्रिजगद्रूपधारिणः ।

द्विधा कृतमभूद्रूपं प्रधानपुरुषात्मकम् ॥ १७ ॥

O great Sage! This same question was asked previously by Brahma, Shiva and Rishi Durvasa and then yourself, thus earning you all, the status of Gurus of the entire world. This knowledge (which I shall bestow on you as a boon) shall be published in the world through you. O Sage, I am the first and the foremost. I am the creator of the five elements. I am my own Lord. I am responsible for the creation, maintenance and destruction of the world. I am beyond the limiting realms of the three Gunas: Satva, Rajas and Tamas. I am without any attributes. These Gunas reside in me. This form of mine, which bears the three worlds, appears as two: Pradhana and Purusha.

मम प्रधानं यद्रूपं सर्वभूतगुणातमकम् ।

अपरं यद्गुणातीतं परात्परतमं महत् ।

एकेमेवैतयोर्ज्ञात्वा मुच्यते ते उभे किमु ॥ १८ ॥

तपोभिश्चिरकालोत्थैर्यमैश्च नियमैरपि ।

त्यागैर्दुष्कर्मनाशान्ते मुक्तिराद्येन लभ्यते ॥ १९ ॥

यद्रूपं यद्गुणयुतं तद्गुणैक्येन लभ्यते ।

अन्यत्सर्वं जगद्रूपं कर्मभोगपरात्मकम् ॥ २० ॥

कर्मभिर्लभ्यते तच्च तत्त्यागेनापि लभ्यते ।

दुष्करस्तु तयोस्त्यागः सकलैरपि तापस ॥ २१ ॥

अनपायं च सुगमं सदसत्कर्मगोचरम् ।

आत्मस्थेन गुणेनैव सता वाप्यसतापि वा ।

आत्मैक्येनैव यज्ज्ञानं सर्वसिद्धिप्रदायकम्॥ २२ ॥

My form as Pradhana includes the attributes of all creatures. The second is a greater and attributeless form. A man shall be liberated by knowing any of these two forms. By practicing penance, Yama, Niyama, sacrifice and by giving up all unworthy actions, a man obtains Moksha by attaining my first form. This form is attainable either by performance of prescribed karma or by giving up karma altogether. However, giving up karma is not possible for the less advanced.

वर्णाश्रमविहीनानां पापिष्ठानां नृणामपि ।

यद्रूपध्यानमात्रेण दुष्कृतं सुकृतायते ॥ २३ ॥

येऽर्चन्यन्ति परां शक्तिं विधिनाऽविधिनापि वा ।

न ते संसारिणो नूनं मुक्ता एव न संशयः ॥ २४ ॥

शिवोऽपि यां समाराध्य ध्यानयोगबलेन च ।

ईश्वरः सर्वसिद्धीनां अर्धनारीश्वरोऽभवत्॥ २५ ॥

अन्येऽब्जमुखा देवाः सिद्धास्तद्ध्यानवैभवात्।

तस्मादशेषलोकानां त्रिपुराराधनं विना ।

न स्तो भोगापवर्गौ तु यौगपद्येन कुत्रचित्॥ २६ ॥

By merely meditating on this form (as Sri Mahatripurasundari), even the sinners who violate the rules of Varnashrama, shall attain liberation. A person who worships Parashakti, either methodically or even otherwise, shall never get entangled in the Samsara. They are surely liberated. Even Lord Shiva became Ardhananrishwara (Lord of Shakti) and the master of all Siddhis by his merit of meditation on Sridevi. All the other Devas like Brahma obtained their respective Siddhis (like the power to create the worlds) by worshipping Parashakti. It is impossible to obtain both enjoyment and liberation (Bhoga and Moksha) simultaneously in any way other than by worshipping Sri Tripura (i.e. by Srividya).

तस्मान्मन्त्रास्त्रसम्युक्तन्यासपूर्वक्रमेण च ।

तन्मनास्तद्गतप्राणस्तद्याजी तद्गतेहकः ।

तादात्मैक्येन कर्माणि कुर्वन्मुक्तिमवाप्यति ॥ २७ ॥

एतद्रहस्यमाख्यानं सर्वेषां हितकाम्यया ।

संतुष्टेनैव भवतस्तपसा मुनिसत्तम ॥ २८ ॥

देवाश्च ऋषयः सिद्धा मनुष्याश्च तथेऽतरे ।

त्वन्मुखाम्भोजतो लब्ध्वा सिद्धिं यान्तु परात्पराम् ॥ २९ ॥

Obtaining the weapon called mantra (of Lalita) along with Anganyasa and Karanyasa (from a Guru), and chanting it by fixing the mind and the Panchapranas (the five vital airs.. This actually means the ten senses) in Sridevi, one should perform karma striving to achieve complete identity with Sridevi. By this a man will surely obtain liberation. O greatest of the sages! Pleased with the penance that you have performed for the welfare of the entire creation, I will bestow on you, this secret knowledge of Tripura. May all creatures including the gods, Siddhas, sages and men obtain the greatest of Siddhi (liberation) by knowing this from you.

इति तद्वचनं श्रुत्वा हयग्रीवस्य शार्ङ्गिणः ।

प्रणिपत्य पुनर्वाक्यमुवाच मधुसूदनम् ॥ ३० ॥

भगवन् कीदृशं रूपं भवता यत्पुरोदितम् ।

किं विहारं किं प्रभावमेतन्मे वक्तुमर्हसि ॥ ३१ ॥

श्री हयग्रीव उवाच

एषोऽम्शभूतो देवर्षिर्हयग्रीवो ममापरः ।

श्रोतुमिच्छसि यद्यत्त्वं तत्तत्तव वदत्ययम् ॥ ३२ ॥

इत्यादिश्य जगन्नाथो हयग्रीवं तपोनिधिम् ।

पुरतः कुम्भजातस्य मुनेरन्तरधीयत ॥ ३३ ॥

ततस्तु विस्मयाविष्टो हृष्टरोमा तपोधनः ।

हयग्रीवेण मुनिना स्वाश्रमं प्रत्यपद्यत ॥ २४ ॥

Hearing the words of the Lord, Agastya bowed down to him again and questioned him more about the first form that was mentioned by the Lord. The Lord ordered the sage to get answers to all his queries from sage Hayagriva, who is an incarnation of Lord Narayana and non-different from the Lord and vanished. The sage was left filled with great surprise and excitement. He then returned to his own Ashrama (hermitage).

॥ श्री ब्रह्माण्डपुराणे उत्तरखण्डे हयग्रीवागस्त्यसम्वादे श्री ललितोपाख्याने प्रथमः ॥

॥ बालार्कमण्डलाभासां चतुर्बाहुं त्रिलोचनाम् ।

पाशाङ्कुशधनुर्बाणान् धारयन्तीं शिवां भजे ॥ ॐ ऐं ह्रीं श्रीं साङ्गायै सायुधायै सवाहनायै सपरिवारायै सर्वदेवतास्वरूपिण्यै श्रीललितामहात्रिपुरसुन्दर्यै परब्रह्मणे नमः ॥

॥अथ द्वितीयोऽध्यायः ॥

॥ ध्यानम् ॥

त्वद्ध्यानपूजा निरता महान्तो भुक्तिं विमुक्तिं प्रविशन्ति सर्वे ।

भजेऽम्बिकां त्वां जगदेकवन्द्ये सदाशिवां श्रीललितां महेशीम् ॥

[ देव्या अवतारविषये हयग्रीवं प्रत्यगस्त्यस्य प्रश्नः - इन्द्रं प्रति दुर्वाससः शापः - इन्द्रबृहस्पत्योः धर्माधर्मविषयकः सम्वादः - स्तेयदोष विचारः - द्विजवर्मनाम किरातोपाख्यानं - मद्यपानगुणदोषकथनं ]

ॐ ऐं ह्रीं श्रीं

अथोऽपवेशयित्वैनमासने परमाद्भुते ।

हयाननमुपागम्य ह्यगस्त्यो वाक्यमब्रवीत् ॥ १ ॥

भगवन् सर्वधर्मज्ञ सर्वसिद्धान्तवित्तम ।

लोकाभ्युदयहेतुर्हि दर्शनं तु भवादृशाम् ॥ २ ॥

आविर्भावं महादेव्यास्तस्या रूपान्तराणि च ।

विहाराणि च मुख्यानि तानि विस्तरतो वद ॥ ३ ॥

श्री हयग्रीव उवाच

अनादिरखिलाधारा सदसत्कर्मरूपिणी ।

ध्यानैकदृश्या ज्ञानाङ्गी विद्याङ्गी हृदयास्पदा ॥ ४ ॥

आत्मैक्याद्व्यक्तिमायाति चिरानुष्ठान गौरवात् ॥ ५ ॥

आदौ प्रादुरभूच्छक्तिर्ब्रह्मणो ध्यानयोगतः ।

प्रकृतिर्नाम सा ख्याता देवानामिष्टसिद्धिदा ॥ ६ ॥

द्वितीयमुदभूद्रूपं प्रवृत्तेऽमृतमन्थने ।

सर्वसम्मोहजनकमवाङ्ग्मनसगोचरम् ॥ ७ ॥

यद्दर्शनादभूदीशः सर्वज्ञोऽपि विमोहितः ।

विसृज्य पार्वतीं शीघ्रं तया रुद्धोऽप्यनुद्रुतः ॥ ८ ॥

तस्यां वै जनयामास शास्तारमसुरार्दनम् ॥ ९ ॥

After returning to his own Ashrama, Agastya seated sage Hayagriva in a wonderful asana and spoke to him thus: 'Revered one! You are the best knower of all Dharma and philosophy. Your very materialization is for sake of welfare of this world. Please narrate in detail, the origin, forms and plays of Parashakti'. Hayagriva replied: 'O great sage! Parashakti Lalita is without birth; she is the support of all. She is attainable only by means of Dhyana (on the Self). She is both the knowledge and the means to attain it. She resides in the hearts of all creatures. She becomes visible by attainment of Brahmajnana (knowledge of the Self as being non-different from Parabrahman or Parashakti), which in turn is possible only after long practice. Long ago, Adi Shakti, the primordial power, emerged from the depths of Brahma's meditation and came to be known as Prakriti or nature and as the bestower of boons to the Devas. This is the first manifestation of Sridevi. Her second form appeared during the churning of the milky ocean, causing even Lord Shiva to become enchanted with her beauty and obtained an offspring called Shaasta in her.

अगस्त्य उवाच

कथं वै सर्वभूतेशो वशी मन्मथशासनः ।

अहो विमोहितो देव्या जनयामास चात्मजम् ॥ १० ॥

Agastya questioned: 'How is it that Lord Shiva, the slayer of Manmatha (desire), master of all senses and the Lord of all creatures became, enchanted with that Devi and had a son from her?'.

श्री हयग्रीव उवाच

पुराऽमरपुराधीशो विजयश्रीसमृद्धिमान् ।

त्रैलोक्यं पालयामास सदेवासुरमानुषम् ॥ ११ ॥

कैलासशिखराकारं गजेन्द्रमधिरुह्य सः ।

चचार सर्वलोकेषु पूज्यमानोऽखिलैरपि ॥ १२ ॥

तं प्रमत्तं विदित्वा तु भवानीपतिरव्ययः ।

दुर्वाससमथाहूय प्रजिघ्रूय तदन्तिकम् ॥ १३ ॥

कन्थाजिनधरो दण्डी धूलीधूसरविग्रहः ।

उन्मत्तरूपधारी च ययौ विध्याधराध्वना ॥ १४ ॥

एतस्मिन्नन्तरे काले काचिद्विद्याधराङ्गना ।

यदृच्छयागता तस्य पुरश्चारुतराकृतिः ॥ १५ ॥

चिरकालेन तपसा तोषयित्वा पराम्बिकाम् ।

तत्समर्पितमाल्यं च लब्ध्वा संतुष्टमानसा ॥ १६ ॥

तां दृष्ट्वा मृगशावाक्षीमुवाच मुनिपुङ्गवः ।

कुत्र वा गम्यते भीरु कुतो लब्धमिदं त्वया ॥ १७ ॥

Once upon a time, Indra, the Lord of the Heaven, was overpowered by the pride of his prosperity and victory over the demons. He roamed in pride, seated on his huge elephant Airavata, in all the three worlds. He was respected by all. Observing this, Shiva asked the sage Durvasa to meet Indra in the Heaven. The sage started taking the path of Gandharvas (the celestial singers), which was very beautiful. The sage wore a patched garment and was covered with dust. He appeared like an intoxicated person. On the way, the sage saw a celestial lady holding a fragrant garland of divine flowers.
The terrible looking sage asked the beautiful lady, “Where did you get this garland”?

प्रणम्य सा महात्मानमुवाच विनयान्विता ।

चिरेण तपसा ब्रह्मन् देव्या दत्तं प्रसन्नया ॥ १८ ॥

तच्छ्रुत्वा वचनं तस्यास्त्वपृच्छन्माल्यमुत्तमम् ।

पृष्टमात्रेण सा तुष्टा ददौ तस्यै महात्मने ॥ १९ ॥

कराभ्यां तत्समादाय कृथार्तोऽस्मीति सत्वरम् ।

दधौ स्वशिरसा भक्त्या तामुवाचातिहर्षतः ॥ २० ॥

ब्रह्मादीनामलभ्यं यत्तल्लब्धं भाग्यतो मया ।

भक्तिरस्तु पदाम्भोजे देव्यास्तव समुज्ज्वला ॥ २१ ॥

भविष्यच्छोभनाकारे गच्छ सौम्ये यथा सुखम् ।

सा तं प्रणम्य शिरसा ययौ तुष्टा यथागतम् ॥ २२ ॥

प्रेषयित्वा सतां भूयो ययौ विध्याधराध्वना ।

विद्याधरवधूभ्यश्च प्रतिजग्राह वल्लकीम् ॥ २३ ॥

दिव्यस्त्रगनुलेपान्श्च दिव्यान्याभरणानि च ।

क्वचिद्वदन् क्वचिद्दृह्लन् क्वचिद्गायन् क्वचिद् हसन् ॥ २४ ॥

स्वेच्छाविहारी स मुनिर्ययौ यत्र पुरन्दरः ।

स्वकरस्थां ततो मालां शक्राय प्रददौ मुनिः ॥ २५ ॥

She observed him keenly and realized that he was a sage. She prostrated before him and replied humbly "O knower of the Brahman! Sridevi gave this garland to me as a boon, pleased with my long penance". Jumping joyously, the sage asked her to give the garland to him. She happily handed it over to the sage and prostrated to him. The sage accepted the garland with both his hands respectfully and placed it on his head with reverence. He then told her, " O lady, I have got this Prasadam of Sridevi, difficult to be obtained even by gods like Brahma and others, due to my good fortune! May your devotion to the lotus feet of Sridevi be firm always. You will be responsible for the auspicious event that will take place in future". Taking leave of the sage, the lady went away. The sage continued walking, accepting Vina, perfumes, garlands of flowers and beautiful ornaments from the Vidyadharas on his way. He was speaking to himself, laughing at himself and singing sometimes. Thus putting on the appearance of a mad man, the great sage came to Indra and presented the sacred garland to him.

तां गृहीत्वा गजस्कन्धे स्थापयामास देवराट् ।
गजस्तु तां गृहीत्वाऽथ पेषयामास भूतले ॥ २६ ॥
तां दृष्ट्वा पेषितां मालां क्रुद्धः कोपेन तापसः ।
उवाच न धृता माला शिरसा तु मयार्पिता ॥ २७ ॥
महादेव्या धृता माला ब्रह्माद्यैः पूज्यते हि सा ।
त्रैलोक्यैश्वर्यमत्तेन भवता त्ववमानिता ॥ २८ ॥
त्वया यच्छासितं लोकं सदेवासुरमानुषम् ।
अशोभितमतेजस्कं मम शापाद्भविष्यति ॥ २९ ॥
इति शप्त्वा विनीतेन तेन सम्पूजितोऽपि सः ।
तूष्णीमेव ययौ ब्रह्मन् भाविकार्यमनुस्मरन् ॥ ३० ॥
विजयश्रीश्च सा तस्य दैत्यलोकमथान्वगात् ।
नित्यश्रीर्नित्यपुरुषं वासुदेवमथाऽन्वगात् ॥ ३१ ॥
इन्द्रोपि स्वपुरं गत्वा सर्वदेवसमन्वितः ।
विषण्णचेता निःश्रीकश्चिन्तयामास देवराट् ॥ ३२ ॥

Indra, the Lord of the Devas, who was riding his elephant Airavata, accepted the garland with disrespect and threw it carelessly on the head of his elephant. The elephant threw down the garland with its trunk and trampled it under its foot. Looking at this, the great sage was filled with extreme anger and said, “ O Indra! You did not respect the garland that I offered you. This garland, worn by Sridevi, is respected even by the likes of Brahma and Vishnu. Your pride of being the possessor of the riches of all the three worlds has made you reject this sacred gift. By my curse, your kingdom comprising of the heavens, earth and the nether worlds, shall become inauspiciousness and lusterless”. Though Indra now tried to pacify the angry sage, Durvasa walked away without uttering a single word of assurance to Indra. As a result of this terrible curse, Vijayalakshmi (the

goddess of victory) left Indra and went to the demons. Mahalakshmi, who was responsible for all his prosperity and valor, also left him and went to Sri Narayana. Indra went back to his abode and began to think of his sorry state, accompanied by his subjects.

अथाऽमरपुरे दृष्ट्वा निमित्तान्यशुभानि च ।

बृहस्पतिं समाहूय वाक्यं चैतदुवाच ह ॥ ३३ ॥

भगवन् सर्वधर्मज्ञ त्रिकालज्ञानकोविद ।

दृश्यन्तेऽदृष्टपूर्वाणि निमित्तान्यशुभानि नः ।

किं फलानि च तानि स्युरुपायो वाऽथ कीदृशः ॥ ३४ ॥

इति तद्वचनं श्रुत्वा देवराजं बृहस्पतिः ।

प्रत्युवाच ततो वाक्यं धर्मार्थसहितं शुभम् ॥ ३५ ॥

कृतस्य कर्मणो राजन् कल्पकोटिशतैरपि ।

प्रायश्चित्तोपभोगाभ्यां विना नाशो न जायते ॥ ३६ ॥

देवराज उवाच

कर्म वा कीदृशं ब्रह्मन् प्रायश्चित्तं च कीदृशम् ।

तत्सर्वं श्रोतुमिच्छामि तन्नो विस्तरतो वद ॥ ३७ ॥

Indra started observing bad omens in his celestial city of Amaravati. He sent for his spiritual preceptor Brihaspati, and asked him the cause for these bad omens. The sage indicated that the bad omens were the results of Indra's own sins. He also said that the sin would not leave the sinner without partly experiencing the negative effects of the sin and undergoing atonement. Indra then expressed his desire to know more about sins and atonements.

बृहस्पतिरुवाच

हननस्तेयहिम्साश्च पानमन्याङ्गनारतिः ।

कर्म पञ्चविधं प्राहुर्दुष्कृतं धरणीतले ॥ ३८ ॥

ब्रह्मक्षत्रिय विट्छूद्रगोतुरङ्ग गजोष्ट्रकाः ।

चतुष्पदोऽण्डजाब्जाश्च तिर्यंचोऽनस्थिकास्तथा ॥ २९ ॥

अयुतं च सहस्रं च शतं दश तथा दश ।

दशपञ्च त्रिरेकार्धमानुपूर्व्यादघं भवेत् ॥ ४० ॥

ब्रह्मक्षत्रविशां स्त्रीणामुक्तार्थे पादमाचरेत् ।

पितृमातृगुरुस्वामिपुत्राणां नास्ति निष्कृतिः ॥ ४१ ॥

Brihaspati says the following. Murder, theft, cruelty, drinking and copulation with a lady other than one's wife- these are said to be the five great sins. Brahmana, warrior, merchant, Shudra, cow, camel, animals born from eggs, aquatic animals and animals without bones- all these respectively attain ten thousand, thousand, hundred, ten, ten, ten, five, three, one and half of the effects of the sin actually committed by them. In case of ladies, only a quarter of the sin that have committed, is only considered. In case of murder of father, mother, Guru, master and children, the sin is so great that there is no atonement possible.

गुर्वाज्ञया कृते पादं तदाज्ञोल्लङ्घनेऽर्धकम् ।

दशब्राह्मण भृत्यर्थमेकं हन्याद्द्विजं नृपः ॥ ४२ ॥

शतब्राह्मण भृत्यर्थं ब्राह्मणो ब्राह्मणं तु वा ॥ ४३ ॥

पञ्चब्रह्मविशामर्थे वैश्यमेकं तु दण्डयेत् ।

वैश्यो दशविशामर्थे विशं वा दण्डतेत्तथा ॥ ४४ ॥

तथा शतविशामर्थे द्विजमेकं तु दण्डयेत् ॥ ४५ ॥

शूद्राणां तु सहस्रार्थे दण्डयेद्ब्राह्मणं तु वा ।

तच्छतार्थे तु वा वैश्यं तद्दशार्थे तु शूद्रकम् ॥ ४६ ॥

बन्धूनां चैव मित्राणामिष्टार्थे तु त्रिपादकम् ।

अर्धं कलत्रपुत्रार्थे स्वात्मार्थे तु न किञ्चन ॥ ४७ ॥

If one commits a murder by his Guru's orders, he gets only half the original sin. A king may slay one Brahmin for protecting the lives of ten Brahmins. To protect a hundred Brahmins, a Brahmana himself may punish another Brahmana. For the sake of five Brahmins, one Vysya (merchant) may be punished. For protecting ten Vysyas, a Vysya himself may punish another Vysya. A Brahmana may be punished for the sake of a hundred Vysyas. The king may also punish a Brahmana for the sake of a thousand Shoodras. He can also punish a Vysya for the sake of a hundred Shoodras and a Shoodra for the sake of ten Shoodras. The sin of murder will be reduced by a quarter and a half respectively, if the objective of the murder is to protect relatives and wife & children. There will be no concession in the sin, if one commits a murder for his own selfish motives.

आत्मानं हन्तुमारब्धं ब्राह्मणं क्षत्रियं विशम् ।

गां वा तुरङ्गमन्यं वा हत्वा दोषैर्न लिप्यते ॥ ४८ ॥

आत्मदारात्मज भ्रातृ बन्धूनां तु द्विजोत्तम ।

क्रमाद्दशगुणो दोषो रक्षणे च तथा फलम् ॥ ४९ ॥

देवद्विजश्रोत्रियवेदविद् व्रती वेदान्तविद्वेदविदां विनाशे ।

एकद्विपञ्चशत तद्दश चायुतं च लक्षं च निष्कृतिरिति प्रवदन्ति तज्ज्ञाः ॥ ५० ॥

तेषां च रक्षणविधौ च कृतेऽपि दाने पूर्वोदितोत्तरगुणं प्रवदन्ति पुण्यम् ।

तेषां च दर्शनविधौ नमने च कार्ये शुश्रूषणे विचरतां सदृशं च पुण्यम् ॥ ५१ ॥

सिम्हव्याघ्रमृगादीनि लोकहिंसाकराणि तु ।

नृपो हन्याच्च सततं देवार्थे ब्राह्मणार्थके ॥ ५२ ॥

आपत्स्वात्मार्थतो वापि हत्वा मेध्यानि भक्षयेत्।

नात्मार्थं पाचयेदन्नं नात्मार्थं पाचयेत्पशून्।

देवार्थे ब्राह्मणार्थे वा पचमानो न लिप्यते ॥ ५३ ॥

When one's life is in danger, he can kill a Brahmana, Vysya, Kshatriya or a Shoodra or even a cow, horse or any other animal, to protect his life from them. This will not earn him any sin. A man gets a sin tenfold greater, if he kills his wife, son, brothers and relatives. He gets an equally magnificent merit by protecting them. Killing good men, king, one's master, Brahmana, knower of the Vedas and the knower of Vedanta, will cause a very great sin. By protecting them, seeing them, prostrating before them and offering them service, one gets limitless merit. The king, for the sake of the gods and the Brahmanas, should kill harmful animals such as the lion, tiger etc. In times of distress, the king may kill and eat an animal, that is fit to be consumed. He should never indulge in this act, in any other circumstance, except for the sake of gods and Brahmanas.

पुरा भगवती माया जगदुज्जीवनोन्मुखी ।

ससर्ज सर्वदेवान्श्च सदेवासुरमानुषान्॥ ५४ ॥

तेषां संरक्षणार्थाय पशूनपि चतुर्दश ।

यज्ञाम्श्च तद्विधानानि कृत्वा चैनानुवाच ह ॥ ५५ ॥

यजध्वं पशुभिर्देवान्विधिना चैव मानवाः ।

इष्टानि वः प्रदास्यन्ति तुष्टास्ते यज्ञभाविताः ॥ ५६ ॥

एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः ।

दरिद्रो नारकश्चैव भवेज्जन्मनि जन्मनि ॥ ५७ ॥

देवतार्थे च पित्रर्थे तथैवाभ्यागते गुरौ ।

महदागमने चैव हन्यान्मेध्यान् पशून् द्विजः ॥ ५८ ॥

आपत्सु ब्राह्मणो माम्सं मेध्यमश्नन्न दोषभाक् ।

विहितानि तु कार्याणि प्रतिषिद्धानि वर्जयेत्॥ ५९॥

पुराऽभूद्युवनाश्वस्य देवतानां महाक्रतौ।

ममायमिति देवनां कलहः समजायत॥ ६०॥

तथा विभज्य देवानां मनुष्यांश्च पशूनपि।

विभज्यैकैकशः प्रादाद्ब्रह्मा लोकपितामहः॥ ६१॥

ततस्तु परमा शक्तिर्भूतसङ्घसहायिनी।

कुपिताभूत्ततो ब्रह्मा तामुवाच नयान्वितः॥ ६२॥

ये विभक्तास्तु पशवो देवानां परमेश्वरी।

ते सर्वे तावकाः सन्तु भूतानामपि तृपत्ये।

इत्युक्त्वाऽन्तर्दधे तेषां पुर एव पितामहः॥ ६३॥

Long ago, the great goddess Mahamaya created all the gods, demons and men, and for their sake, created fourteen kinds of animals. She also designed the various sacrifices using these animals and the method of performing them. She then addressed the men thus: “ Perform sacrifices using these animals, following the procedure laid out in the Vedas. The Devas, pleased with your sacrificial offerings, shall grant all your wishes”. One, who does not follow this mode of sacrifice introduced by Mahamaya, will remain poor and attain hell in all his births. A Brahmana may kill an animal and offer them in sacrifice to please Devas, ancestors, guests, Guru and great men. In times of distress, a Brahmana may also eat the flesh of a consumable animal in order to protect his life. This will not earn him any sin. Long ago, Yuvanashwa performed a great sacrifice in which, the gods started fighting among themselves for sacrificial offering. Then, Brahma divided animals and men and distributed them equally among the Devas. Displeased with this division, Parashakti appeared there in great anger. Brahma addressed her humbly, “ O great goddess! I offer all these animals to you and by this, all beings shall attain satisfaction!”. This pleased the great goddess.

तदुक्तेनैव विधिना चकार सुमहाक्रतून्।

इयाज च परां शक्तिं हत्वा मेध्यान् पशूनपि।

तत्तद्विभागो वेदेषु प्रोक्तत्वादिह नोदितः ॥ ६४ ॥

स्त्रियः शूद्रास्तथा माम्समादद्युर्ब्राह्मणीं विना ।

आपत्सु ब्राह्मणी वापि भक्षयेद्गुर्वनुज्ञया ॥ ६५ ॥

शिवोद्भवमिदं पिण्डमत्यर्थं शिवतां गतम् ।

उद्बुध्यस्व पशो त्वं हि नाऽशिवस्त्वं शिवो ह्यसि ॥ ६६ ॥

ईशः सर्वजगत्कर्ता प्रभवः प्रलयस्तथा ।

यतो विश्वाधिको रुद्रस्तेन रुद्रोऽसि वै पशो ॥ ६७ ॥

अनेन तुरगं गां वा गजोष्ट्रमहिषादिकम् ।

आत्मार्थं वा परार्थं वा हत्वा दोषैर्न लिप्यते ॥ ६८ ॥

गृहानिष्टकरान्वापि नागाखुबलिवृश्चिकान् ॥ ६९ ॥

एतद्गृहाश्रमस्थानां क्रियाफलमभीप्सताम् ।

पशुयज्ञो न चान्येषां इष्टापूर्तिकरं भवेत् ।

जपहोमार्चनाद्यैश्च तेषामिष्टं हि सिद्ध्यति ॥ ७० ॥

Following the orders of Sri Brahma, Yuvanashwa completed the sacrifice and offered the sacrificial animals to Parashakti. Details like the division of sacrificial animals, procedures etc. are omitted here since they are detailed in the Vedas. All women and Sudras ate meat except the Brahmin lady. Even a Brahmin lady may take meat in times of distress, as per her Guru's orders. A person can kill for himself or for the sake of others, animals like horse, elephant, camel, buffalo etc., saying the following verse: 'O Pashu! This pinda is born from Shiva. Truly it is having the qualities of Shiva. O Pashu! Wake up, you are not inauspicious, you are Shiva- the auspicious one. Ishwara is the Lord of the entire creation. He is the great Rudra who even transcends this world. Hence, you are also none but Rudra!". This protects one from the sin of murder. There is nothing wrong in killing pests and rodents like snakes, rats, scorpions and other creatures that are harmful to humanity. Only those people who expect fruits for their actions should resort

to the above said animal sacrifice. The others shall achieve everything by performance of Japa, Homa and Archana.

इन्द्र उवाच

भगवन् सर्वमाख्यातं हिम्साघस्य तु लक्शणम् ।

स्तेयस्य लक्शणं किं वा तन्मे विस्तरतो वद ॥ ७१ ॥

बृहस्पतिरुवाच

पापानामधिकं पापं हननं जीवजातिनाम् ।

एतस्मादधिकं पापं विश्वस्ते शरणागते ॥ ७२ ॥

विश्वास्य हत्वा पापिष्ठं शूद्रं वाप्यन्त्यजातिजम् ।

ब्रह्महत्याधिकं पापं तस्मान्नास्त्यस्य निष्कृतिः ॥ ७३ ॥

ब्रह्मघ्नस्य दरिद्रस्य कृच्छ्रार्जितधनस्य च ।

बहुपुत्रकलत्रस्य तेन जिवीतुमिच्छतः ।

तद्द्रव्यस्तेयदोषस्य प्रायश्चित्तं न विद्यते ॥ ७४ ॥

विश्वस्तद्रव्यहरणं तस्याप्यधिकमुच्यते ।

विश्वस्तो वाप्यविश्वस्तो न दरिद्रधनं हरेत् ॥ ७५ ॥

ततो देवद्विजादीनां हेमरत्नापहारकम् ।

यो हन्यादविचारेण सोऽश्वमेधफलं लभेत् ॥ ७६ ॥

गुरुदेवद्विजसुहृत्पुत्रेष्वात्मसुखेषु च ।

स्तेयादयः क्रमादेव दशोत्तरगुणं त्वघम् ॥ ७७ ॥

स्तेयं कृत्वा तु यो मूढः परस्त्रीभ्यः प्रयच्छति ।

वेश्यायै वा नटेभ्यो वा स भवेद्ब्राह्मणाधमः ॥ ७८ ॥

क्षत्रियाच्च विशः शूद्राद्ब्राह्मणादन्त्यजातिजात् ।

दशोत्तरगुणैः पापैर्लिप्यते धनहारकः ॥ ७९ ॥

अयुताम्शात्सहस्राम्शाच्छताम्शाद्दशमाम्शतः ।

धनं हृत्वा तथा पापैर्लिप्यते नात्र संशायः ॥ ८० ॥

अत्र्यैवोदाहरन्तीममितिहासं पुरातनम् ।

रहस्यातिरहस्यं च सर्वपापप्रणाशनम् ॥ ८१ ॥

Indra questioned his guru, " Revered one! You explained about murder, which is the first of the five great sins. Tell me about theft next". Brihaspati now starts talking about theft, the second of the five great sins. Cruelty to living creatures is the greatest of sins. Harming a man who fully trusts you is a greater sin. Killing such a person by deceit, even if he is a Shoodra, will result in a sin that is equal to killing a knower of the Brahman. There is no atonement for such a sin. Never should you steal the money of a knower of Brahman, a poor man, one who earns little money with great difficulty, one having wife and many children and one who depends solely on that sum for his living. Stealing the money of a person, who has trust in you, is a great sin. One should never steal a poor man's money. The person who steals the money belonging to the gods and learned Brahmanas is eligible to be killed immediately. The person who slays such a thief obtains the merit of performing a horse sacrifice. Greater sin is observed in case of theft from one's own Guru, friend, son and beloved deity. The Brahmana who steals money and gifts it to prostitutes or actors, is not fit to be called a Brahmana. He is the most unworthy of the Brahmanas. Let me quote an ancient story as an example. This is a secret parable that destroys all the sins of the listener.

पुरा काञ्चीपुरे जातो वज्राख्यो नाम चोरकः ।

तस्मिन् पुरवरे रम्ये सर्वैश्वर्यसमन्विताः ।

सर्वे निरोगिणो दान्ताः सुखिनो दययान्विताः ॥ ८२ ॥

सर्वैश्वर्य समृद्धेऽस्मिन्नगरे स तु तस्करः ।
वज्रो बहुद्रव्यवतां गृहेषु धनतृष्णया ।
स्तोकं स्तोकं क्रमेणैव बहुद्रव्यमपाहरत् ॥ ८३ ॥
तदरण्येऽवटं कृत्वा स्थापयामास लोभतः ।
तद्गोपनशिलार्थाय तस्मिन् दूरं गते सति ॥ ८४ ॥
किरातः कश्चिदागम्य तद्दृष्ट्वा तु दशाम्शतः ।
जहराऽविदितस्तेन काष्ठभारं वहन्ययौ ॥ ८५ ॥
सोऽपि तच्छिलयाच्छाद्य मृद्भिरापूर्य यत्नतः ।
पुनश्च तत्पुरं प्रायाद्वज्रोऽपि धनतृष्णया ॥ ८६ ॥
एवं बहुधनं हृत्वा निचिक्षेप महीतले ।
किरातोऽपि गृहं प्राप्य बभाषे मुदितः प्रियाम् ॥ ८७ ॥
मया काष्ठं समाहर्तुं गच्छता पथि निर्जने ।
लब्धं धनमिदं भीरु समादस्स्व धनार्थिनि ॥ ८८ ॥
तच्छ्रुत्वा तत्समादाय निधायाभ्यन्तरे ततः ।
चिन्तयन्ती ततो वाक्यमिदं भर्तारमब्रवीत् ॥ ८९ ॥
नित्यं सञ्चरते विप्रो मामकानां गृहेषु यः ।
मां विलोक्येयमचिराद्बहुभाग्यवती भवेत् ।
चातुर्वर्ण्यासु नारीषु इयं चेद्राजवल्लभा ॥ ९० ॥
किन्तु भिल्ले किरते च शैलूषे चान्त्यजातिजे ।

न तिष्ठते चिरं लक्ष्मीः शापाद्वल्मीक जन्मनः ॥ ९१ ॥

तथापि बहुभाग्यानां पुण्यानामपि पात्रिणी ।

दृष्टपूर्वं तु तद्वाक्यं न कदाचिद्वृथा भवेत् ॥ ९२ ॥

अथवाऽत्मप्रयासेन कृच्छ्राद्यल्लभते धनम् ।

तदेव तिष्ठति चिरमन्यद्गच्छति कालतः ॥ ९३ ॥

स्वयमागतवित्तं तु धर्मार्थे विनियोजयेत् ।

कुरुष्व तेन तस्मात्त्वं वापीकूपादिकाः शुभाः ॥ ९४ ॥

Long ago, there was a thief named Vajra in the holy city of Kanchipuram. The people of that beautiful city were rich, happy, healthy and compassionate. Vajra used to steal small amounts of money from the houses of the rich, and in no time amassed a large quantity of wealth. As the wealth accumulated considerably, he wanted to hide it safely and went to the nearby forest to do so. In a dense part of the forest, he dug a deep pit and secured the money therein. He then went in search of a boulder to cover the pit. Meanwhile, a hunter named Veeradatta was observing all this, hiding nearby. He took a tenth of the hidden wealth and went back to his home. Vajra returned with a boulder after some time. Unaware of the hunter's act, he covered the pit with the boulder and went back to the city to steal some more money. The hunter returned home and announced happily to his wife, “ Dear! I found this money in the forest when I went there to fell trees. Take it!”. The wife accepted it and stored it in a safe place inside their home. She then thought for a while and said, “ A Brahmin who visited my parents home regularly, saw me and predicted that I would become rich very soon. He also said, 'If this girl had been born in the house of a Brahmana, Vaishya or a Kshatriya, she would become a queen. But owing to sage Valmiki's curse, Sri Lakshmi, the goddess of wealth does not stay for a long time with hunters, actors and Shoodras. Even then, this maiden will obtain riches and religious merits'. The words of an experienced man like him will never be rendered false. Only hard-earned money is durable. Wealth obtained by any other means will be lost in the course of time. Hence, this unexpected and unearned wealth should be used for charity. So use it to construct wells, ponds and dams”.

इति तद्वचनं श्रुत्वा भाविभाग्यप्रचोदितः ।

बहूदकयुतं देशं तत्र तत्र व्यलोकयत् ॥ ९५ ॥

निर्ममेऽथ महेन्द्रस्य प्राग्भागे विमलोदकम् ।
सुबहुद्रव्यसम्साध्यं तटाकं चाऽक्षयोदकम् ॥ ९६ ॥
दत्तेषु कर्मकारिभ्यो निखिलेषु धनेषु च ।
असम्पूर्णं तु तत्कर्म दृष्ट्वा चिन्ताकुलोऽभवत् ॥ ९७ ॥
तं चोरं वज्रनामानमज्ञातोऽनुचराम्यहम् ।
तेनैव बहुधाक्षिप्तं धनं भूरि महीतले ।
स्तोकं स्तोकं हरिष्यामि तत्र तत्र धनं बहु ॥ ९८ ॥
इति निश्चित्य मनसा तेनाज्ञातस्तमन्वगात् ।
तथैवाहृत्य तद्द्रव्यं तेन सेतुमपूरयत् ॥ ९९ ॥
मध्ये जलं कृतं तेन प्रासादमपि शार्ङ्गिणः ॥ १०० ॥
तत्तटाकमभूद्दिव्यं अशोषितजलं महत् ।
सेतुमध्ये चकाराग्र्यं शङ्करायतनं महत् ॥ १०१ ॥
काननं च क्शयं नीतं बहुसत्वसमाकुलम् ।
तेनाग्र्याणि महार्हाणि क्षेत्राण्यपि चकार सः ॥ १०२ ॥
देवताभ्यो द्विजेभ्यश्च प्रदत्तानि विभज्य च ।
ब्राह्मणाम्श्च समामन्त्र्य देवरातमुखान् बहून् ।
सन्तोष्य वस्त्रहेमाद्यैरिदं वचनमब्रवीत् ॥ १०३ ॥
क्व वाऽहं वीरदत्ताख्यः किरातः काष्ठविक्रयी ।
क्व वा महासेतुबन्धः क्व देवालयकल्पना ॥ १०४ ॥

क्व वा क्षेत्राणि क्लृप्तानि ब्रह्माणायतनानि च ।

कृपयैव कृतं सर्वं भवतां भूसुरोत्तमाः ॥ १०५ ॥

प्रतिगृह्य भवन्तो मे क्शेत्राण्यायतनानि च ।

कृतार्थं कुरुत क्षिप्रं मादृशां हि गतिर्द्विजाः ॥ १०६ ॥

प्रतिगृह्य तथैवेतद्देवरातमुखा द्विजाः ।

द्विजवर्मेति नामास्मै तस्यै शीलवतीति च ।

चक्रुः सन्तुष्टमनसो महात्मानो महौजसः ॥ १०७ ॥

तेषां सम्रक्षणार्थाय बन्धुभिः सहितो वशी ।

तत्रैव वसतिं चक्रे मुदितो भार्यया सह ॥ १०८ ॥

पुरोहिताभिधानेन देवारातपुरन्त्विति ।

नाम चक्रे पुरस्याऽस्य तोषयन्निखिलान् द्विजान् ॥ १०९ ॥

Guided by his wife and his own fortune, Veeradatta decided to utilize the money for charity. He started searching here and there for a place with abundant water resource. He found such a place in the east of Mahendra hill and started to construct a large water tank there. When the construction was halfway, the money was exhausted. Hence Veeradatta started spying like a detective to find out the several places at which the thief Vajra was hiding the stolen wealth. Without causing any doubt to the thief, the hunter used to take out money little by little from the pits and continued the construction without interruption. In the center of the tank, he constructed a temple dedicated to Lord Vishnu, surrounded on all sides by water. The water tank that he constructed was filled with pure, unpolluted water. Near the dam of the water tank, he also built a large Shiva temple. He converted the forests in that region, which were filled with wild animals, into valuable plots. He distributed those plots equally among the gods (i.e. for religious services associated with the temples) and earned Brahmanas like Devaraata. Having pleased them with his noble deeds, the hunter said, “Where is the relation between the hunter Veeradatta, who sold firewood to live and mighty deeds like construction of dams and temples? All this has become possible solely by your grace. Please accept these gifts and bless me. You are my sole refuge”. Extremely happy with his humble words, the learned Brahmanas accepted the gifts and gave the titles “Dvijavarma” and “Shilavati” to the

hunter and his wife. These titles eventually became their names in vogue. Some time later, the hunter planned and constructed a city. Instead of giving it his own name, the hunter named it as “Devaraatapura”, as a mark of respect to his guru Devaraata. He lived there happily along with his wife, family and friends.

ततः कालवशं प्राप्तो द्विजवर्माऽङ्गनासखः ।

यमस्य ब्रह्मणो विष्णोर्दूता रुद्रस्य चागताः ॥ ११० ॥

अन्योन्यमभवत्तेषां युद्धं देवासुरोपमम् ।

अत्रान्तरे समागत्य नारदो वाक्यमब्रवीत् ।

मा कुर्वन्तु मिथो युद्धं शृण्वन्तु वचनं मम ॥ १११ ॥

अयं किरातश्चौरेण सेतुबन्धं पुराऽकरोत् ॥ ११२ ॥

वायुभूतश्चरेदेको यावद्द्रव्यवतो मृतिः ।

स बहुभ्योऽहरद्द्रव्यं तेषां यावत्तथा मृतिः ॥ ११३ ॥

गतेष्वखिलदूतेषु श्रुत्वा नारद भाषितम् ।

चचार द्वादशाब्दं तु वायुभूतोऽन्तरिक्षगः ॥ ११४ ॥

भार्यां तस्याऽह स मुनिस्तव दोषो न किञ्चन ।

त्वया कृतेन पुण्येन ब्रह्मलोकमितो व्रज ॥ ११५ ॥

वायुभूतं पतिं दृष्ट्वा नेच्छन्ती ब्रह्ममन्दिरम् ।

निर्वेदं परमापन्ना मुनिमेनमभाषत ॥ ११६ ॥

अहं विना पतिं देव न गच्छेयं पितामहम् ।

इह स्थास्ये पतिर्यावत्स्वदेहं लभते पुनः ॥ ११७ ॥

ततस्तु या गतिस्तस्त्य तामेवानुचराम्यहम् ।

परिहारोऽथवा किन्तु मया कार्यं तु तेन वा ॥ ११८ ॥

इति तस्याः वचं श्रुत्वा प्रीतः प्राह तपोधनः ।

भोगार्थकं शरीरं तु पत्युः कर्मकरं तव ।

मम प्रभावाद्भविता परिहारं वदामि च ॥ ११९ ॥

In course of time, both the hunter and his wife died at the same time. The messengers of Yama (The God of death and the Lord of Hell), and also of Brahma, Shiva and Vishnu arrived to take away the Jivas (the subtle form of life of the dead). Their debate as to who can take the Jivas could not be settled. This almost led to a war-like situation. At that time, the sage Narada arrived there. He asked the three groups of messengers to stop the arguments and revealed another aspect of the code of righteousness thus, "The hunter has performed the deeds of merit (Punya) like charities, with stolen money. Hence as per the rules of Dharma, he must move about in the form of a lone ghost until the death of all the owners of the stolen wealth ". Satisfied by Narada's explanation, all the messengers returned to their respective abodes. Then, Veradatta roamed aimlessly as a ghost in the skies, for a period of twelve years. The sage then addressed the hunter's wife thus, "Mother! There is no sin committed by you. You have earned youself, by your deeds, the abode of Brahma - Brahma Loka". She looked at her husband, who was in the sorry state of a ghost and replied, "O sire! I will not desert my husband in this condition and go to Brahma Loka. Please tell me the what can be done my me to unburden my husband of his sins?" Pleased with her chastisity and fidelity, the sage replied, " O lady! If you want to relieve your husband of his present state, you should perform a penance".

निराहारा माहातिर्थे स्नात्वा नित्यं हि साम्बकम् ।

पूजयित्वा शिवं भक्त्या भस्मोद्धूलितविग्रहम् ।

ध्यात्वा हृदि महेशानं शतरुद्रमनुं जपेत् ॥ १२० ॥

ब्रह्महा मुच्यते पापैरष्टोत्तर सहस्रतः ।

पापैरन्यैश्च सकलैर्मुच्यते नात्र सम्शयः ॥ १२१ ॥

इत्यादिश्य ददौ तस्यै रुद्राध्यायं तपोधनः ।

अनुगृह्येति तां नारीं तत्रैवान्तरधीयत ॥ १२२ ॥

भर्तुः प्रियार्थे सङ्कल्प्य जजाप परमं मनुम् ।

विमुक्तः स्तेयदोषेण पूर्वदेहमवाप सः ॥ १२३ ॥

ततो वज्राभिदश्चोरः कालधर्ममुपागतः ।

अन्ये तद्द्रव्यवन्तोऽपि कालधर्ममुपागताः ॥ १२४ ॥

यमस्तु तान्समाहूय वाक्यमेतदुवाच ह ।

भवद्भिस्तु कृतं पापं दैवात्सुकृतमप्यभूत् ।

किमिच्छथ फलं भोक्तुं दुष्कृतस्य शुभस्य वा ॥ १२५ ॥

इति तस्य वचः श्रुत्वा प्रोचुर्वज्रादिकास्ततः ।

सुकृतस्य फलं त्वादौ पश्चात्पापस्य भुज्यते ॥ १२६ ॥

पुनराह यमो यूयं पुत्रमित्रकलत्रकैः ।

एतस्यैव बलात्सर्वे त्रिदिवं गच्छत द्रुतम् ॥ १२७ ॥

तेऽधिरुह्य विमानानि द्विजवर्माणमाश्रिताः ।

यथोचितफलोपेतास्त्रिदिवं जग्मुरञ्जसा ॥ १२८ ॥

द्विजवर्माखिलान् लोकानतीत्य प्रमदासखः ।

गाणापत्यमनुप्राप्य कैलासेऽद्यापि मोदते ॥ १२९ ॥

“ Keeping a strict fast, you should take bath in Ganga and worship Lord Paramashiva and Mother Bhavani. Fixing your mind on him, you should devoutly chant the Shatarudriya Mahamantra. By chanting this Mahamantra a thousand and eight times, even the sin of Brahmahatya will be destroyed”. The sage initiated the lady into the norms of Shatarudriya Mahamantra and vanished. Shilavathi, with an intention of freeing her husband from all his sins, chanted the powerful mantra with utmost devotion. As a result, the hunter got rid of all his sins and attained his original form. Meanwhile, the thief Vajra and the persons from whom he stole the money died. All the Jivas reached the Hell, the abode of Yama, the god of death. He asked all of them to assemble and said,

"You have all committed sins. But by the grace of god, you have also earned merits. Though you did not intend to do the acts of Punya (merit), they were performed with your money. Hence I ask you whether you choose to experience either the effect of Punya (merit) or Papa (sin) in the first instance". They replied in chorus, "We opt to experience the effect of merit first. We shall then experience the effect of our sins". Yama then asked them to go and enjoy the fruits of the Punya that they had earned, accompanied by their family and friends. All of them sought the company of Dwijavarma and went to the heavenly abode with him. Dwijavarma however, went beyond all the lower heavens and attained Ganapatya (became Shiva's attendant) along with his virtous wife. He still resides in Kailasa, serving the great Lord". Brihaspati thus completed narrating the story of the Dwijavarma.

इन्द्र उवाच

तारतम्यविभागं च कथयस्व महामते ।

सेतुबन्धादिकानां च पुण्यानां पुण्यवर्धनम् ॥ १३० ॥

बृहस्पतिरुवाच

पुण्यस्यार्धफलं प्राप द्विजवर्मा महायशाः ।

वज्रः प्राप तदर्धं तु तदर्धेन युताः परे ॥ १३१ ॥

मनोवाक्काय चेष्टाभिश्चतुर्धा क्रियते क्रिया ।

विनश्येत्तेन तेनैव कृतैस्तत्परिहारकैः ॥ १३२ ॥

इन्द्र उवाच

आसवस्य तु किं रूपं को दोषः कश्च वा गुणः ।

अन्नं दोषकरं किं तु तन्मे विस्तरतो वद ॥ १३३ ॥

Indra now had a doubt about how the merit earned from the construction of the reservoir was distributed among the hunter, thief and the others. Brihaspati replied, “ O Indra! The hunter earned a half of the merit; the thief one-fourth and the others shared the remaining one-fourth. Any sin occurs through the mind, speech, body and its action. Its atonement is also possible through these agencies only”. Indra now questioned his guru, “Lord! What are the characteristics of liquor? What are its merits and demerits? What are the eatables that cause sin on consumption? Please discuss these topics in detail”.

बृहस्पतिरुवाच

पैष्टिकं तालजं कैरं माधूकं गुडसम्भवम्।

क्रमान्न्यूनतरं पापं तदर्धार्धतरस्तथा ॥ १३४ ॥

वर्ज्यमाद्यं सदा सर्वैराद्ययुग्मं नृपस्त्यजेत्।

तृतीयमपि वैश्यस्तु शूद्रोऽप्याद्यद्वयं तथा ॥ १३५ ॥

तृतीयादि त्रिवर्णानामासवं पेयमुच्यते।

स्त्रीणामपि तृतीयादि पेयं स्याद्ब्राह्मणीं विना ॥ १३६ ॥

पतिहीना च कन्या च त्यजेदृतुमती तथा ॥ १३७ ॥

अभर्त्र्यसन्निधौ नारी मद्यं पिबति लोलुपा।

उन्मादिनीति सा ख्याता तां त्यजेदन्त्यजामिव ॥ १३८ ॥

दशाष्टषट्चतस्रस्तु द्विजातीनामघं भवेत्।

स्त्रीणामपि तदर्धं स्यात्पादं स्याद्भर्तृसङ्गमे ॥ १३९ ॥

मद्यं पीत्वा द्विजो मोहात्कृच्छ्रं चान्द्रायणं चरेत्।

जपेच्चायुतगायत्रीं जातवेदसमेव वा।

अम्बिकाहृदयं वापि जपेच्छुद्धो भवेन्नरः ॥ १४० ॥

क्षत्रियादि त्रिवर्णानां द्विजादर्धार्धतः क्रमात्।

स्त्रीणामर्धार्धक्लृप्तिः स्यात्कारयेद्वा द्विजैरपि ॥ १४१ ॥

अन्तर्जले सहस्रं वा जपेच्छुद्धिमवाप्नुयात् ॥ १४२ ॥

लक्ष्मीः सरस्वती गौरी चण्डिका त्रिपुराम्बिका ।

भैरवो भैरवी काली महाशास्ता च मातरः ।

अन्याश्च शक्तयस्तासां पूजने मधु शस्यते ॥ १४३ ॥

ब्राह्मणस्तु विना तेन यजेद्वेदान्तपारगः ।

इतरे मधुना देवीमर्चयेयुः फलार्थिनः ॥ १४४ ॥

तन्निवेदितमश्नन्तस्तदनन्यास्तदात्मकाः ।

तासां प्रभावाद्गच्छन्ति निर्लेपास्ते परां गतिम् ॥ १४५ ॥

कृतस्याखिलपापस्य ज्ञानतोऽज्ञानतोपि वा ।

प्रायश्चित्तमिदं प्रोक्तं पराशक्तेः पदस्मृतिः ॥ १४६ ॥

अनभ्यर्च्य परां शक्तिं पिबेन्मद्यं तु योऽधमः ।

रौरवे नरकेऽब्दाम्स्तु निवसेद्बिन्दुसङ्ख्यया ।

भोगेच्छया तु यो मद्यं पिबते वृषलाधमः ॥ १४७ ॥

द्विजो मोहान्नतु पिबेल्लोभाद्वा कामतोऽपि वा ।

प्रायश्चित्तं नैव वाच्यं शिलाग्निपतनादृते ॥ १४८ ॥

अनुग्रहाच्च महतामनुतापाच्च कर्मणः ।

अर्चनाच्च पराशक्तेर्यमैश्च नियमैरपि ॥ १४९ ॥

चान्द्रायणेन कृच्छ्रेण दिनसङ्ख्याकृतेन च ।

शुद्ध्यते ब्राह्मणो दोषाद्द्विगुणाद्बुद्धिपूर्वतः ॥ १५० ॥

॥ श्री ब्रह्माण्डपुराणे उत्तरखण्डे हयग्रीवागस्त्यसम्वादे श्री ललितोपाख्याने द्वितीयः ॥

॥ बालार्कमण्डलाभासां चतुर्बाहुं त्रिलोचनाम् ।
पाशाङ्कुशधनुर्बाणान् धारयन्तीं शिवां भजे ॥ ॐ ऐं ह्रीं श्रीं साङ्गायै सायुधायै सवाहनायै सपरिवारायै सर्वदेवतास्वरूपिण्यै श्रीललितामहात्रिपुरसुन्दर्यै परब्रह्मणे नमः ॥

Liquor is of five types: made of flour, palm leaf, coconut, grape and jaggery. Consumption of the first causes the greatest sin and the last causes the least. Men of all castes and creeds should give up the first form of liquor, made of flour. The king should give up the first two varieties. The Vysya should never consume the third variety and the Shoodra should give up the first three varieties. Brahmins, Vysyas and Kshatriyas and so also the ladies, (with the exception of Brahmin ladies) can consume the last three varieties of liquor. A lady should not consume liquor in the absence of her husband. By drinking these varieties of liquor, a person belonging to the Brahmana Varna earns ten, eight, six and four times the actual sin (depending on the variety of the liquor). A lady earns only half of the actual sin by drinking liquor and just one-fourth, if she drinks along with her husband. If a Brahmana drinks liquor unknowingly, he may undergo one of the following atonements: performing Vratas like Kriccha or Chaandraayana, chanting the Gayathri mantra ten thousand times, chanting the Atidurga Mahamantra ten thousand times or chanting Ambika Hridaya. This will purify the person of his sin. A Kshatriya, Vysya and Shoodra should chant these mantras five-thousand, two-thousand five hundred and one-thousand and two fifty times respectively, to purify themselves. The women and Shoodras may get the Japa performed by Brahmins on their behalf. Chanting these mantras a thousand times in water bestows purification from all sins. The usage of liquor is recommended for the worship of Lakshmi, Saraswati, Gauri, Chandika, Tripurambika, Bhairava, Bhairavi, Kali, Mahashaasta (Ayyappa) and the seven Matrikas. A Brahmana well versed in the Vedas and the Upanishads should worship these deities without using liquor. Others may use liquor to obtain the gratification of their desires. These people should offer the liquor to the deity, fix their Self in the deity, and then consume the liquor as Prasadam. This will save them from the sin of drinking liquor, and they will attain liberation by the grace of their beloved deity. The remembrance of the lotus feet of

Parashakti is the sole means of getting rid of all sins committed knowingly or unknowingly. A person, who drinks wine without worshipping or offering it to Sridevi, is considered as the worst of the Shoodras. He will reside in a hell called Raurava, as many years as the number of drops of wine consumed by him. No Brahmana should ever consume liquor, overcome with desire, attachment or greed. If so, the only atonement is to jump down a mountain or into a blazing fire. If a Brahmana consumes wine unknowingly, he can purify himself of the resulting sin by the grace of great men, repentance, worship of Parashakti, following Yamas and Niyamas and by the performance of Vratas like Kriccha and Chandrayana. If he drinks wine knowingly, the atonement prescribed is twice of what was previously described.

## ॥ अथ तृतियोऽध्यायः ॥

ध्यानम्

पुण्यैः पापैस्समेताः सुरपदममरं यान्ति लोकहि याम्यम्

प्राज्ञा मूढाः क्रमाद्वै पशुपतिचरणध्यानभक्त्या विनैव ।

शम्भोः शक्तेः परायाः परतरविभवा भक्तिभाजः प्रयान्ति

यस्मादेवं ततोऽहं परशिव शिवया सुन्दरेशं भजे त्वाम् ॥

[ अगम्यागमन तत्प्रायश्चित्तादि विषये महेन्द्रस्य प्रश्नः - अभोज्य वस्तुविचारः ]

ॐ ऐं ह्रीं श्रीं

इन्द्र उवाच

अगम्यागमनं किं वा को दोषः का च निष्कृतिः ।

एतन्मे मुनिशार्दूल विस्तराद्वक्तुमर्हसि ॥ १ ॥

बृहस्पतिरुवाच

अगम्यागमनं नाम मातृष्वसृगुरुस्त्रियः।

मातुलस्य प्रिया चेति गत्वेमा नास्ति निष्कृतिः॥ २॥

मातृसङ्गे तु यदघं तदेव स्वसृसङ्गमे।

गुरुस्त्रीसङ्गमे तद्वद्गुरवो बहवः स्मृताः॥ ३॥

ब्रह्मोपदेशमारभ्य यावद्वेदान्तदर्शनम्।

एकेन शिक्ष्यते येन स महागुरुरुच्यते॥ ४॥

ब्रह्मोपदेशमेकत्र वेदशास्त्राण्यथैकतः।

आचार्यः स तु विज्ञेयः तथाऽनेकास्तु देशिकाः॥ ५॥

गुरोरात्मान्तमेव स्यादाचार्यस्य प्रियागमे।

द्वादशाब्दं चरेत्कृच्छ्रं एकैते तु षडब्दतः॥ ६॥

मातुलस्य प्रियां गत्वा षडब्दं कृच्छ्रमाचरेत्॥ ७॥

ब्राह्मणस्तु सजातीयां प्रमदां यदि गच्छति।

त्रिरात्रोपोषितः शुद्धः प्राणायामशतं चरेत्॥ ८॥

कुलटां तु सजातीयां द्विरात्राच्छुद्धिमृच्छति।

पञ्चाहात् क्षत्रियां गत्वा सप्ताहाद्वैश्यजामपि॥ ९॥

चक्री किरात कैवर्त कर्मकारादियोषितः।

शुद्धः स्याद्द्वादशाहेन पराशक्त्यर्चनेन च॥ १०॥

अन्त्यजां ब्राह्मणो गत्वा प्रमादादब्दतः शुचिः ॥ ११ ॥

देवदासी ब्रह्मदासी स्वदासी शूद्रदासिका ।

दास्यश्चतुर्विधाः प्रोक्ता द्वे चान्ये क्शात्रियासमे ॥ १२ ॥

अन्या वैश्याङ्गना तुल्या तदन्या हीनजातिवत् ।

आत्मदासीं द्विजो गच्छेदुक्तार्धं दोषमाप्नुयात् ॥ १३ ॥

स्वस्त्रियं पुष्पिणीं गत्वा प्राजापत्यं चरेद्व्रतम् ।

द्विगुणेन परां नारीं चतुर्भिः क्षत्रियाङ्गनाम् ॥ १४ ॥

अष्टभिर्वैश्यनारीं च शूद्रां षोडशभिस्तथा ।

द्वात्रिम्शता सङ्करजां वेश्यां शूद्रामिवाचरेत् ।

प्रायश्चित्तं चरेदेवं नो चेत्स ब्राह्मणाधमः ॥ १५ ॥

रजस्वलां तु यो भार्यां मोहतो गन्तुमिच्छति ।

स्नात्वान्यवस्त्रसम्युक्त उक्तार्धेनैव शुद्ध्यति ॥ १६ ॥

उपोष्य दिनमासायां स्नात्वा देवीं प्रपूजयेत् ।

तथैवान्याङ्गनां गत्वा तदुक्तार्धं समाचरेत् ॥ १७ ॥

Indra now questioned his guru regarding the sins originating from wrong copulation and the methods to get rid of the same. Brihaspati replied: “O Indra! By copulating with one's own mother, sister, Guru's wife and maternal uncle's wife, one earns the sin called 'Agamyaagamana'. This has no atonement at all! Copulating with one's sister or Guru's wife is the same as copulating with one's own mother. There are many gurus in one's life. If the same Guru trains a disciple beginning with Brahmopadesha upto Vedanta, such a Guru is called 'Mahaguru'. If different people teach these two, they will come to be known as 'Acharyas'. Thus there are different Gurus in one's life. There is no atonement to the sin caused by copulating with Mahaguru's wife. The only way is to end one's life through a sacrifice. If a person copulates with his Acharya's wife, he should perform Krichra for a period of twelve years. In case of copulation with the wives of other

teachers, Krichra should be performed for a duration of six years, for each of the sins committed. The same holds for copulation with uncle's wife. If a Brahmana copulates with a lady of his own caste, he should keep fast for three days and perform one hundred Pranayamas. If he copulates with an unchaste woman of his own caste, he should keep a two-day fast. In case of copulation with Kshatriya and Vaishya ladies, purification is possible by fasting for five and seven days respectively. If he copulates with a lady belonging to the caste of a potter, hunter, fisherman, cobbler etc., he should fast for twelve days and worship Parashakti to get rid of the sin. If a Brahmana copulates with a lady belonging to another caste unknowingly, he has to perform Krichra and other Niyamas for a period of one year. Dasis (maid servants or female slaves) are of four types: Devadasi, Brahmadasi, Swadasi and Shoodradasi. Among these, the first two are considered to be equivalent to a lady belonging to the caste of Kshatriyas. The third is similar to a Vysya lady and the fourth is like a lady belonging to the caste of Shoodras. If a Brahmana copulates with his own servant (Atmadasi), he earns half of the sin described before. If a man copulates with his menstruating wife, he should perform Praajaapatya Vrata. If the same act is committed with a Brahmin lady other than one's wife, a Kshatriya woman, a Vysya woman, Shoodra lady, a lady born of an unlawful inter-caste marriage, the atonement prescribed will be doubled in each of the cases. If such an atonement is not performed, he is unfit to be called a Brahmana any more. If one copulates with one's menstruating wife unknowingly, he should take bath, wear clean clothes and undergo half of the atonement prescribed above. He should fast till evening and then worship Parashakti. This will free him of his sin. For the same sin committed with a lady other than one's own wife, half of the prescribed atonement should be undergone.

पित्रोरनुज्ञया या कन्यां यो गच्छेद्विधिना विना ।

त्रिरात्रोपोषणाच्छुद्धिस्तामेवोद्वाहयेत्ततः ॥ १८ ॥

कन्यागन्ता तु योऽन्यस्मै दत्तां पश्चात्तु गच्छति ।

पित्रोरनुज्ञया सार्धं त्रिदिनेन विशुद्ध्यति ॥ १९ ॥

ज्ञातः पितृभ्यां यो मासं कन्याभावे तु गच्छति ।

अन्योढां तां ततो गत्वा प्राणायामशतेन तु ॥ २० ॥

एकेन सङ्गतां ज्ञात्वायोऽन्यस्मै सम्प्रयच्छति ।

वृषलः स तु विज्ञेयः सर्वकर्मबहिष्कृतः ॥ २१ ॥

ज्ञातः पितृभ्यां यो गत्वा परोधां तद्विनाशने ।

विधवा जायते नेयं पूर्वगन्तारमाप्नुयात्॥ २२ ॥

अनुग्रहाद्द्विजातीनामुद्वाहविधिना ततः ।

तया कर्माणि कुर्वीत श्रौतस्मार्तादिकानि च ॥ २३ ॥

आदावुद्वाहिता वापि तद्विनाशेऽन्यसङ्गता ।

भोगैकसाधना सा तु न योग्याऽखिलकर्मसु ॥ २४ ॥

पिपीलिकान्तं ब्रह्माद्यं जगत्स्थावरजङ्गमम् ।

पञ्चभूतात्मकं प्रोक्तं चतुर्वासनयान्वितम्॥ २५ ॥

जन्माद्याहारमदन निद्राभीत्या च सर्वदा ।

आहारं न विना जन्तुराहारो मदनः स्मृतः ।

दुःसहो मदनस्तस्मात्सर्वेषां प्राणिनामपि ॥ २६ ॥

A man who copulates with an unmarried virgin, with the permission of his parents, should keep a three-day fast and purify himself. Then, he should marry the same girl. If a man continues to copulate with a girl who is now married to another man, he should fast for three days to get rid of the sin. If a man has sex with a married woman without the knowledge of his own parents, he should perform a hundred Pranayamas to purify himself. If a father or a guardian knows that his daughter loves a man and still he marries her off to another man, such a person is considered to be worse than a Shoodra. He should be banished from all social and religious activities. The entire world, both animate and inanimate, consisting of both the mighty Brahma and a miniature insect like an ant, is composed of the five great elements. The four false impressions that inhabit a creature right from its birth are: hunger, sleep, fear and sexual urge. The creatures cannot survive without food and neither can they without sexual gratification. Thus, sexual activity is seen as the 'food' of creatures. Overcoming sexual desire is extremely difficult for all beings.

पुन्नारीरूपवत्कृत्वा मदनेन स विष्वसृट् ।

प्रवृत्तिमकरोदादौ सृष्टिस्थितिलयात्मिकाम्॥ २७ ॥

तत्प्रवृत्त्या प्रवर्तन्ते तन्निवृत्त्याऽक्षयां गतिम् ।
प्रवृत्त्यापि तथा मुक्तिर्निवृत्त्या या समीरिता ।
तद्रहस्यं तथोपायं शृणु वक्ष्यामि साम्प्रतम् ॥ २८ ॥
सर्वात्मको वासुदेवः पुरुषस्तु पुरातनः ।
इयं हि मूलप्रकृतिर्लक्ष्मीः सर्वजगत्प्रसूः ॥ २९ ॥
पञ्चपञ्चात्मतृप्त्यर्थं मथनं क्रियते तराम् ।
एतन्मन्त्रानुभावाभ्यां मथनं क्रियते यदि ।
तावुभौ पुण्यकर्माणौ न दोषो विद्यते तयोः ॥ ३० ॥
इदं च शृणु देवेन्द्र रहस्यं परमं महत् ।
सर्वेषामेव पापानां यौगपद्येन नाशनम् ॥ ३१ ॥
भक्तिश्रद्धासमायुक्तः स्नात्वान्तर्जलसम्स्थितः ।
अष्टोत्तरसहस्रं तु जपेत्पञ्चदशाक्षरीम् ।
आराध्य च परां शक्तिं मुच्यते सर्वकिल्बिषैः ॥ ३२ ॥
तेन नश्यन्ति पापानि कल्पकोटिकृतान्यपि ।
सर्वापद्भ्यो विमुच्येत सर्वाभीष्टं च विन्दति ॥ ३३ ॥

इन्द्र उवाच
भगवन् सर्वधर्मज्ञ सर्वभूतहितेरत ।
सम्योगजस्य पापस्य विषेशं वक्तुमर्हसि ॥ ३४ ॥

बृहस्पतिरुवाच

सम्योगजं तु यत्पापं तच्चतुर्धा निगद्यते ।

कर्ता प्रधानं सहकृन्निमित्तोऽनुमतः क्रमात् ।

क्रमाद्दशाम्शतोऽघं स्याच्छुद्धिः पूर्वोक्तमार्गतः ॥ ३५ ॥

In the beginning of creation, Brahma created male and female forms and designed the mechanism of creation-preservation-destruction of the world, by means of Manmatha (the god of erotic desire). The behavior of all creatures is influenced by the habit of Kama (erotic desire). If this habit is destroyed, the beings attain the indestructible state of Moksha. However, the same Moksha can also be obtained without destroying this habit. I will tell you that secret now! 'Lord Narayana is the embodiment of all and is the first and the foremost. Sri Lakshmi, the mother of this entire creation, is the primordial nature. To satisfy this Atma composed of twenty-five Tatvas, we shall perform the sacrifice named copulation'. The repetition of this secret mantra during copulation earns the couple religious merit. They will be unaffected by the sin of copulation. Indra, I will now tell you the greatest of secrets, by which one can destroy all his sins at once. Having taken bath, one should recite the fifteen-lettered Srividya mantra in water, a thousand and eight times, with devotion and concentration. By doing this and worshipping Parashakti, he will be liberated from the negative effects of all sins. Sins committed in thousands of births will be destroyed all at once. All evils will be warded off and all desires will be attained. The sin resulting from copulation with a lady other than one's own wife affects four persons: the man involved in the act, the man who helps the former, the man who was responsible for the act and the one who permitted the act to take place. These sins can also be washed off by undergoing the previously described atonement.

मद्यं कलञ्जं निर्यासं छत्राकं गृजनं तथा ।

लशुनं च कलिङ्गं च महाकोशातकी तथा ॥ ३६ ॥

बिम्बी लिङ्गी कैरवं च हस्तिनी शिग्रुबिम्बिका ।

औदुम्बरं च वार्ताकं कतकं बिल्वमारिका ।

क्रमाद्दशगुणान्न्यूनमघमेषां विनिर्दिशेत् ॥ ३७ ॥

ब्रुवग्रामाङ्गवेश्याङ्गवेश्योपायनविक्रयी ।

सेवकः स्वपुरस्थश्च कुग्रामस्थोऽभिशस्तकः ॥ ३८ ॥

वैद्यो वैखानसः शैवो नारीजीवोऽन्नविक्रयी ।

शस्त्रजीवी परिव्राट् च वैदिकाचारनिन्दकः ॥ ३९ ॥

क्रमाद्दशगुणान्न्यूनमेषां पक्वोदने भवेत् ।

स्वतण्डुलं वा तैः क्लृप्तमुक्तार्धं पापमादिशेत् ॥ ४० ॥

ब्रह्मक्षत्रविशां चैव सच्छूद्राणां यदोदनम् ।

तैलपक्वमदृष्टं च भुन्जन् पादमघं भवेत् ॥ ४१ ॥

द्विजन्मदासीक्लृप्तं च तया दृष्टे तदर्धकम् ।

वेश्यायास्तु त्रिपादं स्यात्तया दृष्टे तदोदने ॥ ४२ ॥

Now I will tell you of sins resulting from consumption of undesirable foods. Liquor, exudation of trees or plants, mushroom, onion, garlic, watermelon, the vegetable of Koshataki tree, brinjal, the fruit of Bimba tree which, when ripe, is ruddy, the fruit of soap-nut tree (Shikakai), the fruit of Udambara tree, a pot herb called Shigru, a plant called Hastini used frequently in perfumeries, white lotus, wood-apple - these are unfit for consumption. Each of these generates sins ten times greater than the previous one. A man whose Kula and Gotra are unknown, the head of the village, the owner of a prostitution center, one who makes money by selling the materials given to prostitutes by their customers, one's own servant, resident of a small, poor and undeveloped village, a man accused of adultery, doctor, hermit or a person in the third Ashrama of Vanaprastha, a follower of Shaivism, a person who depends on a woman for living, one who sells food, one who uses arms for a living, Sanyasin, one who speaks ill of Vedic culture - eating the food cooked by these persons leads to a great sin. If a man eats his own rice, cooked by any of these persons, the resulting sin is half of the original one. One obtains half of the sin by consuming food that is cooked by one's maidservant or even food that is seen by her. By eating the food on which a prostitute has cast her glance, a Brahmana obtains three-fourth of the sin.

शूद्रवत्स्याच्च गोपान्नं विना गव्यचतुष्टयम् ।

तैलाज्यगुडसम्युक्तं पक्वं वेश्यान्न दुष्यति ॥ ४३ ॥
वेश्यावद्ब्राह्मणी भ्रष्टा तया दृष्टे न किञ्चन ।
ब्रुवस्यान्नं द्विजो भुक्त्वा प्राणायामशतं जपेत् ॥ ४४ ॥
अथवान्तर्जले जप्त्वा त्रिपदां वा त्रिवारकम् ।
इदं विष्णुस्त्र्यम्बकं वा तथैवान्तर्जले जपेत् ॥ ४५ ॥
स्त्रीभुक्त्वा तु ब्रुवस्यान्नमेकाद्यान्भोजयेद्द्विजान् ।
उपोष्य रजनीमेकां ततः पापाद्विशुद्ध्यति ॥ ४६ ॥
अथवा प्रोक्षयेदन्नमब्लिङ्गैः पावमानिकैः ।
अन्नसूक्तं जपित्वा तु भृगुर्वै वारुणीति च ।
ब्रह्मार्पणमिति श्लोकं जप्त्वा भुक्त्वा न दोषभाक् ॥ ४७ ॥
इदं विष्णुरिति मन्त्रेण सप्तवाराभिमन्त्रितम् ।
सोऽहम्भावेन तद्ध्यात्वा भुक्त्वा दोषैर्न लिप्यते ॥ ४८ ॥
अथवा शङ्करं ध्यायेज्जप्त्वा वै त्र्यम्बकं तथा ।
सोऽहम्भावेन तद्भुक्त्वा नान्नदोषैः प्रलिप्यते ॥ ४९ ॥
एवमुक्तप्रकारेण प्रायश्चित्तं समाचरेत् ।
इदं रहस्यं देवेन्द्र शृणुष्व वचनं मम ॥ ५० ॥
ध्यात्वा देवीं परां शक्तिं जप्त्वा पञ्चदशाक्षरीम् ।
तन्निवेदितबुद्ध्या तु योऽश्नाति प्रत्यहं द्विजः ॥ ५१ ॥
अ चास्य दोषजं किञ्चिन्न दारिद्र्यभयं तथा ।

न व्याधिजं भयं तस्य न च शत्रुभयं तथा ।

जपतो मुक्तिरेवास्य सदा सर्वत्र मङ्गलम् ॥ ५२ ॥

एतत्ते कथितं शक्र पापानामपि विस्तरम् ।

प्रायश्चित्तं तथा तेषां किमन्यच्छ्रोतुमिच्छति ॥ ५३ ॥

Other than milk, curds, butter and ghee, one should not consume other foodstuff cooked by cowherds. Anything other than these four items will be considered as 'Shoodraanna'. A Brahmin lady who has deviated from the path of dharma is no better than a prostitute. The food on which she has cast her glance should never be consumed. If a Brahmana eats food that is cooked by a man of unknown Kula and Gotra, he should perform a hundred Pranayamas. Otherwise, standing in water, he should chant the mantras - Gayathri, or 'Idam vishnuH….', or 'Tryambakam yajamahe…' - three times. A lady who has consumed Shoodraanna should offer food to one or many Brahmanas and keep a night's fast to purify herself. One should sprinkle drops of water on the food chanting Pavamaana Sukta and then chant Annasukta, the mantra 'Bhrigurvai vaaruniH….' and the Shloka 'Brahmaarpaban brahmahaviH…', before consuming food. By doing this, all sins originating from the consumption of undesirable foodstuff will be eliminated. One should chant the mantra 'Idam vishnuH ….' Seven times and meditate on Lord Mahavishnu as the self before eating food. This will eliminate all sins. Or else, one should chant the mantra 'Tryambakam ….' just once and meditate on Lord Mahadeva as one's own self. This also eliminates all sins. Now I will tell you a secret. A Brahmana who meditates on Parashakti, chants Panchadashi, offers the food to her and then eats food, considering it to be the Prasadam of Sridevi, such a person will never earn the sin of Abhakshya Bhakshana. Poverty, diseases or enemies will never affect him. The person who chants Panchadashi will definitely attain liberation and will see auspicious results everywhere.

॥ श्री ब्रह्माण्डपुराणे उत्तरखण्डे हयग्रीवागस्त्यसम्वादे श्री ललितोपाख्याने

तृतीयः ॥

॥ बालार्कमण्डलाभासां चतुर्बाहुं त्रिलोचनाम् ।

पाशाङ्कुशधनुर्बाणान् धारयन्तीं शिवां भजे ॥ ॐ ऐं ह्रीं श्रीं  साङ्गायै सायुधायै सवाहनायै सपरिवारायै सर्वदेवतास्वरूपिण्यै श्रीललितामहात्रिपुरसुन्दर्यै परब्रह्मणे नमः ॥

॥ अथ चतुर्थोऽध्यायः ॥

ध्यानम्

पापिष्ठान्नसुभक्शणैरपि तथा चान्याङ्गना सङ्गमैः
यत्पापं परिकीर्तितं तदखिलं यस्यैव शम्भोर्विभोः ।
देव्याश्चैव पदाम्बुजस्मरणतः पुण्यायते सन्ततम्
तस्मात्त्वां ललितासमेतमनघं श्रीसुन्दरेशं भजे ॥

[ महेन्द्रेण बृहस्पतिं प्रति निजदौर्भाग्य प्रतीकार प्रश्नः ]

ॐ ऐं ह्रीं श्रीं

इन्द्र उवाच

भगवन् सर्वधर्मज्ञ त्रिकालज्ञानवित्तम ।
दुष्कृतं च प्रतीकारं भवता सम्यगीरितं ॥ १ ॥
केन कर्मविपाकेन ममापदियमागता ।
प्रायश्चित्तं च किं तस्य वदस्व वदतां वर ॥ २ ॥

बृहस्पतिरुवाच

कश्यपस्य सुतो जज्ञे दित्यां दनुरिति स्मृतः ।

कन्या रूपवती नाम धात्रे तां प्रददौ पिता ॥ ३ ॥

तस्याः पुत्रस्ततो जातो विश्वरूपो महाद्युतिः ।

नारायणपरो नित्यं वेदवेदाङ्गपारगः ॥ ४ ॥

ततो दैत्येश्वरो वव्रे भृगुपुत्रं पुरोहितम् ।

भवानपि कृतो राज्ये देवानामपि वासवः ॥ ५ ॥

भवता सह देवैस्तु पौरोहित्यार्थमादरात् ।

प्रार्थितो विश्वरूपस्तु बभूव तपतां वरः ॥ ६ ॥

स्वस्त्रीयो दनवानां तु देवानां च पुरोहितः ।

नात्यर्थमकरोद्वैरं दैत्येष्वपि महातपाः ॥ ७ ॥

बभूवतुस्तुल्यबलौ तदा दैत्येन्द्रवासवौ ॥ ८ ॥

ततस्त्वं कुपितो राजन् स्वस्त्रीयं दानवेशितुः ।

हन्तुमिच्छन्नगाश्चाशु तपसः साधनं वनम् ॥ ९ ॥

तमासनस्थं मुनिभिस्त्रिशृङ्गमिव पर्वतम् ।

त्रयीमुखरदिग्भागं ब्रह्मानन्दैकनिष्ठितम् ॥ १० ॥

सर्वभूतहितं तं तु मत्वारेरनुकूलिनम् ।

शिराम्सि यौगपद्येन च्छिन्नान्यस्य त्वयैव तु ॥ ११ ॥

तेन पापेन सम्युक्तः पीडितश्च मुहुर्मुहुः ।

ततो मेरुगुहां गत्वा बह्वन्यब्दानि सम्स्थितः ॥ १२ ॥

Indra said, 'Revered Gurudeva! You explained well the characteristics of the various sins and their atonements. What is the sin committed by me that has brought about this misfortune on me? Also tell me the necessary atonement". Brihaspati then began narrating: " O Indra! Long ago, Diti, the wife of sage Kashyapa gave birth to a son by name Danu and a daughter named Rupavati. Danu is the predecessor of the race of Danavas (demons). Rupavati was married to Dhatru. She had a son named Vishwarupa. He was brilliant, well versed in Vedas and other scriptures and a great devotee of Lord Narayana. Seeing his capabilities, he was chosen as the royal priest by the king of the demons. Meanwhile, you became the Lord of the Devas. You went to Vishwarupa along with the other Devas and requested him to accept the post of the celestial priest (Deva Purohita). Vishwarupa accepted and became the royal priest of the Devas. But since he was the nephew of the demons, he did not cultivate enmity with the demons. He remained affectionate towards both the races - the celestials and the demons. Gradually, both you and the king of the demons became equally powerful. This made you angry and you felt that Vishwarupa was partial towards the demons. You decided to destroy the mountain peaks and forests in which he performed penance. That great sage was ever engrossed in chanting Vedas, immersed in the bliss of the supreme Brahman. He was compassionate towards all beings. One day, you suddenly chopped off all his three heads. You attained great misery and pain due to the sin of Brahmahatya (killing a Brahmana) and hid yourself in a cave in mount Meru for many years.

ततस्तस्य वधं श्रुत्वा धाता तु मुनिवाक्यतः ।

पुत्रशोकेन सन्तप्तस्त्वां शशाप रुषान्वितः ।

निःश्रीको भवतु क्षिप्रं मम शापेन वासवः ॥ १३ ॥

अनायकस्स्ततो देवा विषण्णा दैत्यपीडिताः ।

गत्वा तु ब्रह्मसदनं नत्वा तद्वृत्तमूचिरे ॥ १४ ॥

ततस्तु चिन्तयामास तदघस्य प्रतिक्रियाम् ।

तस्य प्रतिक्रियां वेत्तुं न शशाकात्मभूस्तदा ॥ १५ ॥

ततो देवैः परिवृतो नारायणमुपागमत् ।

नत्वा स्तुत्वा तु सर्वज्ञस्तद्वृत्तान्तं व्यजिज्ञपत् ॥ १६ ॥
विचिन्त्य सोऽपि बहुधा कृपया लोकनायकः ।
तदघं तु त्रिधा भित्वा त्रिषु स्थानेष्वथार्पयत् ।
स्त्रीषु भूम्यां च वृक्षेषु तेषामपि ददौ वरम् ॥ १७ ॥
सदा भर्तृसमायोगं पुत्रावाप्तिमृतुष्वपि ।
छिन्ने पुनर्भवत्वं च सर्वेषामपि शाखिनाम् ।
खातपूर्तिं धरण्याश्च प्रददौ मधुसूदनः ॥ १८ ॥
तेष्वघं प्रभभूवाशु रजोनिर्यासमूषरम् ॥ १६ ॥
निर्गतो गह्वरात्तस्मात्तदेन्द्रो देवनायकः ।
राज्यं श्रियं च सम्प्राप्तः प्रसादात्परमेष्ठिनः ॥ २० ॥
तेनैव सान्त्वितो धाता जगाद च जनार्दनम् ।
मम शापो वृथा न स्यादस्तु कालान्तरे हरे ॥ २१ ॥
भगवान्स्तद्वचः श्रुत्वा धातुस्त्वमिततेजसः ।
प्रहृष्टो भाविकार्यज्ञस्तूष्णीमेव तदा ययौ ॥ २२ ॥
एतावन्तमिमं कालं त्रिलोकीं पालयन् भवान् ।
ऐश्वर्यमदमत्तत्वात्कैलासाद्रिमपीडयत् ॥ २३ ॥
सर्वज्ञेन शिवेनाथ प्रेरितो भगवान्मुनिः ।
दुर्वासास्त्वन्मदभ्रम्शं कर्तुकामः शशाप ह ॥ २४ ॥
एकमेव फलं जातमुभयोः शापयोरपि ।

अधुना पश्य निःश्रीकं त्र्यैलोक्यं समजायत ॥ २५ ॥

न यज्ञाः सम्प्रवर्तन्ते न दानानि च वासव ।

न यमा नापि नियमा न तपाम्सि च कुत्रचित् ॥ २६ ॥

विप्राः सर्वेऽपि निःश्रीकाः लोभोपहतचेतसः ।

निःसत्वा धैर्यहीनाश्च नास्तिकाः प्रायशोऽभवन् ॥ २७ ॥

निरौषधिरसा भूमिर्निर्वीर्या जायतेतराम् ।

भास्करो धूसराकारश्चन्द्रमाः कान्तिवर्जितः ॥ २८ ॥

निस्तेजस्को हविर्भोक्ता मरुद्धूलिमयाकृतिः ।

न प्रसन्ना दिशां भागा नभो नैव च निर्मलम् ॥ २९ ॥

दुर्बला देवताः सर्वा विभान्त्यन्यादृशा इव ।

विनष्टप्रायमेवासीत्त्रैलोक्यं सचराचरम् ॥ ३० ।

Prajapati Dhatru came to know of his son's murder through Narada and cursed you in anger. As a result, you lost your kingdom and prosperity. The celestials were left without a leader. Taking advantage of this situation, the demons tortured the Devas. Distressed Devas went to Brahma and narrated this incident to him. Brahma was unable to come out with a solution to this problem. He then led the Devas to Lord Narayana and narrated the whole incident. The great Lord divided Indra's sin of Brahmahatya into three parts and distributed them equally among the women, the trees and the earth. As compensation, Lord Vishnu gave the power that the pits of earth could be filled up, the power that even the trees once cut off could revive and the power of women to beget children. It is this sin that we see in the three as menstrual fluid, gum and barren land. Thus, you were relieved of the sin and became prosperous again. Later, Prajapati Dhatru requested the Lord, “Bhagavan! Let not my curse go without any effect. In future, let it become true”. Narayana who knew the future well remained silent, expressing his assent. After you became prosperous, very soon your pride increased again. You began to trouble even the residents of Kailasa, the eternal abode of Lord Shiva. Observing your pride, Shiva sent sage Durvasa to you. That great sage cursed you to destroy your pride. Thus, both Dhatru's and Durvasa's curses have now become true. Because of your pride, all the three worlds have lost their luster. Sacrifices, charities and penances have come to a halt

everywhere. Brahmanas, filled with greed, have strayed away from the path of dharma and have become cowards and atheists. The earth has lost the capacity to sustain useful herbs. The sun and the moon have lost their brilliance. Fire has lost its brightness. The air is filled with dust. Sky is not clear any more. The Devas have become so weak that it is not possible to identify them as celestials. It seems as though the three worlds are on the verge of complete destruction”.

श्री हयग्रीव उवाच

इत्थं कथयतोरेव बृहस्पति महेन्द्रयोः।

मलकाद्या महादैत्या देवलोकं बबाधिरे॥ ३१॥

नन्दनोद्यानमखिलं चिच्छिदुर्बलगर्विताः।

उद्यानपालकान् सर्वान् आयुधैः समताडयन्॥ ३२॥

प्राकारमभिपाट्यैव प्रविश्य नगरान्तरम्।

मन्दिरस्थान् सुरान् सर्वानत्यर्थं पर्यपीडयन्॥ ३३॥

आजहुरप्सरो रत्नान्यशेषाणि मदोद्धताः।

ततो देवाः समस्ताश्च चक्रन्दुर्भृशबाधिताः॥ ३४॥

तादृशं घोषमाकर्ण्य वासवः प्रोज्झितासनः।

सर्वैरनुगतो देवैः पलायनपरोऽभवत्॥ ३५॥

ब्राह्मं धाम समभ्येत्य विषण्णवदनो वृषा।

यथावत्कथयामास निखिलं दैत्यचेष्टितम्॥ ३६॥

विधातापि तदाकर्ण्य सर्वदेवसमन्वितम्।

हतश्रीकं हरिहयमालोक्यैतदुवाच ह॥ ३७॥

इन्द्र त्वमखिलैर्देवैर्मुकुन्दं शरणं व्रज।

दैत्यारातिर्जगत्कर्ता स ते श्रेयो विधास्यति ॥ ३८ ॥

इत्युक्त्वा तेन सहितः स्वयं ब्रह्मा पितामहः ।

समस्तदेवसहितः क्षीरोदधिमुपाययौ ॥ ३९ ॥

अथ ब्रह्मादयो देवा भगवन्तं जनार्दनम् ।

तुष्टुवुर्वाग्भिरिष्टाभिः सर्वलोकमहेश्वरम् ॥ ४० ॥

अथ प्रसन्नो भगवान्वासुदेवः सनातनः ।

जगाद सकलान् देवान् जगद्रक्षणलम्पटः ॥ ४१ ॥

As the conversation between Indra and Brihaspati was going on, Malaka and other powerful demons attacked the city of the celestials. They destroyed the Nanadana garden and assaulted its attendants with weapons. They rushed into the city forcefully breaking it's barrier and began to torture the Devas in various ways. They looted the heavenly gems and kidnapped the celestial nymphs. Unable to bear this pain, the Devas began to scream loudly. Hearing the cries of the Devas, Indra gave up his throne and ran away with the Devas. He approached Lord Brahma and described the attack of the demons. Brahma, along with Indra and other Devas, went to Lord Narayana and praised him with Vedic hymns. Pleased with the hymns, the Lord of the three worlds gracefully addressed the Devas in the following way.

श्री भगवानुवाच

भवतां सम्विधास्यामि तेजसैवोपबृह्मणम् ।

यदुच्यते मयेदानीं युष्माभिस्तद्विधीयताम् ॥ ४२ ॥

ओषधिप्रवराः सर्वाः क्षिपत क्षीरसागरे ।

असुरैः सह सन्धाय तथा मे वचसेरिताः ॥ ४३ ॥

मन्थानं मन्दरं कृत्वा योक्त्रं कृत्वा च वासुकिम् ।

मयि स्थिते सहाये तु मथ्यताममृतं सुराः ॥ ४४ ॥

समस्तदानवाश्चापि वक्तव्याः सान्त्वपूर्वकम् ।

सामान्यमेव युष्माकमस्माकं च फलं त्विति ॥ ४५ ॥

मथ्यमाने तु दुग्धाब्धौ सम्यगुत्पद्यते सुधा ।

तद्पानाद्बलिनो यूयममर्त्याश्च भविष्यथ ॥ ४६ ॥

यथा दैत्यास्तु पीयूषं नैतत्प्राप्यन्ति किञ्चन ।

केवलं क्लेशवन्तश्च करिष्यामि तथाप्यहं ॥ ४७ ॥

इति श्रीवासुदेवेन कथिता निखिलाः सुराः ।

सन्धानं सकलैर्दैत्यैः कृतवन्तस्तपोधन ॥ ४८ ॥

नानाविधौषधिगणं समानीय सुरासुराः ।

क्षीराब्धिपयसि क्षिप्त्वा चन्द्रिकाधिकनिर्मले ॥ ४९ ॥

मन्थानं मन्दरं कृत्वा मथितुं परमामृतम् ॥ ५० ॥

वासुकेः पुच्छभागे तु सहिताः सर्वदेवताः ।

पूर्वभागे तु दैतेया नियुक्तास्तत्र शौरिणा ॥ ५१ ॥

बलवन्तोऽपि दैत्यास्तन्मुखोत्थविषपावकैः ।

निर्दग्धवपुषः सर्वे निस्तेजस्कास्तदाभवन् ॥ ५२ ॥

पुच्छभागे तु कर्षन्तो मुहुराप्यायिताः सुराः ।

अनुकूलेन वातेन कृष्णेन प्रेरितेन ते ॥ ५३ ॥

“ O Devas! I will tell you a way to get back your lost prosperity. Make compromise with the demons and with their help, throw all important herbs into the milky ocean. Using mount Mandara as the churning stick and Vasuki, the Lord of snakes as the rope, churn the milky ocean. You will obtain Amrita (nectar) as a result of this churning. By drinking

amrita, you will become powerful and deathless. I will take care to see that the demons do not get their share of amrita”. As per the lords' instructions, Indra Indra made reconciliation with the demons and taking their help, threw various herbs into the milky ocean. Using mount Mandara as the stick and Vasuki as the rope, they began to churn the ocean. Following the Lord's instructions, the Devas held the tail of Vasuki and the demons, it's head. Even though the demons very powerful, they were charred by the poisonous flames that emanated from Vasuki's mouth during the churning. The Devas, on the other hand, were comforted by the cool breeze that blew from Vasuki's tail.

आदिकूर्माकृतिः श्रीमान् मध्ये क्षीरपयोनिधेः ।

भ्रमतो मन्दराद्रेस्तु तस्याधिष्ठानतामगात् ॥ ५४ ॥

मध्ये च सर्वदेवानां रूपेणान्येन माधवः ।

चकर्ष वासुकिं वेगाद्दैत्यमध्ये परेण च ॥ ५५ ॥

ब्रह्मरूपेण तं शैलं उपर्याक्रान्तवान् हरिः ।

अप-रेण च देवर्षैः महता तेजसा मुहुः ॥ ५६ ॥

उपबृम्हितवान् देवान्येन ते बलशालिनः ।

उपबृम्हितवान्नागं सर्वशक्तिर्जनार्दनः ॥ ५७ ॥

मथ्यमाने ततस्तस्मिन् क्षीराब्धौ देवदानवैः ।

किमेतदिति सिद्धानां दिवि चिन्तयतां तदा ॥ ५८ ॥

उत्थिता वारुणी देवी मदालोलविलोचना ।

असुराणां पुरस्तात्सा वर्धमाना व्यतिष्ठत ॥ ५९ ॥

जगृहुर्नैव तां दैत्या असुराश्चाभवम्स्ततः ।

सुरा न विद्यते येषां त एवासुरशब्दिताः ॥ ६० ॥

अथ सा सर्वदेवानामग्रतः समतिष्ठत ।

जगृहुस्तां मुदा देवाः सूचिताः परमेष्ठिना ॥ ६१ ॥
सुराग्रहणतो ह्येते देवाः प्राप्ताः सुराभिदाम् ।
आविर्बभूव पुरतः सुरभिः सुरपूजिता ।
मुदं जग्मुस्तदा देवा दैतेयाश्च तपोधन ॥ ६२ ॥
मथ्यमाने पुनस्तस्मिन् क्षीराब्धौ देवदानवैः ।
अत्यर्थसुन्दराकारा धीराश्चाप्सरसां गणाः ।
आविर्भूताश्च देवर्षे सर्वलोकमनोहराः ॥ ६३ ॥
मथ्यमाने ततो भूयः पारिजातो महाद्रुमः ।
आविरासीत्सगन्धेन परितो वासयन् जगत् ॥ ६४ ॥
ततः शीताम्शुरुदभूत्तं जग्राह महेश्वरः ।
विषजातं तदुत्पन्नं जगृहुर्नागजातयः ॥ ६५ ॥
कौस्तुभाख्यं महारत्नमाददे तज्जनार्दनः ।
ततः स्वपत्रगन्धेन मदयन्ती महौषधिः ।
विजया नाम सम्जज्ञे भैरवस्तमुपाददे ॥ ६६ ॥
ततो दिव्याम्बरधरो देवो धन्वतरिः स्वयम् ।
समुत्थितः करे बिभ्रदमृताढ्यं कमण्डलुम् ॥ ६७ ॥
ततः प्रहृष्टमनसो देवा दैत्याश्च सर्वशः ।
मुनयश्चाऽभवम्स्तुष्टास्तदानीं तपसां निधे ॥ ६९ ॥
ततो विकसिताम्भोजवासिनी वरदायिनी ।

उत्थिता पद्महस्ता श्रीस्तस्मात् क्षीरमहार्णवात्॥ ७० ॥

अथ तां मुनयः सर्वे श्रीसूक्तेन श्रियं पराम्।

तुष्टुवुस्तुष्टहृदया गन्धर्वाश्च जगुः पुरः॥ ७१ ॥

विश्वाची प्रमुखाः सर्वे ननृतुश्चाप्सरोगणाः।

गङ्गाद्याः पुण्यनद्यश्च स्नानार्थमुपतस्थिरे॥ ७२ ॥

अष्टौ दिग्दन्तिनश्चैव हेमपात्रस्थितं जलम्।

आदाय स्नापायान्चक्रुस्तां श्रियं पद्मवासिनीम्॥ ७३ ॥

पद्ममालां ददौ तस्यै मूर्तिमान् क्षीरसागरः॥ ७४ ॥

भूषणानि च दिव्यानि विश्वकर्मा समर्पयत्॥ ७५ ॥

दिव्यमालाम्बरधरा दिव्यभूषणभूषिता।

ययौ वक्षःस्थलं विष्णोः सर्वेषां पश्यतां रमा॥ ७६ ॥

पश्यति स्म च सा देवी विष्णु वक्षःस्थलालया।

देवान् दयार्द्रया दृष्ट्या सर्वलोकमहेश्वरी॥ ७७ ॥

Meanwhile, Lord Narayana assumed the form of a giant tortoise and supported the Mandara mountain on his back. Assuming different forms, he joined both the Devas and the demons and helped them in churning the ocean. He was also present in the form of Brahma on the peak of mount Mandara. He also encouraged the Devas in various ways and granted them the stamina to churn the ocean. He also made the snake Vasuki very powerful. All the heavenly beings gazed at this act in total wonder. Then goddess Varuni, whose eyes were shaky due to intoxication, emerged from the ocean. Because the demons did not accept Varuni (also known as Suraa), they came to be known as the 'Asuras'. The Devas accepted her as per the instructions of Lord Brahma. As a result, they came to be known as the 'Suras'. The holy cow 'Surabhi' then emerged from the ocean. Beautiful maidens called the 'Apsaras' emerged from the ocean next. Then came the great tree called 'Parijata' that filled with the entire world with its beautiful fragrance. Moon emerged from the ocean next and Lord Shiva accepted him as an ornament. The family of

snakes accepted the poison that emerged next. Then came an intoxicating herb called 'Vijayaa', which was accepted by Bhairava. The great gem named 'Kaustubha' that appeared from the ocean was accepted as an ornament by Lord Mahavishnu. As the churning continued, Lord Dhanvantari appeared with a nectar-filled pot in his hand. All the celestials, demons and sages were filled with delight at the sight of Dhanvantari. Finally, goddess Mahalakshmi emerged from the milky ocean, seated on a red lotus and sporting two lotuses in her hands. All the great sages praised her by singing the Vedic hymn called 'Srisukta'. The Gandharvas sang melodiously in front of her. Vishwaachi and other celestial nymphs danced before her. The eight elephants (that support the earth on the eight directions) performed Abhisheka to Sridevi with water from golden vessels. The ocean assumed a divine form and appeared before Sridevi, to gift her a beautiful garland of lotuses. Vishwakarma, the celestial sculptor offered her jewels of unmatched beauty. Sri Mahalakshmi then proceeded to wed Lord Narayana and made his heart, her residence. She looked at the Devas with sympathy and showered grace on them.

॥ श्री ब्रह्माण्डपुराणे उत्तरखण्डे हयग्रीवागस्त्यसम्वादे श्री ललितोपाख्याने चतुर्थः ॥

॥ बालार्कमण्डलाभासां चतुर्बाहुं त्रिलोचनाम् ।
पाशाङ्कुशधनुर्बाणान् धारयन्तीं शिवां भजे ॥ ॐ ऐं ह्रीं श्रीं साङ्गायै सायुधायै सवाहनायै सपरिवारायै सर्वदेवतास्वरूपिण्यै श्रीललितामहात्रिपुरसुन्दर्यै परब्रह्मणे नमः ॥

॥ अथ पञ्चमोऽध्यायः ॥

ध्यानम्

तस्मात् क्षीरमहाम्बुधेर्मथनतो देवी सुराख्यार्यमा
लक्ष्मीः कल्पतरुस्तदान्यदतुलं प्रादुर्बभूवाप्सराः ।
यस्याज्ञा वशतस्तमेव परया शक्त्या समेतं शिवम्

वन्देऽहं ललितासमेतमनिशं श्रीसुन्दरेशं भजे ॥

[ श्रीमहाविष्णोर्मोहिनीरूपेणाविर्भावः - नारदेन शङ्कराय मोहिनीवृत्तान्तकथनम् - तद्दर्शनाय शङ्करेण विष्णुलोकागमनम् - भण्डासुरचरितारम्भः - श्री ललिताम्बावतारः ]

ॐ ऐं ह्रीं श्रीं

श्री हयग्रीव उवाच

अथ देवा महेन्द्राद्या विष्णुना प्रभविष्णुना ।
अङ्गीकृता महाधीराः प्रमोदं परमं ययुः ॥ १ ॥
मलकाद्यास्तु ते दैत्याः सर्वे विष्णु पाराङ्मुखाः ।
सन्त्यक्ताश्च श्रिया देव्या भृशमुद्वेगमागताः ॥ २ ॥
ततो जगृहिरे दैत्या धन्वन्तरिकरस्थितम् ।
परमामृतसाराढ्यं कलशं कलशोद्भव ॥ ३ ॥
अथासुराणां देवानामन्योऽन्यं कलहोऽभवत् ॥ ४ ॥
एतस्मिन्नन्तरे विष्णुः सर्वलोकैकरक्षकः ।
सम्यगाराधयामास ललितां स्वैक्यरूपिणीम् ॥ ५ ॥
सुराणां चासुराणां च रणं वीक्ष्य सुदारुणम् ।
ब्रह्मा निजपदं प्राप शम्भुः कैलासमास्थितः ॥ ६ ॥
मलकं योधयामास दैत्यानामधिपं वृषा ।

असुरैश्च सुराः सर्वे साम्परायमकुर्वत ॥ ७ ॥

भगवानपि योगीन्द्रः समाराध्य महेश्वरीम् ।

तदेकध्यानयोगेन तद्रूपः समजायत ॥ ८ ॥

सर्वसम्मोहिनी सा तु साक्षाच्छृङ्गारनायिका ।

सर्वशृङ्गारवेषाढ्या सर्वाभरणभूषिता ॥ ९ ॥

सुराणामसुराणां च निवार्य रणमद्भुतम् ।

मन्दस्मितेन दैतेयान् मोहयन्ती जगाद च ॥ १० ॥

अलं युद्धेन किं शस्त्रैर्मर्मस्थानविभेदिभिः ।

निष्ठुरैः किं वृथालापैः कण्ठशोषण हेतुभिः ॥ ११ ॥

अहमेवात्र मध्यस्था युष्माकं च दिवौकसाम् ।

यूयं चामी च नितरामत्र हि क्लेशभागिनः ॥ १२ ॥

सर्वेषां सममेवाद्य दास्याम्यमृतमद्भुतम् ।

मम हस्ते प्रदातव्यं सुधापात्रमनुत्तमम् ॥ १३ ॥

इति तस्याः वचः श्रुत्वा दैत्यास्तद्वाक्यमोहिताः ।

पीयूषकलशं तस्यै ददुस्ते मुग्धचेतसः ॥१४ ॥

तत्पात्रं सा समादाय जगन्मोहनरूपिणी ।

सुराणामसुराणां च पृथग्पङ्क्तिं चकार ह ॥ १५ ॥

द्वयोः पङ्क्त्योश्च मध्यस्था तानुवाच सुरासुरान् ।

तूष्णीं भवन्तु सर्वेऽपि क्रमशो दीयतेऽमृतम् ॥ १६ ॥

तद्वाक्यमुररीचक्रुस्ते सर्वे समवायिनः ।

सा च सम्मोहिताशेषलोका दातुं प्रचक्रमे ॥ १७ ॥

कनत्कनकदर्वीका क्वणन्मङ्गलकङ्कणा ।

कमनीयविभूषाढ्या कला सा परमा बभौ ॥ १८ ॥

Sri Hayagriva continued his narration - Having obtained the grace of Sri Narayana, Indra and the other Devas became strong and happy. Malaka and the other demons, having been rejected by the Lord, lost their luster. They also faced rejection from Sridevi and as a result, became anxious. The demons immediately snatched the pot of nectar from the hands of Dhanvantari. This lead to a fierce battle between the celestials and the demons. Meanwhile, Mahavishnu began to meditate on Sri Lalita Mahatripurasundari, who was his very Self. Seeing the fierce battle that ensued between the Devas and the demons, Lord Brahma and Lord Shiva returned to their respective abodes. Indra began to fight with Malaka, the king of demons. By completely identifying himself with Sri Lalita Mahatripurasundari, Sri Mahavishnu manifested himself in her form. She looked as if she were the very personification of the sentiment of erotica. Decorated with all kinds of ornaments, she appeared in the battlefield and brought the battle to a sudden halt. Enchanting the demons with a smile, she addressed them thus: “ O demons! Stop this battle. What is the use of all these weapons and verbal abuse? I will mediate between the two battling parties. Since both have you have put equal efforts in this task, both of you shall receive an equal share of the nectar. Hand the pot to me and I will distribute the nectar equally between you”. Mesmerized by her words, the demons handed over the pot of nectar to the beautiful lady. She then proceeded to organize the celestials and the demons in two separate queues. She stood between the two rows and said, “Settle down without making any noise. I will distribute the nectar among you all, one after another”. She held a golden serving spoon in her right hand the directions were filled with the beautiful twinkling sound of her bangles.

वामा वामकराम्भोजे सुधाकलशमुज्वलम् ।

दधाना देवतापङ्क्त्यै पूर्वं दर्व्या तथा दिशत् ॥ १९ ॥

दिशन्ती क्रमशस्तत्र चन्द्रभास्करसूचितम् ।

दर्वीमुखेन चिच्छेद सैम्हिकेयं तु मध्यगम् ॥ २० ॥

पीतामृतशिरोमात्रं तस्य व्योम जगाम च ।

तद्दृष्ट्वाप्यसुरास्तत्र तूष्णीमासत मोहिताः ॥ २१ ॥

एवं क्रमेण तत्सर्वं विबुधेभ्यो वितीर्य सा ।

असुराणां पुरः पात्रं सा निधाय तिरोदधे ॥ २२ ॥

रिक्तपात्रं तु तद्दृष्ट्वा सर्वे दैतेयदानवाः ।

उद्वेलं केवलं क्रोधं प्राप्ता युद्धचिकीर्षया ॥ २३ ॥

इन्द्रादयः सुराः सर्वे सुधापानाद्बलोत्तराः ।

दुर्बलैरसुरैः सार्धं समयुद्ध्यन्त सायुधाः ॥ २४ ॥

ते वध्यमानाः शतशो दानवेन्द्राः सुरोत्तमैः ।

दिगन्तान् कतिचिज्जग्मुः पातालं कतिचिद्ययुः ॥ २५ ॥

दैत्यं मलकनामानं विजित्य विबुधेश्वरः ।

आत्मीयं श्रियमाजह्रे श्रीकटाक्षसमीक्षितः ॥ २६ ॥

पुनः सिम्हासनं प्राप्य महेन्द्रः सुरसेवितः ।

त्रैलोक्यं पालयामास पूर्ववत्पूर्वदेवजित् ॥ २७ ॥

निर्भया निखिला देवास्त्रैलोक्ये सचराचरे ।

यथाकामं चरन्ति स्म सर्वदा हृष्टचेतसः ॥ २८ ॥

That lady of incomparable beauty held the pot of nectar in her left hand and began to distribute nectar- only to the celestials, with a spoon held in her right hand. Meanwhile, the sun and the moon noticed demon Rahu, son of Simhika, who was seated among the Devas, disguised as a celestial. At once, Mohini chopped off his head, from the edge of the spoon that she held in her right hand. The head of the demon, which had already consumed nectar flew into the cosmos. Even after seeing this, the demons, mesmerized by her beauty, remained silent. She served nectar to all the celestials, placed the empty pot in front of the demons and disappeared from sight. Seeing the empty vessel, the demons were filled with anger and they charged forward to fight against the celestials.

Indra and the other Devas, who were now very powerful due to the consumption of nectar, easily defeated the demons. Hundreds of demons were killed by the celestials. The remaining demons fled to save themselves. Indra defeated the king of demons - Malaka and regained his prosperity by the grace of Sridevi. He began to rule the three worlds like before. The Devas were thus freed from the terror caused by the demons.

तदा तदखिलं दृष्ट्वा मोहिनीचरितं मुनिः ।

विस्मितः कामचारी तु कैलासं नारदो गतः ॥ २९ ॥

नन्दिना च कृतानुज्ञः प्रणम्य परमेश्वरम् ।

तेन सम्भाव्यमानोऽसौ तुष्टो विष्टरमासत ॥ ३० ॥

आसनस्थं महादेवो मुनिं स्वेच्छाविहारिणम् ।

पप्रच्छ पार्वतीजानिरच्छस्फटिकसन्निभः ॥ ३१ ॥

भगवन् सर्ववृत्तज्ञ पवित्रीकृतविष्टप ।

कलहप्रिय देवर्षे किं वृत्तं तत्र नाकिनाम् ॥ ३२ ॥

सुराणामसुराणां वा विजयः समजायत ।

किं वाप्यद्भुतवृतान्तं विष्णुना वापि किं कृतम् ॥ ३३ ॥

इति पृष्टो महेशेन नारदो मुनिसत्तमः ।

उवाच विस्मयाविष्टः प्रसन्नवदनेक्षणः ॥ ३४ ॥

सर्वं जानासि भगवन् सर्वज्ञोऽसि यतस्ततः ।

तथापि परिपृष्टेन मया तद्वक्ष्यतेऽधुना ॥ ३५ ॥

तत्तादृशे च समरे सति दैत्यदिवौकसाम् ।

आदिनारयणः श्रीमान्मोहिनीरूपमाददे ॥ ३६ ॥

तामुदारविभूषाढ्यां मूर्तां शृङ्गारदेवताम् ।

सुरासुराः समालोक्य विरताः समरोद्यमात् ॥ ३७ ॥

तन्मायामोहिताः दैत्याः सुधापात्रं च याचिताः ।

कृत्वा तामेव मध्यस्थामर्पयामासुरञ्जसा ॥ ३८ ॥

तदा देवी तदादाय मन्दस्मितमनोहरा ।

देवेभ्य एव पीयूषमशेषं विततार सा ॥ ३९ ॥

तिरोहितामदृष्ट्वा तां दृष्ट्वा शून्यं च पात्रकम् ।

ज्वलन्मन्युमुखा दैत्या युद्धाय पुनरुत्थिताः ॥ ४० ॥

अमरैरमृतास्वादादत्यद्भुत पराक्रमैः ।

पराजिता महादैत्या नष्टाः पातालमभ्ययुः ॥ ४१ ॥

इमं वृत्तान्तमाकर्ण्य भवानीपतिरव्ययः ।

पार्वतीसहितो विष्णुमाजगाम सविस्मयः ॥ ४२ ॥

क्षीरोदतीरगं दृष्ट्वा सस्त्रीकं वृषवाहनम् ।

भोगिभोगासनाद्विष्णुः समुत्थाय समागतः ॥ ४३ ॥

Maharshi Narada, greatly surprised by the transformation of Narayana into Mohini, went to mount Kailasa. After obtaining the permission of Nandishwara, he went to the abode of Lord Mahadeva, prostrated before him and sat down on the seat that was offered to him. Mahadeva, who was shining with the luster of a pure white quartz crystal, addressed the sage thus: “ O revered sage! You keep track of all happenings. By your deeds, you purify the entire world. However, you are the celestial troublemaker. What happened to the Devas and demons who were busy churning the ocean? Did the celestials emerge victorious? Did any surprising incident take place? Did Mahavishnu perform any marvelous task?” Questioned thus by the great Lord, Narada began to explain cheerfully: “ O great Lord, you are all-knowing. But because you have questioned me, I shall narrate the incident”. The sage then went on to describe the entire episode of Narayana's transformation into Mohini. Hearing this, Mahadeva was greatly surprised. He immediately went to Ksheerasagara, the abode of Narayana, along with his consort

Parvati, to see Narayana. As soon as Narayana saw the divine couple, he got up from his bed (of Adishesha) and warmly welcomed them.

सस्नेहं गाढमालिङ्ग्य भवानिपतिमच्युतः ।

तदागमनकार्यं च पृष्टवान्विष्टरश्रवाः ॥ ४४ ॥

तमुवाच महादेवो भगवान् पुरुषोत्तमम् ।

महायोगीश्वरः श्रीमान् सर्वसौभाग्यसुन्दरः ॥ ४५ ॥

सर्वसम्मोहजनकं अवाङ्मनसगोचरम् ।

यद्रूपं भवतोपात्तं तन्म्यहं सम्प्रदर्शय ॥ ४६ ॥

द्रष्टुमिच्छामि ते रूपं शृङ्गारस्याधिदैवतम् ।

अवश्यं दर्शनीयं मे त्वं हि प्रार्थितकामधुक् ॥ ४७ ॥

इति सम्प्रार्थितः शश्वन्महादेवेन तेन सः ।

तस्यान्तिके तिरोधत्त महायोगीश्वरो हरिः ॥ ४८ ॥

शर्वोऽपि सर्वतश्चक्षुर्मुहुर्व्यापारयन् क्वचित् ।

अदृष्टपूर्वमाराममभिरामं व्यलोकयत् ॥ ४९ ॥

विकसत्कुसुमश्रेणीविनोदि मधुपालिकम् ।

चम्पकस्तबकामोद सुरभीकृतदिक्तटम् ॥ ५० ॥

माकन्दवृन्दमाध्वीकमाद्यदुल्लोल कोकिलम् ।

अशोकमण्डलीकाण्ड सताण्डवशिखण्डिकम् ॥ ५१ ॥

भृङ्गालिरवझङ्कारजितवल्लकि निःस्वनम् ।

पाटलोदारसौभाग्यपटली कुसुमोज्ज्वलम् ॥ ५२ ॥

तमालतालहिन्तालकृतमाल विकासितम् ।

पर्यन्तदीर्घिकादीर्घ पङ्कजश्री परिष्कृतम् ॥ ५३ ॥

वातपोतचलच्चारु पल्लवोत्फुल्लपुष्पकम् ।

सन्तानप्रसवामोद सन्तानाधिकवासितम् ॥ ५४ ॥

तत्र सर्वर्तु पुष्पाढ्ये सर्वलोकमनोहरे ।

पारिजाततरोर्मूले कान्ता काचिददृश्यत ॥ ५५ ॥

बालार्कपटलाकारा नवयौवनदर्पिता ।

उत्कृष्टपद्मरागाभ चरणाब्जनखच्छटा ॥ ५६ ॥

यावकश्री निर्व्यपेक्षपादलौहित्यवाहिनी ।

कलनिःस्वनमञ्जीरक्वणत्किङ्किणि मण्डिता ॥ ५७ ॥

अनङ्गवीरतूणीर दर्पोन्मथनजङ्घिका ।

करिशुण्डालकदलीकान्तितुल्योरु शोभिनी ॥ ५८ ॥

अरुणेन दुकूलेन सुस्पर्शेन तनीयसा ।

अलङ्कृतनितम्बाढ्या जघनाभोगभासुरा ॥ ५९ ॥

नवमाणिक्यसन्नद्ध हेमकाञ्ची विराजिता ।

नतनाभिमहावर्त त्रिवल्यूर्मिप्रभाझरी ॥ ६० ॥

स्तनकुड्मलकान्दोलन्मुक्तादाम शतावृता ।

अतिपीवरवक्षोज भारभङ्गुरमध्यभूः ॥ ६१ ॥

शिरीषकोमलभुजा कङ्कणाङ्गदशालिनी ।

सोर्मिकाङ्गुलिरुन्मृष्ट शङ्खसुन्दरकन्धरा ॥ ६२ ॥

मुखदर्पणवृन्ताभचुबुका पाटलाधरा ।

कुन्दकुड्मलसच्छायदन्तदर्शित चन्द्रिका ॥ ६३ ॥

स्थूलमौक्तिकसन्नद्ध नासाभरणभासुरा ।

केतकान्तर्दलद्रोणी दीर्घदीर्घविलोचना ॥ ६४ ॥

अर्धेन्दुतुलिता फाले सम्यक्क्लिप्तालकच्छदा ।

व्यालीवतम्समाणिक्यकुण्डला मण्डितश्रुतिः ॥ ६५ ॥

Narayana hugged Mahadeva with affection and enquired about the reason for his arrival. Lord Mahadeva, who is revered by all, who is the greatest Lord of the yogis and who shines with unequalled beauty said, "O Vishnu! It seems you assumed the form of Mohini during the churning of ocean, which I heard, is enchanting and beyond the reach of the mind and speech. Please show me that beautiful form of yours!" Lord Narayana agreed to this request and disappeared from view. Lord Shiva meanwhile saw a garden of incomparable beauty nearby. That garden was filled with trees, which bore smiling flowers. The garden was filled with Champak flowers, whose fragrance spread in all the ten directions. Cuckoos, having had an intoxicating drink of the juice from sweet mango sprouts, sang melodiously. Peacocks danced in merry, seated on the branches of Ashoka trees. The buzz of the bees that filled the garden seemed more melodious than the sound from Veena (an Indian string instrument). The entire garden, filled with red trumpet flowers, shone with auspiciousness. The garden was also filled with different trees like Tamaala, palm. Hintaala, Kritamaala etc. There were also beautiful lakes filled with lotuses. Slow breeze that blew over the flowers spread beautiful fragrance all over. In that beautiful garden, which was filled with flowers and fruits of all seasons, under a Parijaata tree, a beautiful lady appeared. Her beauty was unequalled and beyond description. She was ruddy like the rising sun and filled with the intoxication of youth. Her lotus feet had the complexion of Padmaraga gem (ruby) and the nails of her feet emitted beatific light. Her naturally beautiful feet emitted a red glow, without the need for any kind of lac or dye. Small bells in her anklet made a tinkling sound. Her shank (Janghaa) was so beautiful, as if humbling the powerful weapon of the cupid. Her thighs resembled the trunk of an elephant and had the shine of the trunk of the banana tree. Her hips were covered by a soft, thin red garment. A ruby-studded golden girdle increased the beauty of her waist. The three beautiful folds that arose from the depths of her navel lit the entire area with a beatific light. Her breasts, which resembled lotus buds, were decorated by hundreds of pearl-necklaces. Her slim waist was burdened by the weight of her firm and rotund breasts. Her arms were soft like Shirisha flowers and decorated by bangles and

other ornaments. She had beautiful nails. Her neck was of a pure white complexion like that of a conch. Her face was like a clean mirror and her lips were red like the Paatala flowers. Her white teeth, that resembled jasmine, emitted moonlight. She had a long sharp nose, which was decorated with a nose-ring made of pearl. Her long eyes resembled the palm flower. Her forehead, which shone like the half-moon and her lovely curls, made her supremely beautiful. Her earrings were studded with the priceless Nagamanis (serpent gem).

नवकर्पूरकस्तूरी सदामोदितवीटिका ।

स्फुरत्कस्तूरीतिलका नीलकुन्तलसम्हतिः ॥ ६६ ॥

सीमन्तरेखाविन्यस्तसिन्दूरश्रेणि भासुरा ।

स्फुरच्चन्द्रकलोत्तम्सा मदालोलविलोचना ॥ ६७ ॥

सर्वशृङ्गारवेषाढ्यां सर्वाभरणभूषिताम् ।

तामिमां कन्दुकक्रीडापरामालोल भूषणाम् ।

दृष्ट्वा क्षिप्रमुमां त्यक्त्वा सोऽन्वधावदथेश्वरः ॥ ६८ ॥

गृहीत्वा कथमप्येनामालिलिङ्ग मुहुर्मुहुः ।

उद्धूयोद्धूय साप्येनं धावति स्म सुदूरतः ॥ ६९ ॥

पुनर्गृहीत्वा तामीशः कामं कामवशीकृतः ।

आश्लिष्यदतिवेगेन तद्वीर्यं प्रच्युतं तदा ॥ ७० ॥

ततः समुदितो देवो महाशास्ता महाबलः ।

अनेककोटि दैत्येन्द्र गर्वनिर्वापणक्षमः ॥ ७१ ॥

तद्वीर्यबिन्दु सम्स्पर्शात्साभूमिस्तत्र तत्र च ।

रजतस्वर्णवर्णाभूत्तत्क्षणाद्विन्ध्यमर्दन ॥ ७२ ॥

तत्रैवान्तर्दधे सापि देवता विश्वमोहिनी ।

निर्वृतः स गिरीशोऽपि गिरिं गौरीसखो ययौ ॥ ७३ ॥

She was chewing betel leaves, filled with the fragrance of musk and camphor. Her forehead was decorated with a beautiful musk mark (Tilaka). She has shining long, black hair. The parting of her hair was decorated with a vermilion mark. Her crown was decorated with the half-moon. Her eyes were filled with intoxication. That beautiful lady was busy playing with a ball and as she moved, her ornaments swayed sensuously. Seeing her, Lord Mahadeva deserted his consort Parvati and ran to the beautiful lady. He embraced her in all possible ways. The lovely maiden tried to escape from him by running away. Filled with desire, Shiva followed her and continued to embrace her, as a result of which he ejaculated his semen. Immediately, an immensely powerful god named Shaasta, who was capable of destroying crores of demons, originated from Shiva's semen. Gold and silver mines were formed wherever drops of Shiva's semen fell. Later, that beautiful lady disappeared from view. Shiva also returned to the Himalayas along with his consort Parvati.

अथाद्भुतमिदं वक्ष्ये लोपामुद्रापते शृणु ।

यन्न कस्यचिदाख्यातं ममैव हृदये स्थितम् ॥ ७४ ॥

पुरा भण्डासुरो नाम सर्वदैत्यशिखामणिः ।

पूर्वदेवान् बहुविधान् यः स्रष्टुं स्वेच्छया पटुः ॥ ७५ ॥

विशुक्रं नाम दैतेयवर्गसम्रक्षण क्षमम् ।

शुक्रतुल्यं विचारज्ञं दक्षाम्सेन ससर्ज सः ॥ ७६ ॥

वामाम्सेन विषङ्गं च सृष्टवान् दुष्टशेखरः ।

धूमिनी नामधेयां च भगिनीं भण्डदानवः ॥ ७७ ॥

भ्रातृभ्यामुग्रवीर्याभ्यां सहितः सहताहितः ।

ब्रह्माण्डं खण्डयामास शौर्यवीर्य समुच्छ्रितः ॥ ७८ ॥

ब्रह्मविष्णुमहेशाश्च तं दृष्ट्वा दीप्ततेजसम् ।

पलायनपराः सद्यः स्वे स्वे धाम्नि सदाऽवसन् ॥ ७९ ॥

तदानीमेव तद्बाहुसम्मर्दन विमूर्छिताः ।

श्वसितुं चापि पटवो नाभवन्नाकिनां गणाः ॥ ८० ॥

केचित्पातालगर्भेषु केचिदम्बुधिवारिषु ।

केचिद्दिगन्तकोणेषु कुञ्जेष्वेके च भूभृताम् ॥ ८१ ॥

विपिनं भृशवित्रस्तास्त्यक्तदारसुतश्रियः ।

भ्रष्टाधिकाराः पशवो विचेरुश्च्छन्नवेषकाः ॥ ८२ ॥

यक्षान्महोरगान्सिद्धान्साध्यान्समरदुर्मदान् ।

ब्रह्माणं पद्मनाभं च रुद्रं वज्रिणमेव च ।

मत्वा तृणाय तान्सर्वान् लोकान्भण्डः शशास ह ॥ ८३ ॥

अथ भण्डासुरं हन्तुं त्रैलोक्यं चापि रक्षितुम् ।

द्वितीयमुदभूद्रूपं महायागानलात्पुनः ॥ ८४ ॥

यद्रूपशालिनीमाहुर्ललितां परदेवताम् ।

पशाङ्कुशधनुर्बाण परिष्कृतकराम्बुजाम् ॥ ८५ ॥

सा देवी परमा शक्तिः परब्रह्मस्वरूपिणी ।

जघान भण्डदैत्येन्द्रं युद्धे युद्धविशारदा ॥ ८६ ॥

Thus, having narrated the wonderful episode of Mohini's appearance, Lord Hayagriva then said - “O Agastya, the husband of Lopamudra! Listen to this astounding episode, which I have guarded secretly in my heart all these days. I have narrated this to none before. Long ago, there was a demon called Bhandasura who was the head of all Asuras. He had the power to recreate the various demons, who had lived in the past. He created a demon named Vishukra from his right shoulder. Vishukra was capable of protecting the

entire race of demons and his analytical capabilities matched that of the Acharya of the demons - Shukracharya. Bhandasura created a demon named Vishanga from his left shoulder and later a sister named Dhoomini. Bhandasura, along with his powerful brothers Vishukra and Vishanga, began to torture the entire universe. Even the trinity - Brahma-Vishnu-Rudra- were frightened by him and they ran away to their respective abodes, unable to face him in battle. The entire clan of the celestials was caught in his clutches and the Devas were rendered helpless and weak. To escape from him, some ran towards the nether worlds, some towards the seven great oceans and some hid themselves in mountain caves. They lost their authority, position, family, and wealth and like wild animals, had to roam in forests. Yakshas, Snakes, Siddhas, Sadhyas, celestials, Brahma, Vishnu, Rudra, and Indra - all these were but mere blades of grass to the powerful Bhandasura, who became the ruler of the entire universe. In order to protect the three worlds by slaying Bhandasura, the second form of Sridevi appeared from the great sacrificial fire. This immensely beautiful goddess, who sports Pasha, Ankusha, bow and arrows in her four hands, is the greatest of all, Sri Lalita Mahatripurasundari. This goddess in indeed Parashakti; she is Parabrahman personified. Sridevi, who is well versed in the art of warfare, killed Bhandasura in battle.

॥ श्री ब्रह्माण्डपुराणे उत्तरखण्डे हयग्रीवागस्त्यसम्वादे श्री ललितोपाख्याने पचमः ॥

॥ बालार्कमण्डलाभासां चतुर्बाहुं त्रिलोचनाम् ।
पाशाङ्कुशधनुर्बाणान् धारयन्तीं शिवां भजे ॥ ॐ ऐं ह्रीं श्रीं साङ्गायै सायुधायै सवाहनायै सपरिवारायै सर्वदेवतास्वरूपिण्यै श्रीललितामहात्रिपुरसुन्दर्यै परब्रह्मणे नमः ॥

॥ अथ षष्ठोऽध्यायः ॥

ध्यानम्

यद्ध्यानात्परमेश्वरस्य सहसा सम्मोहिनीरूपकम्
धृत्वानन्दविलासपूर्वमतुलं सङ्क्रीडयच्छम्भुना ।

शास्तारं जनयन् प्रभाति रमया विष्णुस्तमीशं सदा
सर्वज्ञं ललिताम्बिकायुतमहं श्री सुन्दरेशं भजे ॥

[ भण्डासुरोत्पत्तिः - महादेवेन तस्य वरप्राप्तिः ]

ॐ ऐं ह्रीं श्रीं

अगस्त्य उवाच

कथं भण्डासुरो जातः कथं वा त्रिपुराम्बिका ।
कथं स निहतः तत्सर्वं वद विस्तरात् ॥ १ ॥

श्री हयग्रीव उवाच

पुरा दाक्शायणीं त्यक्त्वा पितुर्यज्ञविनाशनात् ।
आत्मानमात्मना पश्यन् ज्ञानन्दरसात्मकः ॥ २ ॥
उपास्यमानो मुनिभिरचिन्त्यगुणलक्षणः ।
गङ्गाकूले हिमवतः पर्यन्ते प्रविवेश ह ॥ ३ ॥
साऽपि शङ्करमाराध्य चिरकालं मनस्विनी ।
योगेन स्वां तनुं त्यक्त्वा सुतासीद्धिमभूभृतः ॥ ४ ॥
स शैलो नारदाच्छ्रुत्वा रुद्राणीति स्वकन्यकाम् ।
तस्य शुश्रूशणार्थाय स्थापयामास चान्तिके ॥ ५ ॥
एतस्मिन्नन्तरे देवास्तारकेणाभिपीडिताः ।

ब्रह्मणोक्ताः समाहूय मदनं चेदमब्रुवन्॥ ६ ॥

सर्गादौ भगवान् ब्रह्मा सृजमानोऽखिलाः प्रजाः।

न निर्वृत्तिरभूत्तस्य कदाचिदपि मानसे।

तपश्चचार सुचिरं मनोवाक्कायकर्मभिः॥ ७ ॥

ततः प्रसन्नो भगवान् सलक्ष्मीको जनार्दनः।

वरेण छन्दयामास वरदः सर्वदेहिनाम्॥ ८ ॥

ब्रह्मोऽवाच

यदि तुष्टोऽसि भगवन्ननायासेन वै जगत्।

चराचरमिदं चैव सृजामि त्वत्प्रसादतः॥ ९ ॥

एवमुक्तो विधात्रा तु महालक्ष्मीमुदैक्षत।

तदा प्रादुरभूस्त्वं वै जगन्मोहनरूपधृक्॥ १० ॥

तवायुधार्थं दत्तं च पुष्पबाणेक्षुकार्मुकौ।

विजयत्वमलङ्घ्यतवं प्रादात्प्रमुदितो हरिः॥ ११ ॥

असौ सृजति भूतानि कारणेन स्वकर्मणा।

साक्षिभूतोऽस्य जगतो भवान् भजतु निर्वृतिम्॥ १२ ॥

एवं लब्धवरो धाता त्वयि विन्यस्य तद्भरम्।

मनसो निर्वृतिं प्राप्य वर्ततेऽद्यापि मन्मथ॥ १३ ॥

अमोघं बलवीर्यं ते न ते मोघः पराक्रमः।

सुकुमाराण्यमोघानि कुसुमास्त्राणि ते सदा ॥ १४ ॥

ब्रह्मदत्तवरोऽयं हि तारको नाम दानवः ।

बाधते सकलान् लोकानस्मानपि विशेषतः ॥ १५ ॥

शिवपुत्रादृतेऽन्यत्र भयं तस्य न विद्यते ।

त्वां विनास्मिन्महाकार्ये न कश्चित्प्रभवेदपि ॥ १६ ॥

सुकरं च भवेत्कार्यं भवतो नान्यतः क्वचित् ॥ १७ ॥

आत्मैक्यध्याननिरतः शिवो गौर्या समन्वितः ।

हिमाचलतटे रम्ये वर्तते मुनिभिर्वृतः ॥ १८ ॥

त्वन्नियोगाच्च गौर्यां तु जनिष्यति च तत्सुतः ।

ईषत्कार्यमिदं कृत्वा त्रायस्वास्मान्महाबल ॥ १९ ॥

एवमभ्यर्थितो देवैः स्तूयमानो मुहुर्मुहुः ।

जगमात्मविनाशाय यतो हिमवतस्ततम् ॥२० ॥

Agastya questioned his guru Hayagriva, “Lord! How was Bhandasura born? How did Mahatripurasundari incarnate as Lalitambika? How did she kill him? Please narrate these in detail!” Then Lord Hayagriva began narrating the wonderful episode of Bhandasura. “ O great sage Agastya, long ago, after Daksha Brahma's fire sacrifice was destroyed, Lord Mahadeva gave up the company of his consort Dakshayani (Sati) and remained immersed in Samadhi. He made a forest in the Gangetic plains of the Himalayan region, his abode and was attended upon by great sages. Dakshayini also worshipped Shiva for a long time and then by her Yogic powers, gave up her mortal body, to be born as the daughter of Himavanta. Sage Narada told Himavanta, the mountain-king, that his daughter was none other than Sati, the divine consort of Mahadeva. He hence stationed her near Lord Mahadeva, to attend to his needs. Meanwhile, the celestials were put to a lot of torture by a demon named Tarakasura. As per the wise counsel of Brahma, they approached Manmatha, the god of erotic love and said, “ O Manmatha! In the beginning of creation, Brahma- the creator, did not obtain satisfaction or peace of mind, even after creating various forms of life. He then began to perform a penance to please Narayana. Pleased with Brahma, Lord Narayana appeared in front of him, along with Sri Lakshmi and

expressed his desire to grant him a boon. Then Brahma said, “ O Lord! If you are really pleased with my penance, I shall be able to create this universe (composed of both animate and inanimate things) with ease”. At that instant, Sri Narayana looked at Sri Mahalakshmi with love. At once you (Manmatha) were born! Narayana gifted you sugarcane and flowers as your weapons. He also blessed you with the boons of Ajeyatva (victory over all) and Alanghyatva (authority over all). Lord then addressed Brahma: “O four-faced one! This Manmatha will be responsible for the creation of all living forms. You remain as a silent witness to his deeds”. To this day, you are responsible for the creation. You are no ordinary being. Your power and valor are unequalled. Even though your weapons are flowers and sugarcane, they can never go waste. A demon named Tarakasura, having obtained a boon from Lord Brahma, is creating havoc in the entire universe. He is causing trouble, especially to the celestials. None, other than Lord Shiva's son, can kill him. In the present circumstance, only you are capable of accomplishing this great task. Lord Mahadeva is presently engaged in Samadhi in the Himalayan region. He is attended by Gauri and other sages. If you accomplish the desired task, Lord Shiva will have a son in Gauri Devi. Please agree to take up this task and save us from the clutches of Taraka”. Manmatha was exuberated by praises and agreed to do as directed. He reached the foothills of Himalayas, inviting his own death.

किमप्याराधयन्तं तु गन्धपुष्पोपहारकैः ।

शुश्रूषणपरां तां तु ददर्शातिबलः स्मरः ॥ २१ ॥

अदृशः सर्वभूतानां नातिदूरेऽस्य सम्स्थितः ।

सुमनोमार्गणैरुग्रैस्तं विव्याध महेश्वरम् ॥ २२ ॥

विस्मृत्य सर्वकर्माणि विद्धस्तैरन्तिकस्थिताम् ।

गौरीं विलोकयामास मन्मथाविष्टचेतनः ॥ २३ ॥

धृतिमालम्ब्य च पुनः किमेतदिति चिन्तयन् ।

ददर्शाग्रे तु सन्नद्धं मन्मथं कुसुमायुधम् ॥ २४ ॥

तं दृष्ट्वा कुपितः शूली त्रैलोक्यदहनक्षमम् ।

तार्तीयं चक्षुरुन्मील्य ददाह मकरध्वजम् ॥ २५ ॥

शिवेनैवमवज्ञाता दुःखिता शैलकन्यका ।

अनुज्ञया पितुः स्वस्य तपः कर्तुमगाद्वनम्॥ २६ ॥

अथ तद्भस्म सम्वीक्ष्य चित्रकर्मा गणेश्वरः ।

तद्भस्मना तु पुरुषं चित्राकारं चकार सः ॥ २७ ॥

तं विचित्रतनुं रुद्रो ददर्शाग्रे तु पूरुषम् ।

तत्क्षणाज्जातजीवोऽसौ मूर्तिमानिव मन्मथः ।

महाबलोऽतितेजस्वी मध्याह्नार्कसमद्युतिः ॥ २८ ॥

When Manmatha arrived at Kailasa, Parameshwara was immersed in self-contemplation and Gauri Devi was busy serving the Lord. Manmatha assumed an invisible form and stood near Shiva. He then aimed flower-arrows at Lord Shiva. Struck by the arrow of lust, Lord Mahadeva forgot all his duties for a while, overcome with desire and looked at Gauri Devi with love. However Shiva analyzed his feeling immediately, regained his composure and looked around to know why it happened so. Shiva saw Cupid in front of him, armed with arrows of lust. Burning with anger, Lord Rudra opened his third eye and the fire rushing there from reduced Cupid to ashes. Thus rejected by Shiva, Gauri Devi sought the permission of her father and proceeded to a forest to perform penance. Later, Chitrakarma, a commander of Shiva's troupe, gathered the ash of the burnt Manmatha and constructed a male form out of it. Lord Shiva happened to see the weird male figure and at once it sprang to life. That male form exactly resembled Manmatha and possessed great strength, vigor, and brightness.

तं चित्रसेनो बाहुभ्यां समालिङ्ग्य मुदान्वितम् ।

स्तुहि बाल महादेवं सतु सर्वार्थसाधकः ॥ २९ ॥

इत्युक्त्वा शतरुद्रीयमुपादिशदमेयधीः ।

ननाम शतशो रुद्रं शतरुद्रमनुं जपन्॥ ३० ॥

ततः प्रसन्नो भगवान् महादेवो वृषध्वजः ।

वरेण छन्दयामास वरं वव्रे च बालकः ॥ ३१ ॥

प्रतिद्वन्द्विबलार्धं तु मद्बलेनोपयोक्ष्यत ।

तदस्त्रशस्त्रमुख्यानि व्यथां कुर्वन्तु नो मम ॥ ३२ ॥

तथेति तत्प्रतिश्रुत्य विचार्य किमपि प्रभुः ।

षष्टिवर्षसहस्राणि राज्यमस्मै ददौ पुनः ॥ ३३ ॥

एतद्दृष्ट्वा तु चरितं धाता भण्डिति भण्डिति ।

यदुवाच ततो नाम्ना भण्डो लोकेषु कथ्यते ॥ ३४ ॥

इति दत्वा वरं तस्मै सर्वैर्मुनिगणैर्वृतः ।

दत्वास्त्राणि च शस्त्राणि तत्रैवान्तरधीयत ॥ ३५ ॥

Chitrakarma, overwhelmed with joy, hugged the boy and said, "O child! Praise Mahadeva. He will grant you all your wishes". Then Chitrakarma initiated the boy into the great mantra called Shatarudriya and asked him to undertake a penance. That boy chanted the Mahamantra hundreds of times and prostrated before Mahadeva. Lord Mahadeva, pleased with the boy, offered to grant him a boon. The boy said, "O Parameshwara! Anyone who fights against me should immediately lose half of his strength and that strength should be added to my strength. None of the weapons of my opponents should be able to harm me". Immediately Lord Shiva granted the boon and after thinking for a while added, "I am bestowing on you the boon of ruling the kingdom for sixty thousand years". Lord Brahma, who was witnessing all this, grew frustrated and swore "Bhand" "Bhand" (meaning shame, shame). From then on, that boy came to be known as "Bhanda" in the entire world. After this, Lord Mahadeva also granted Bhanda many weapons and then disappeared along with his attendant sages.

॥ श्री ब्रह्माण्डपुराणे उत्तरखण्डे हयग्रीवागस्त्यसम्वादे श्री ललितोपाख्याने षष्ठः ॥

॥ बालार्कमण्डलाभासां चतुर्बाहुं त्रिलोचनाम् ।

पाशाङ्कुशधनुर्बाणान् धारयन्तीं शिवां भजे ॥ ॐ ऐं ह्रीं श्रीं  साङ्गायै सायुधायै सवाहनायै सपरिवारायै सर्वदेवतास्वरूपिण्यै श्रीललितामहात्रिपुरसुन्दर्यै परब्रह्मणे नमः ॥

॥ अथ सप्तमोऽध्यायः ॥

ध्यानम्

विष्णोर्लक्ष्म्यामभूद्यस्स्मर इति विदितो यस्य फालेक्षणाग्नेः
ज्वालावेशाद्विदग्धः पुनरपि सहसा भण्डसङ्ज्ञासुरोऽभूत् ।
स्तुत्या यस्यैव शम्भोरथवरकृपया सर्वलोकाधिपोऽभूत्
तत्त्वां मीनाक्ष्युमेशं परशिव सततं सुन्दरेशं भजेऽहं ।

[ भण्डासुरस्य पट्टाभिषेक महोत्सवः - विष्णुकृत माया सृष्टिः - सपरिवारेण भण्डासुरेण तस्यां कृतव्यामोहः ]

ॐ ऐं ह्रीं श्रीं

श्री हयग्रीव उवाच

रुद्रकोपानलाज्जातो यतो भण्डो महाबलः ।
तस्माद्रौद्रस्वभावश्च दानवश्चाभवत्ततः ॥ १ ॥

अथागच्छन्महातेजाः शुक्रो दैत्यपुरोहितः।
समायाताश्च शतशो दैतेयास्तु महाबलाः॥ २॥
अथाहूय मयं भण्डो दैत्यवम्शादिशिल्पिनम्।
नियुक्तो भृगुपुत्रेण स जगाद मयं ततः॥ ३॥
यत्र स्थित्वा तु दैत्येन्द्रैः त्रैलोक्यं शासितं पुरा।
तद्गत्वा शोणितपुरं निर्माणं कुर्वितीरितः॥ ४॥
तच्छ्रुत्वा वचनं शिल्पी स गत्वा तत्पुरं महत्।
चक्रेऽमरपुरप्रख्यं मनसैव क्षणेन तु॥ ५॥
अथाभिषिक्तः शुक्रेण दैतेयैश्च महाबलैः।
शुशुभे परया लक्ष्म्या तेजसा च समन्वितः॥ ६॥
हिरण्याय तु यद्दत्तं किरीटं ब्रह्मणा पुरा।
सजीवमविनाश्यं च दैत्येन्द्रैक विभूषणम्।
ददौ भृगुसुतोत्सृष्टं भण्डो बालार्कसन्निभम्॥ ७॥
चामरे चन्द्रसङ्काशे सजीवे ब्रह्मनिर्मिते।
न रोगा न च दुःखानि ददौ यद्विनिषेवणात्॥ ८॥
तस्यातपत्रं प्रददौ ब्रह्मणैव पुरा कृतम्।
यस्य च्छायानिषण्णस्सु बाध्यते नास्त्रकोटिभिः॥ ९॥
धनुश्च विजयं नाम खड्गं च रिपुघातिनम्।
अन्यान्यपि महार्हाणि भूषणानि प्रदत्तवान्।

तस्य सिम्हासनं प्रादादक्षयं सूर्यसन्निभम् ॥ १० ॥

तस्य सिम्हासनासीनः सर्वाभरणभूषितः ।

बभूवातीव तेजस्वी रत्नमुत्तेजितं यथा ॥ ११ ॥

बभूवुरथ दैतेयास्तस्याष्टौ तु महाबलाः ।

इन्द्रशत्रुरमित्रघ्नो विद्युन्माली विभीषणः ।

उग्रकर्मोग्रधन्वा च विजयः श्रुतिपारगः ॥ १२ ॥

Though Bhandasura was very powerful, since he was born of Shiva's anger, he possessed the cruel qualities of a demon. Then Shukracharya, the priest of the demons, approached Bhandasura along with thousands of other powerful demons. According to Shukracharya's orders, Bhandasura called Maya (the royal sculptor of the demons) and said, “O Maya! Construct a city named 'Shonitapura' (city of blood) in the same place, from where other demon kings ruled the three worlds, previously. Then Maya went to the indicated spot and constructed a great city there, by mere thought. This great city was comparable in beauty to Amaravati, the capital of Indra. Then Shukracharya and other demons selected Bhandasura as their king and enthroned him in that city. He glowed with prosperity and luster. Shukracharya then offered Bhandasura an invaluable crown, which was previously gifted by Brahma to Hiranyakashipu (father of Prahlada). That crown had life; it was indestructible and had the brightness of the rising sun. He also got a set of fans, created by Brahma. These fans were shining like the moon and were filled with life. One, who used these fans, would never suffer from diseases or grief. Shukracharya also gifted Bhandasura, a beautiful umbrella, also a creation of Brahma. A person in the shade of this miraculous umbrella would never face any harm from any weapons. He also received other invaluable gifts from Shukracharya. He also obtained a throne, which was indestructible and had the brightness of the sun. Seated on the throne, Bhandasura shone like a polished diamond. He then appointed eight powerful demons as his ministers. They were: Indrashatru, Amitraghna, Vidyunmali, Vibhishana, Ugrakarma, Ugradhanva, Vijaya and Shrutiparaga.

सम्मोहिनी कुमुदिनी चित्राङ्गी सुन्दरी तथा ।

चतस्रो वनितास्तस्य बभूवुः प्रियदर्शनाः ॥ १३ ॥

तमसेवन्त कालज्ञा देवाः सर्वे सवासवाः ॥ १४ ॥

स्यन्दनास्तुरगा नागाः पादाताश्च सहस्रशः ।
सम्बभूवुर्महाकाया महान्तो जितकाशिनः ॥ १५ ॥
बभूवुर्दानवास्सर्वे भृगुपुत्र मतानुगाः ।
अर्चयन्तो महादेवमास्थिताः शिवशासने ॥ १६ ॥
बभूवुर्दानवास्तत्र पुत्र पौत्र धनान्विताः ।
गृहे गृहे च यज्ञाश्च सम्बभूवुः समन्ततः ॥ १७ ॥
ऋचो यजूम्षि सामानि मीमाम्सा न्यायकादयः ।
प्रवर्तयन्तेऽस्म दैत्यानां गृहं प्रति गृहं प्रति ॥ १८ ॥
यथाऽश्रमेषु मुख्येषु मुनीनां च द्विजन्मनाम् ।
तथा यज्ञेषु दैत्यानां बभूवुर्हव्यभोजिनः ॥ १९ ॥
एवं कृतवतोऽप्यस्य भण्डस्य जितकाशिनः ।
षष्ठिवर्षसहस्राणि व्यतीतानि क्षणार्धवत् ॥ २० ॥
वर्धमानमथो दैत्यं तपसा च बलेन च ।
हीयमानबलं चेन्द्रं सम्प्रेक्ष्य कमलापतिः ॥ २१ ॥
ससर्ज मनसा काञ्चिन्मायां लोकविमोहिनीम् ।
तामुवाच ततो मायां देवदेवो जनार्दनः ॥ २२ ॥
त्वं हि सर्वाणि भूतानि मोहयन्ती निजौजसा ।
विचरस्व यथा कामं त्वां न जेष्यति कश्चन ॥ २३ ॥
त्वं तु शीघ्रमितो गत्वा भण्डं दैतेयनायकम् ।

मोहयित्वाऽचिरेणैव विषयानुपभक्ष्यसि ॥ २४ ॥

एवं लब्धवरा माया तं प्रणम्य जनार्दनम् ।

ययाचेऽप्सरसां मुख्याः सहायार्थे तु काश्चन ॥ २५ ॥

He had four beautiful ladies named - Sammohini, Kumudini, Chitrangi and Sundari- as his wives. All the celestials, headed by Indra himself, served Bhandasura. His fourfold army had thousands of powerful chariots, horses, elephants and soldiers. All demons, according to the orders of their Guru Shukra, kept themselves busy in the worship of Lord Mahadeva and as a result, obtained progeny and prosperity. Sacred fire sacrifices were performed uninterruptedly in every demon's home. All the time, the Vedas and Vedangas were taught in the demon households. Similar to the hermitages of Rishis and the households of the Brahmanas, the celestials accepted Havis regularly, in the sacrifices performed by the demons. In no time, sixty thousand years passed, as though it was just the half of a second. Bhandasura grew stronger day by day due to penance and sacrifices. Observing this, Lord Vishnu felt concerned towards Indra who was becoming weak gradually. The Lord created an illusion (Maya) who was capable of enchanting the entire world. Then he said, “O Maya! Enchanting all creatures by your charisma, roam freely as per your sweet will. No one will be able to defeat you. Go to Bhandasura immediately, enchant him and enjoy the luxuries of life”. Having thus obtained boons from the Lord, Maya prostrated before the Lord and sought the help of Apsaras (celestial dancers) to accomplish the task of enchanting Bhandasura.

तथेत्यप्सरसो मुख्या युयोज स तया हरिः ।

ताभिर्विश्वाचीमुख्याभिः सम्युक्ता सा मृगेक्षणा ।

प्रययौ मानसस्याग्र्यं तटमुज्ज्वलभूरुहम् ॥ २६ ॥

यत्र क्रीडति दैत्येन्द्रो निजनारीभिरन्वितः ।

तत्रैव मृगशावाक्षी मूले चम्पकशाखिनः ।

निवासमकरोद्रम्यं गायन्ती मधुरस्वनम् ॥ २७ ॥

अथागतस्तु दैत्येन्द्रो बलिभिर्मन्त्रिभिर्वृतः ।

श्रुत्वा विणानिनादं तु ददर्श च वराङ्गनाम्॥ २८॥

तां दृष्ट्वा चारुसर्वाङ्गीं विद्युल्लेखामिवापराम्।

मायामोहमहागर्ते पतितो मदनाभिदे॥ २९॥

अथास्य मन्त्रिणः पेतुर्हृदये स्मरतापिताः॥ ३०॥

तेन दैतेयनाथेन चिरं सम्प्रार्थिता सती।

तैश्च सम्प्रार्थितास्ताश्च प्रतिशुश्रुवुरञ्जसा॥ ३१॥

यास्त्वलभ्या महायज्ञैः अश्वमेधादिकैरपि।

ता लब्ध्वा मोहिनीमुख्या निर्वृतिं परमां ययुः॥ ३२॥

विसस्मेरुस्ततो वेदान् तथा देवमुमापतिम्।

विससर्जुस्तथा यज्ञान् क्रियाश्चान्याः शुभावहाः॥ ३३॥

अवमानाहत्श्चासीत्तेषामपि पुरोहितः।

मुहूर्तमिव तेषां तु युयुरष्टौ शतं समाः॥ ३४॥

मोहितेष्वथ दैत्येषु सर्वे देवाः सवासवाः।

विमुक्तोपद्रवा ब्रह्मन्नामोदं परमं ययुः॥ ३५॥

The Lord granted her the help of beautiful Apsaras. That beautiful Maya, along with Vishwachi and other Apsaras, came to a beautiful place in front of lake Manasasarovara. This place was filled with many varieties of fruits and flowers. This was the same place where Bhandasura strolled with his wives everyday. Maya created a palace for herself below a Champak tree in that region and began to sing in a melodious voice. Bhandasura, who arrived there with his powerful ministers, happened to hear the beautiful music of Veena and also the melodious voice of the damsel who played the instrument. As soon as Bhandasura saw the lightening-like lady, he was overcome with lust and he fell into the deep pit of desire. The arrows of cupid also struck his ministers and they fell into the same deep pit. After repeated requests by Bhandasura, Maya agreed to become his wife. Similarly, Vishwachi and other damsels also agreed to accompany Bhandasura's

ministers. Thus having obtained the great Mohini and other divine damsels like Vishwachi, unobtainable even by Ashwamedha and other great sacrifices, Bhandasura and his ministers were supremely satisfied. Immersed in the gratification of their senses, they soon forgot the Vedas and the worship of Lord Mahadeva, the divine consort of Uma. They gave up fire sacrifices and other auspicious duties. They even humiliated their guru Shukracharya, who tried to correct them. As though a mere second, the demons spent eight hundred years in corporeal gratification. Since the demons were enchanted by Maya, Indra and the other celestials were saved from their torture.

NOTE : A detailed description of how Bhandasura tormented the worlds is seen elsewhere. Bhandasura called for a meeting of his brothers and ministers and said. "Devas are our enemies by birth. As long as Manmatha was alive, their lineage continued without any problems. They also enjoyed many pleasures. Now, because of our luck, we have taken birth from the ashes of Manmatha. The gods are trying to resurrect Manmatha. We should not allow that to happen. Before they try anything like that, we should kill the Devas. But, if we go in our present form, we cannot win. Let us therefore assume the form of air (Vayu) and enter their bodies. After having so entered their bodies, let us dry up their body fluids, especially the semen. If semen dries up, the strength of other tissues and organs will automatically diminish. Then they will automatically be annihilated. Let us torment the beings of all the three worlds by entering their bodies in the form of air and by drying up their body fluids". Without wasting much time, Bhandasura and his army of a thousand Akshouhinis assumed the invisible form of air and entered the heaven. First of all, they entered the minds of the Devas and dried up their mental faculties. Subsequently they entered the face of the celestials and robbed them of their beauty and made them ugly. All the women and men in the heaven became impotent and sterile. Not only that, their love for one another was also lost. They lost enthusiasm to do anything. Even the plants and animals suffered the same fate. Vishukra, along with his troupes entered Bhooloka (earth) and meted out the same treatment to the beings there. People on the planet earth lost all emotions. They lost all happiness. No one had any respect for another. No one thought of helping the other. They lost interest in their activities. The situation was stone-like, devoid of any life and feelings. Vishanga, along with his troupes entered Rasaatala (one of the seven nether worlds). He created similar havoc there also. In the Naga Loka (land of serpents) everyone became afflicted with grief for no apparent reason. Everyone started hating everyone else. Everyone became drained
of energy and potency. Rasa, the fluid principle is the basis for the accomplishment of the four-fold aims of life (Purusharthas). Rasa itself is the form of Paramatman, the Almighty. From Rasa are created Shukla (sperm) and Shonita (ovum). These two are collectively called as Veerya (the procreative Tatva). From Veerya comes Kanti (radiance), Utsaaha (enthusiasm), Ullasa (happiness), Dharma (righteousness), Daya (compassion), Preeti (love), Buddhi (intellectual capabilities), Vikasa (development), Parakrama (valor) Shastra Vijnana (scientific knowledge), Kala Asakti (interest in arts), Soundarya Drishti (proper concept of beauty) etc. In plants, the Rasa enhances the fire energy, which is hidden in them. Only when the fire energy is harnessed, the plants can branch out and bear flowers and fruits. Because of this fire principle, the dried logs catch

fire easily and burn. The Vedas have declared that beings can experience happiness only if Rasa is present. Rasa is nothing but Prana (vital energy).
Having known all these secrets, Bhandasura devised the plan of entering the bodies of all beings in the form of air and drying them up. Thus, the universe became Rasahiina (devoid of Rasa). Especially due to the absence of Shringara, creative cycle was almost brought to a standstill. This lead to an untimely Kama Pralaya.

कदाचिदथ देवेन्द्रं दिव्यसिम्हासनस्थितम् ।

सर्वदेवैः परिवृतं नारदो मुनिरराययौ ॥ ३६ ॥

प्रणम्य मुनिशार्दूलं ज्वलन्तमिव पावकम् ।

कृताञ्जलिपुटो भूत्वा देवेशो वाक्यमब्रवीत् ॥ ३७ ॥

भगवन् सर्वधर्मज्ञ परापरविदां वर ।

अत्रैवागमनं तेऽद्य मां धन्यं कर्तुमिच्छतः ।

भविष्यच्छोभनाकारं तवागमनकारणम् ॥ ३८ ॥

त्वद्वाक्यामृतमाकर्ण्य श्रवणानन्दनिर्भरः ।

अशेषदुःखादुत्तीर्य कृतार्थः स्यां मुनीश्वर ॥ ३९ ॥

नारद उवाच

अद्य सम्मोहितो भण्डो दैत्येन्द्रो विष्णुमायया ।

तया विमुक्तो लोकान्त्रीन् दहत्यग्निरिवापरः ॥ ४० ॥

अधिकस्तव तेजोभिरस्त्रैर्मायाबलेन च ।

तस्य तेजोऽपहारस्तु कर्तव्योऽतिबलस्य च ॥ ४१ ॥

विनाराधनतो देव्याः पराशक्तेस्तथा सति ।

अशक्योऽन्येन तपसा कल्पकोटिशतैरपि ॥ ४२ ॥

पुरैवोदयतः शत्रोराराधयत बालिशाः ।

आराधिता भगवती सा वः श्रेयो विधास्यति ॥ ४३ ॥

एवं सम्बोधितस्तेन शक्रो देवगणेश्वरः ।

तं मुनिं पूजयामास सर्वदेवैः समन्वितः ॥ ४४ ॥

तपसे कृतसन्नाहो ययौ हैमवतं तटम् ॥ ४५ ॥

तत्र भागीरथी तीरे सर्वर्तुकुसुमोज्ज्वले ।

परशक्तेर्महापूजां चक्रेऽखिलसुरैः सह ॥ ४६ ॥

इन्द्रप्रस्थमभून्नाम्ना तदाद्यखिलसिद्धिदम् ॥ ४७ ॥

नारदेनोपदिष्टेन विधिना परदेवताम् ।

कुर्वतां महतीं पूजां जपध्यानरतात्मनाम् ॥ ४८ ॥

उग्रे तपसि सम्स्थानामनन्यायत्तचेतसाम् ।

दशवर्षसहस्राणि दशाहानीव सम्ययुः ॥ ४९ ॥

One day while Indra was seated on a magnificent throne, surrounded by all the celestials, Rishi Narada arrived there. Indra prostrated before that great Rishi, who shone like the sacrificial fire and said, “O revered saint! You are the knower of all Dharmas. You know the past and the present. Your arrival here today is indeed a blessing to me. Your arrival is an indication of the auspicious turn of events, about to occur in the near future. I would like to hear nectarine words from you and overcome all my grief”. Then sage Narada said, “O Lord of the Devas! Now Bhandasura is enchanted by Vishnu Maya. But if he ever overcomes her effect, he shall burn the three worlds like a great sacrificial fire. By your valor, weapons and illusionary powers, it is not possible to win over him. This task cannot be accomplished even in crores of Kalpas, without worshipping Parashakti. Therefore, before your enemy further progresses, take to the worship of Sridevi. Satisfied by your worship, she will ensure your welfare”. Indra then paid suitable respects to the sage along with the other celestials. He then came to the base of mount Himalaya to

perform penance. He reached a place on the banks of river Ganga, which was filled with trees that flowered in all seasons. Accompanied by all the Devas, he began the great worship of Parashakti. From that day, that place came to be known as 'Indraprastha' and became famous as having the capacity to grant all desires. As per the instructions of sage Narada, the celestials continued to perform the great worship of Parashakti, by means of Japa, meditation and severe penance. In this manner, ten thousand years passed as though it were just ten days.

मोहितानथ तान् दृष्ट्वा भृगुपुत्रो महामतिः ।

भण्डासुरं समभ्येत्य निजगाद पुरोहितः ॥ ५० ॥

त्वामेवाश्रित्य राजेन्द्र सदा दानवसत्तमाः ।

निर्भयास्त्रिषु लोकेषु चरन्तीच्छाविहारिणः ॥ ५१ ॥

जातिमात्रेण भवतो हन्ति सर्वान् सदा हरिः ।

तेनैव निर्मिता माया यया सम्मोहितो भवान् ॥ ५२ ॥

भवन्तं मोहितं दृष्ट्वा रन्ध्रान्वेषणतत्परः ।

भवतां विजयार्थाय करोतीन्द्रो महत्तपः ।

यदि तुष्टा जगद्धात्री तस्यैव विजयो भवेत् ॥ ५३ ॥

इमां मायामयीं त्यक्त्वा मन्त्रिभिः सहितो भवान् ।

गत्वा हैमवतं शैलं परेषां विघ्नमाचर ॥ ५४ ॥

एवमुक्तस्तु गुरुणा हित्वा पर्यङ्कमुत्थितः ।

मन्त्रिश्रेष्ठानथाहूय यथा वृत्तान्तमाह सः ॥ ५५ ॥

तच्छ्रुत्वा नृपतिं प्राह श्रुतवर्मा विमृश्य च ।

षष्टिवर्षसहस्राणि राज्यं तव शिवार्पितम् ।

तस्मादप्यधिकं वीर गतमासीदनेकशः ॥ ५६ ॥

अशक्यप्रतिकार्योऽयं यः कालः शिवचोदितः ।

काले तु भोगः कर्तव्यो दुःखस्य च सुखस्य च ॥ ५७ ॥

तदाह भीमकर्माख्यो नोपेक्ष्योऽरिर्यथा बलम् ।

क्रियाविघ्ने कृतेऽस्माभिर्विजयस्ते भविष्यति ॥ ५८ ॥

तव युद्धे महाराज परार्धबलहारिणी ।

दत्ता विद्या शिवेनैव तस्मात्ते विजयः सदा ॥ ५९ ॥

अनुमेने च तद्वाक्यं भण्डो दानवनायकः ।

निर्गत्य सह सेनाभिर्ययौ हिमवतस्तटम् ॥ ६० ॥

तपोविघ्नकरान् दृष्ट्वा दानवान् जगदम्बिका ।

अलङ्घ्यमकरोदग्रे मायाप्राकारमुज्वलम् ॥ ६१ ॥

तं दृष्ट्वा दानवेन्द्रोऽपि किमेतदिति विस्मितः ।

सङ्क्रुद्धो दानवास्त्रेण बभञ्जातिबलेन तु ॥ ६२ ॥

पुनरेव तवग्रेऽभूदलङ्घ्यं सर्वदानवैः ।

वायव्यास्त्रेण तद्वीरो बभञ्ज च ननाद च ॥ ६३ ॥

पौनःपुन्येन तद्भग्नमभूत्पुनरुपस्थितम् ।

एतद्दृष्ट्वा तु दैत्येन्द्रो विषण्णः स्वपुरं ययौ ॥ ६४ ॥

Guru Shukracharya observed that the demons were all enchanted by Vishnu Maya. He went to Bhandasura and said, “O great king! Having sought refuge in you, the demons are able to roam in all the three worlds as per their will, without any fear. However, Vishnu is always interested in killing you demons because of your race. It is he, who has

created Maya to enchant you. Indra is trying to find a loophole to win over you. He is now busy performing a penance to please Parashakti. If the divine Mother is pleased with his penance, he will surely be victorious. Hence, you get rid of this Maya immediately, go to the Himalayas along with your ministers and cause obstacles to the penance of the Devas". Thus alarmed by his guru, Bhandasura immediately got up from his couch and narrated the entire matter to his ministers. Shrutavarma, a minister of Bhandasura, analyzed the situation and said, "O brave king, Lord Parameshwara had granted you sixty thousand years of kingship. Now, much more than sixty thousand years have already passed. It is impossible to go against the period fixed by Parameshwara. It is best to enjoy both happiness and grief in their pre-designated periods". Later another minister named Bhimakarma said, "O Lord! Whether powerful or not, it is never wise to ignore the enemy. If you destroy the penance that is being performed by Indra and the other celestials, you will certainly emerge victorious. Any way, according to Sri Mahadeva's boon, half of the enemy's strength is yours. So you will always be victorious". Bhandasura agreed with Bhimakarma and came to the foothill of Himalayas, along with his army. Sridevi observed the evil intention of Bhandasura and created an illusionary fortress (wall) to prevent him from causing harm to the Devas. Bhandasura, both surprised and angry at the sight of the powerful fortress, immediately used 'Danavastra' to destroy the fortress. Immediately, the fortress reappeared in the same place. Now Bhandasura used 'Vayavyastra' to destroy the barrier. However, every time he destroyed it, the great barrier reappeared and challenged him with its presence. Eventually, the helpless demon had to return to his capital.

तां चाऽदृष्ट्वा जगद्धात्रीं दृष्ट्वा तद्घोरसैनिकम् ।

भयाद्दुद्रुविरे देवा विमुक्तसकलक्रियाः ॥ ६५ ॥

तानुवाच व्रती शक्रो दैत्येन्द्रोऽयमिहागतः ।

अशक्यं समरे योद्धुमस्माभिरखिलैरपि ॥ ६६ ॥

पलायितानामपि नो गतिरन्या न कुत्रचित् ।

कुण्डं योजनविस्तारं सम्यक्कृत्वा तु शोभनम् ॥ ६७ ॥

महायागविधानेन प्रणिधाय हुताशनम् ।

यजाम परमां शक्तिं महामांसैर्वयं सुराः ॥ ६८ ॥

ब्रह्मभूता भविष्यामो भोक्ष्यामो वा त्रिविष्टपम् ।

एवमुक्तास्ततः सर्वे देवाः सेन्द्रपुरोगमाः ।
विधिवज्जुहुवुर्मांम्समुत्कृत्योत्कृत्यमन्त्रतः ॥ ६९ ॥
हुतेषु सर्वमाम्सेषु पादेषु च करेषु च ।
होतुमिच्छत्सु देवेषु कलेवरमशेषतः ॥ ७० ॥
प्रादुर्बभूव परमं तेजःपुञ्जमनूपमम् ।
कोटिसूर्यप्रतीकाशं चन्द्रकोटिसुशीतलम् ।
तन्मध्ये समुदभूच्चक्राकारमनुत्तमम् ॥ ७१ ॥
तन्मध्ये च महादेवीमुदयार्कसमप्रभाम् ।
जगदुज्जिवनाकारां ब्रह्मविष्णुशिवात्मिकाम् ॥ ७२ ॥
सौन्दर्यसारसीमान्तामानन्दरससागराम् ।
जपाकुसुमसङ्काशां दाडिमीकुसुमाम्बराम् ॥ ७३ ॥
सर्वाभरणसम्युक्तां शृङ्गारैकरसालयाम् ।
कृपातरङ्गितापाङ्गनयनालोककौमुदीम् ।
पाशाङ्कुशेक्षु कोदण्ड पञ्चबाणलसत्कराम् ॥ ७४ ॥
तां विलोक्य महादेवीं देवाः सर्वे सवासवाः ।
प्रणेमुर्मुदितात्मानो भूयो भूयोऽखिलात्मिकाम् ।
तथा विलोकितास्सद्यस्ते सर्वे विगतज्वराः ॥ ७५ ॥
सम्पूर्णाङ्गा धृढतरा वज्रदेहा महाबलाः ।
तुष्टुवुश्च तदा देवीमम्बिकामखिलार्थदाम् ॥ ७६ ॥

Meanwhile the Devas, unable to find Sridevi and horrified at the sight of Bhandasura's army, ran away in fright, forgetting their worship. Later on Indra gathered all the Devas and said, “O celestials, Bhandasura has reached even this secret place. It is impossible to defeat him in battle. There is no refuge for us other than Parashakti. Let us construct an auspicious Agnikunda (fire pit) having the dimension of one Yojana (approximately equal to four Kroshas or eight to nine miles). Let us propitiate Yajneshwara there by means of Mahayaga (great sacrifice). Then we shall worship the supreme Parashakti by offering our flesh. If the divine mother is pleased, we shall obtain our prosperity and kingdom. Else, we will at least gain salvation”. The Devas then constructed the fire pit and offered the flesh from their hands and legs, into the sacrificial fire, chanting the relevant mantras. They then proceeded to offer themselves in entirety to Parashakti by jumping into the sacrificial fire. And lo! From the fire pit, there emerged an immensely bright form of Srichakra that had the brilliance of crores of suns and the cooling effect of crores of moons. In the center of the Chakra, was seated Sri Lalita Mahatripurasundari, who had the brilliance of the rising sun. She appeared to be the congregation of the trinity and as granting glory to the essence of beauty in the entire universe. She had the ruddy complexion of hibiscus flower and wore a garment, which was of the color of Dadimi flower. She was decorated in all possible ways and appeared as the very personification of the sentiment of erotica or romance. Her beautiful eyes showered grace on the devotees, creating the illusion of moonlight. She held noose, hook, bow and five arrows in her hands. Filled with ecstasy, Indra and the other celestials bowed down at her feet again and again. The divine mother looked at them gracefully- just once and as a result, they lost all fear. They became bodily strong and powerful. They then began to praise Sridevi with a wonderful Stotra called 'Lalita Stavaraja'.

NOTE: This episode of the emergence of Sri Lalita Mahatripurasundari from Chidgnikunda is described in detail elsewhere. Here is a short description of this episode. All the Devas, including Brahma, unable to bear the torment of Bhandasura, approached Lord Narayana. He observed the weak condition of the Devas and said, “Your present condition is due to the invisible foul play of Bhandasura. Even I have lost the affinity for Goddess Lakshmi. What to say about other lesser beings? Myself, Brahma and Rudra are Karana Purushas (causal beings for the manifest creation). Even then, because we are also inhabiting this creation, even we cannot escape the torture of Bhandasura. There is however one Almighty God who is beyond this manifest Brahmanda. He is called Maha Shambhu and he is a manifestation of the supreme Parabrahman - Kameshwara. Parashakti is constantly in His
Company. He is devoid of form. He is not dependent on anything. He has no modifications. He is greater than the greatest. He is the ultimate. He is not influenced by the foul play of Bhandasura, who is born from the ashes of Manmatha. He can rescue us from our difficulties. Therefore, let us all take refuge in Him and praise Him. Follow me”. So saying, Sri Hari led all the Devas to the brim of the Brahmanda (Universe). There was a huge wall like fence there. The Devas summoned the celestial elephants to break the wall. After toiling continuously for one year, a breach was formed in the wall. After passing through the breach, they saw Chinmaya Akasha, which was Niralamba

(independent), Nirajnana (untainted) and which was devoid of the five elements. They all stood in that Chinmaya Akasha and sang the glory of Maha Shambhu, who was of the form of Chidakasha. Then Maha Shambhu appeared before them. He was dark like clouds. He had two hands. He was holding a Shoola (spear) in one hand and a Kapala (skull) in the other. He had three eyes. Parashakti also appeared before them. She was holding Aksha Mala (rosary of beads) and Pustaka (book) in Her hands. She was bright and cool like the moon. The Devas prayed to Maha Shambhu to teach them the method of Mahayaga to appease Lalita Mahatripurasundari. As per their request, Maha Shambhu explained, " O Devas! In this Maha Yaga (great fire sacrifice), I am (assuming the form of Vayu) the Hota (the priest who makes the offerings in a Homa). My Chidagni (the fire of consciousness) itself is the fire in this Yagna. The last of the seven seas, i.e., Jala Samudra (Water Sea) has now dried up. The huge pit so formed itself is the Homa Kunda (fire pit where Homa is performed). The remaining six great oceans constitute the six drops of ghee, which is used as offering. Srishti (creation) is of five types (i) Manasa Srishti (creation by the power of the mind or will - this refers to the creation of the higher beings like the Devas and Rishis) (ii) Jarayavee Srishti (creation-taking place through the womb. E.g. Human beings), (iii) Anda Srishti (creation taking place through eggs) (iv) Swedaja Srishti (creation taking place through sweat) and (v)Udbhijja Srishti (creation taking place by sprouting). These five Srishtis (creations) are the sacrifice animals in this Maha Yaga. Bhoomi (land), Parvata (mountains), Jala (water), Vayu (air) and Akasha (space) - these five are the substances used in this fire sacrifice. At the end of this great fire sacrifice, all of you (the performers of the Yaga) should jump in to the Homa Kunda (fire pit). While doing so, you must possess absolute devotion. Then, Lalita Parameshwari will manifest. She will be seated in a chariot called Chakra Raja Ratha. She will create Parabrahma in the name of Kameshwara and will have Him as Her consort. This couple will re-create the entire universe, which will turn out to be more beautiful than the previous creation. Lalita Parameshwari will bring Manmatha back to life. N. She will create four weapons, namely (i) Ikshu Dhanus - a bow of sugarcane (ii) five Pushpa Banas - flower arrows (iii) Paasha - noose and (iv) Ankusha (a hook, especially an elephant driver's hook). With the help of these weapons, she will destroy Bhandasura and bring Manmatha back to life". At the beginning of this great sacrifice, Maha Shambhunatha, accompanied by Parashakti, started chanting the Lalita Mahamantra and entered the Universe in the form of the seven-layered Vayu (air). Parashakti assumed the form of His Kriya Shakti (energy of action). With the help of Kriya Shakti, Vayu blew the Jala Samudra with all his energy. The Jala Samudra (water ocean) became totally dry. In the pit thus formed, He kindled the Chidagni with the help of fire emanating from his third eye. This Agni raged from the Patala (a region in the nether-world) to the Brahma Loka. He decorated the periphery of the Homa Kunda with the stars just as one decorates a sacrificial fire pit with flowers. After this, he performed the Yaga as ordained by the Vedas. He used the Pralaya Meghas (clouds appearing during Pralaya), namely Pushkala and Aavartaka as Srik and Sruva (the two spoons which are used to offer ghee in fire worship). As the Homa progressed, the Chidagni emanating from it spread to a vast area. He then offered the first six oceans and then the five-fold creations to this Agni. In the end, the gods too decorated themselves and sat on the Srik and Sruva, ready to be offered to Agni. Maha Shambhunatha offered them to Agni. After this, Maha Shambhunatha discarded his Vayu form and assumed his real

form. He then chanted 8 special mantras and performed 8 Homas. At the end of the Homa, Lalita Devi came out of the Chidagni Homa Kunda, seated on a special chariot called “Chakra Raja Ratha”. The Sri Chakra Raja Ratha had the following dimensions: Width of four Yojanas, Height of ten Yojanas, nine Parvas (landings), the four Vedas for the wheels, the four-fold aims (Purusharthas) for the horses, absolute bliss as the flag. The seat at the topmost landing was the Bindu Peetha. The chariot was of the form of Meru Prastara. The material that was used to make the chariot was 'Tejas' (pure energy).

॥ श्री ब्रह्माण्डपुराणे उत्तरखण्डे हयग्रीवागस्त्यसम्वादे श्री ललितोपाख्याने सप्तमः ॥

॥ बालार्कमण्डलाभासां चतुर्बाहुं त्रिलोचनाम् ।
पाशाङ्कुशधनुर्बाणान् धारयन्तीं शिवां भजे ॥ ॐ ऐं ह्रीं श्रीं साङ्गायै सायुधायै सवाहनायै सपरिवारायै सर्वदेवतास्वरूपिण्यै श्रीललितामहात्रिपुरसुन्दर्यै परब्रह्मणे नमः ॥

॥ अथ अष्टमोऽध्यायः ॥

ध्यानम्

देवेन्द्रस्य समस्त देवसहितस्यानन्दरूपा शिवा
भक्त्यानन्यतपोभिरुग्रहवनैराराधिता शाम्भवी ।
श्रीविद्या ललिता पराद्भुतरथेनाविर्बभूवाद्भुता
वन्दे तां शिवसुन्दरेशमहिषीं श्रीमीननेत्राभिदाम् ॥

[ श्रीललितास्तवराजः - प्रसन्नया देव्या देवानां वरप्राप्तिः - भण्डासुरवधाय तस्याः प्रतिज्ञा ]

ॐ ऐं ह्रीं श्रीं

जय देवि जगन्मातर्जय देवि परात्परे ।

जय कल्याणनिलये जय कामकलात्मिके ॥ १ ॥

जय कामेशवामाक्षि जय कामाक्षि सुन्दरि ।

ज्याऽखिलसुराराध्ये जय कामेशि कामदे ॥ २ ॥

जय ब्रह्ममये देवि ब्रह्मानन्दरसात्मिके ।

जय नारायणि परे नन्दिताशेशविष्टपे ॥ ३ ॥

जय श्रीकण्ठदयिते जय श्री ललिताम्बिके ।

जय श्रीविजये देवि विजयश्री समृद्धिदे ॥ ४ ॥

जातस्य जायमानस्य चेष्टापूर्तस्य हेतवे ।

नमस्तस्यै त्रिजगतां पालयित्र्यै नमो नमः ॥ ५ ॥

कला मुहूर्तकाष्ठाहर्मासमम्वत्सरात्मने ।

नमः सहस्रशीर्षायै सहस्रमुखलोचने ॥ ६ ॥

नमः सहस्रहस्ताब्ज पादपङ्कजशोभिते ।

अणोरणुतरे देवी महतोऽपि महीयसि ॥ ७ ॥

परात्परतरे मातस्तेजस्त्वं तेजसामपि ।

अतलं तु भवेत्पादौ वितलं जानुनी तव ॥ ८ ॥

रसातलं कटीदेशः कुक्षिस्ते धरणी भवेत् ।

हृदयं तु भुवर्लोकः स्वस्ते मुखमुदाहृतम् ॥ ९ ॥

दृशश्चन्द्रार्कदहना दिशस्ते बाहवोऽम्बिके ।

मरुतस्ते तनूच्छ्वासा वाचस्ते श्रुतयोऽखिलाः ॥ १० ॥

क्रीडा ते लोकरचना सखा ते चिन्मयश्शिवः ।

आहरस्ते सदानन्दो वासस्ते हृदयं सताम् ॥ ११ ।

दृश्यादृश्यस्वरूपाणि रूपाणि भुवनानि ते ।

शिरोरुहा नभस्ते तु तारकाः कुसुमानि ते ॥ १२ ॥

धर्माद्या बाहवस्ते स्युरधर्माध्यायुधानि ते ।

यमाश्च निमयाश्चैव करपादरुहास्तथा ॥ १३ ॥

स्तनौ स्वाहा स्वधाकारौ लोकोज्जीवनकारकौ ।

प्राणायामस्तु ते नासा रसना ते सरस्वती ॥ १४ ॥

प्रत्याहारस्त्विन्द्रियाणि ध्यानं ते धीस्तृडासनम् ।

मनस्ते धारणा शक्तिर्हृदयं ते समाधिका ॥ १५ ॥

महीरुहास्तेऽङ्गरुहाः प्रभातं वसनं तव ।

भूतं भव्यं भविष्यच्च नित्यं च तव विग्रहम् ॥ १६

यज्ञरूपा जगद्धात्री विश्वग्रूपा च पावनी ।

आधारं त्वां प्रपश्यन्ति न सम्यङ्ग्निखिलाः प्रजाः ॥ १७ ॥

हृदयस्थापि लोकानां अदृश्या मोहनात्मिका ।

नामरूपविभागं च या करोति स्वलीलया ॥ १८ ॥

तान्यधिष्ठाय तिष्ठन्ती तेष्वसक्ता च कामदा।

नमस्तत्स्यै महादेव्यै सर्वशक्त्यै नमो नमः॥ १९॥

या देवी परमाशक्तिः परब्रह्माभिधायिनी।

ब्रह्मानन्दाभिदायिन्यै तस्यै देव्यै नमो नमः॥ २०॥

यदाज्ञया प्रवर्तन्ते वह्निसूर्येन्दुमारुताः।

पृथिव्यादीनि भूतानि तस्यै देव्यै नमो नमः॥ २१॥

या ससर्ज विधातारं सर्गादावादिभूरियं।

दधार स्वयमेवैका तस्यै देव्यै नमो नमः॥ २२॥

यया धृता तु धरणी ययाऽकाशाद्यमेयया।

यस्यामुदेति सविता तस्यै देव्यै नमो नमः॥ २३॥

यदन्तरस्थं त्रिदिवं यदाधारोऽन्तरिक्षकः।

यन्मयश्चाखिलो लोकः तस्यै देव्यै नमो नमः॥ २५॥

यत्रोदेति जगत्कृत्स्नं यत्र तिष्ठति निर्भरम्।

यत्रान्तमेति काले तु तस्यै देव्यै नमो नमः॥ २६॥

नमो नमस्ते रजसोभवायै नमो नमः सात्विकसम्स्थितायै।

नमो नमस्ते तमसो हरायै नमो नमो निर्गुणतः शिवायै॥ २६॥

नमो नमस्ते जगदेकमात्रे नमो नमस्ते जगदेकपित्रे।

नमो नमस्तेऽखिल तन्त्ररूपे नमो नमस्तेऽखिल यज्ञरूपे॥ २७॥

नमो नमो लोकगुरुप्रधाने नमो नमस्तेऽखिलवाग्विभूत्यै।

नमोऽस्तु लक्ष्म्यै जगदेकतुष्ट्यै नमो नमः शाम्भवि सर्वशक्त्यै ॥ २८ ॥

अनादिमध्यान्तमपाञ्चभौतिकं ह्यवाङ्मनोगम्यमतर्क्यवैभवम् ।

अरूपमद्वन्द्वमदृष्टिगोचरं प्रभावमग्र्यं कथमम्ब वर्ण्यते ॥ २९ ॥

प्रसीद विश्वेश्वरि विश्ववन्दिते प्रसीद विश्वेश्वरि वेदरूपिणि ।

प्रसीद मायामयि मन्त्रविग्रहे प्रसीद सर्वेश्वरि सर्वरूपिणि ॥ ३०

Indra, Brahma, Vishnu and the other celestials started praising Sri Lalita Mahatripurasundari as follows: "O mother of the universe! Thou are beyond the best. Devi, be victorious (over Bhandasura) to grant the desire of your devotees. You are the treasure house of everything auspicious. You are indeed the secret Kamakala. You are the left eye of Parabrahman Kameshwara. You are mother Kamakshi, the one who fulfills all desires by mere sight. You are worshipped by the greatest of the Devas. You are Kameshwari, the consort of Kameshwara. You are the one who grants all wishes. O Devi, you indeed are Parabrahman. Your form is nothing but the pure bliss of Parabrahman. You are Narayani, Paradevata and the giver of bliss to all the worlds. O consort of Srikantha! O mother Lalita, O Sri Vijaya, you bring abundance in prosperity and victory. O mother, you are the giver of boons to all those born and also those who are going to be born in the future. We bow down to thou who are the protector of the three worlds. Kalaa (a division of time variously computed as one minute, 48 seconds or 8 seconds), Muhurta (a period of 48 minutes), Kashta (a measure of time equal to 1/30 of a Kalaa), Ahar (day), Maasa (month), Samvatsara (year) - you assume the form of all these measures of time. We bow down to thou whose form has a thousand heads, faces and eyes. O mother, you are beyond the ultimate. You grant brightness to everything bright. Your feet are nothing but Atala Loka (a nether world). Vitala Loka is your knee. Rasatala Loka is your waist. The earth is your abdomen. Your heart is the Bhuvar Loka. Heaven is your face. The sun, moon and fire are your three eyes. The directions are your shoulders. Your soft breath is the monsoon wind. Vedas and all the other scriptures are nothing but your words. The creation of this visible world is your divine play. Your partner in this divine sport is none other than Kameshwara, who is pure consciousness. Eternal bliss is your food. The hearts of the noble is your dwelling place. All the worlds, some seen and some unseen, are your forms. The sky is your hair. the stars are the flowers that decorate your hair. The four goals of life (Dharma, Artha, Kama and Moksha) are your four hands. Yamas and Nimayas (as mentioned in the Patanjala Darshana) are the nails of your hands and feet. Swaha and Swadha, which rejuvenate life in the entire world, are your breasts. Pranayama is your nose. Saraswati, the goddess of learning is your tongue. Pratyahara is your sense organ. Dhyana is your intellect. Asana (posture) is your longing or thirst. Dharana is your mind. Your heart is of the nature of Nirvikalpa Samadhi. The trees are the hair in your body. Sunrise is your garmnent. Past, present, future and eternal

existence are your forms. You are the very essence of Yajnas, you are the sustainer of the universe. It is you who manifests as this universe. Not every one can easily understand the supreme truth that you are the supreme cause and support for everything. O Mahamaya! Though you reside in the hearts of all creatures, they do not recognize you as their very self. You have, according to your sweet will, divided the external creation in terms of name and form, and it is you who presides over the same. You are the Mahadevi and the essence of all Shaktis. You are that great Parashakti, who shines with the epithet 'Parabrahman'. You form is of the nature of the supreme bliss of Brahman. It is your orders that the sun, moon, fire and the other Pancha Bhootas perform their respective duties. In the beginning of the creative cycle, you created Brahma (the creator) and supported the entire creation. The mighty earth and sky are held by you. You are beyond all measurements. It is in you that the sun rises. The heavens are stationed in you. The entire universe is but your divine form. The entire world rises in you, is sustained by you and during the final destruction, dissolves into you. You arise in Rajas, preside over Satva and destroy Tamas. Thou are beyond these three Gunas. You are the only father-mother figure of this entire universe. You are the essence of all Tantras and Yajnas. You are the greatest of the Gurus n this universe. You are indeed ocean of Vedas. As Lakshmi, it is you who brings satisfaction to living beings. It is you who are Shambhavi, the supreme Shakti. You have neither an end nor a beginning. You do not have any association with the five physical elements. Your glory is beyond the reach of words and thought. You are formless and non-dual. It is impossible to see you through bare, physical eyes. How is that possible for us to describe your infinite glory? O Devi! The mistress of the universe, the consort of Vishweshwara, Mahamaya, the queen of all mantras, mother, please be graceful! "

NOTE : An alternate version of the creation of the universe is described in another scripture as follows: Sri Lalita Parameshwari initiated creation by extending Herself in both male and female forms. From the left eye, which was of the nature of Soma (moon) came Brahma and Lakshmi Devi. From the right eye, which was of the nature of Surya (sun) came Vishnu and Parvati. From the third eye, which was of the nature of Agni (fire), came Rudra and Saraswati. Lakshmi & Vishnu, Shiva & Parvati and Brahma & Sarasvati became couples, as per Sridevi's orders and took to the duties designated to them. Lalita Devi directed them to continue the process of Creation. She herself continued to create certain things. From her long hair she created darkness. From her eyes, she created the sun, the moon and the fire. From the pendent hanging in front of her forehead came the stars. From the chain above her forehead came the nine planets. From the eyebrows, she created the penal code. From her breath, she created the Vedas. From her speech, she created poetry and plays. From her chin she created the Vedangas. From the three lines in her neck, she created various Shastras. From her breasts, she created mountains. From her mind, she created the power of bliss. From her fingernails, she created the ten incarnations of Vishnu. From her palms, she created the four Sandhyas. She created other things as narrated in the Purusha Sukta. From her heart, she created Bala Devi. From her intellect, she created Shyamala Devi. From her ego, she created Varahi Devi. From her smile, she created Vighneshwara. From the Ankusha (a special hook), she created Sampatkaree Devi. Form the noose, she created Ashwaa Roodha Devi. From her cheeks, she created Nakuleshvari Devi. From her Kundalini Shakti, she created

Gayatri. From the eight wheels of the Chakra Raja chariot, she created eight Devatas. In the ninth landing, in the Bindu Peetha, she herself was seated. Afterwards, she created the Devas who would protect the Chakra Raja chariot. After having thus completed the great creation, Lalita Devi requested her consort, Shiva Kameshwara to created the Shiva Chakra. He immediately brought out a big humming sound and from this, the Shiva Chakra Devatas numbering twenty-three manifested. Later, Lalita Devi crowned Shyamala Devi as the prime minister. Therefore Shyamala Devi is called Mantrini Devi. Lalita Devi handed over the finger ring to Mantrini Devi. She made Varahi Devi the chief of her army. Therefore Varahi Devi is also called as Dandanaathaa Devi. Lalita Devi created a mace (a weapon) from her eyebrows and gave it to Dandanathaa Devi. After this, Lalita Devi created two chariots from her chariot and gave them to Mantrini Devi and Dandanatha Devi. Mantini Devi's chariot is called “Geya Chakra Ratha”. This chariot used to make musical sounds whenever it moved. Dandanatha Devi's chariot is called “Kiri Chakra Ratha”. Later, Lalita Devi hummed with rage. From this hum, 64000000 Yoginis and Bhairavas were born. Innumerable Shakti Senas (armies) were also created by her hum.

इति स्तुत्वा महादेवीं देवाः सर्वे सवासवाः ।

भूयो भूयो नमस्कृत्य शरणं जग्मुरञ्जसा ॥ ३१ ॥

ततः प्रसन्ना सा देवी प्रणतं वीक्ष्य वासवम् ।

वरेण छन्दयामास वरदाऽखिलदेहिनाम् ॥ ३२ ॥

इन्द्रोऽवाच

यदि तुष्टासि कल्याणि वयं दैत्येन्द्रनिर्जिताः ।

दुर्धरं जीवितं देवि त्वां गताः शरणार्थिनः ॥ ३३ ॥

श्री देव्युवाच

अहमेव विनिर्जित्य भण्डं दैत्यकुलेश्वरम् ।

अचिरात्तव दास्यामि त्रैलोक्यं सचराचरम् ॥ ३४ ॥

निर्भया मुदितास्सन्तु सर्वे देवगणास्तथा ।

ये स्तुवन्ति च मां भक्त्या स्तवेनानेन मानवाः ।

भाजनं ते भविष्यन्ति धर्मश्रीयशसां सदा ॥ ३५ ॥

विद्याविनयसम्पन्ना नीरोगा दीर्घजीविनः ।

पुत्रमित्रकलत्राढ्या भवन्तु मदनुग्रहात् ॥ ३६ ॥

इति लब्धवरा देवा देवेन्द्रोऽपि महाबलः ।

आमोदं परमं जग्मुस्तां विलोक्य मुहुर्मुहुः ॥ ३७ ॥

In this way, Indra and the other celestials praised Sri Lalita in many ways. They prostrated before her again and again and sought refuge at her lotus feet. Mother Lalita Parameshwari, pleased with the hymn, looked at Indra and said, "O Indra! I am pleased. I will grant you a boon". Then Indra said, "O great goddess, due to Bhandasura, my life has become unbearable. O auspicious one! If you are really pleased with me, please protect me (from Bhandasura)". Sridevi said, "Indra! In near future, I shall defeat Bhandasura, the king of the demons and grant you the lordship of the three worlds. Cast away all your fears and cheer up. All those men, who shall praise me with this beautiful hymn (named 'Lalita Stavaraja'), shall obtain dharma, wealth and fame constantly. They will obtain qualities like humility, knowledge, health, progeny and longetivity". Then, Indra and the other Devas looked at Sridevi again and again, bowed down repeatedly and felt supremely blissful.

॥ श्री ब्रह्माण्डपुराणे उत्तरखण्डे हयग्रीवागस्त्यसम्वादे श्री ललितोपाख्याने

अष्टमः ॥

॥ बालार्कमण्डलाभासां चतुर्बाहुं त्रिलोचनाम् ।

पाशाङ्कुशधनुर्बाणान् धारयन्तीं शिवां भजे ॥ ॐ ऐं ह्रीं श्रीं  साङ्गायै सायुधायै सवाहनायै सपरिवारायै सर्वदेवतास्वरूपिण्यै श्रीललितामहात्रिपुरसुन्दर्यै परब्रह्मणे नमः ॥

॥ अथ नवमोऽध्यायः ॥

ध्यानम्

देवेन्द्रादि सुरेश्वरास्तव वरैर्यस्याः प्रसादेन ते
लब्धाभीष्टवराः स्युरत्र भगवत्यम्बाद्भुतानन्ददे ।
सर्वज्ञे परदेवते पशुपतेः प्रेमास्पदे शङ्करि
मीनाक्षी ललिते प्रसीद सततं श्री सुन्दरेशप्रिये ॥

[ श्रीदेवी दर्शनाय ब्रह्माद्यागमनं - तस्याः श्रीशङ्कर एव पतिर्भवितुमर्हतीति ब्रह्मणो निर्धारः - शङ्करस्य कामेश्वररूपेणाविर्भावः - तं कामशङ्करं वरयेति श्री ललिताम्बिकां प्रति ब्रह्मणः प्रार्थना ]

ॐ ऐं ह्रीं श्रीं

श्री हयग्रीव उवाच

एतस्मिन्नेव काले तु ब्रह्मा लोकपितामहः ।
आजगामाथ देवीशीं द्रष्टुकामो महर्षिभिः ॥ १ ॥

आजगाम ततो विष्णुरारूढो विनतासुतम् ।

शिवोऽपि वृषभारूढः समायातोऽखिलेश्वरीम् ॥ २ ॥

देवर्षयो नारदाद्याः समाजग्मुर्महेश्वरीम् ।

आययुस्तां महादेवीं सर्वे चाप्सरसां गणाः ।

विश्वावसुप्रभृतयो गन्धर्वाश्चैव यक्षकाः ॥ ३ ॥

ब्रह्मणाथ समादिष्टो विश्वकर्मा विशाम्पतिः ।

चकार नगरं देव्या यथामरपुरं तथा ॥ ४ ॥

ततो भगवती दुर्गा सर्वमन्त्राधिदेवता ।

विद्याधिदेवता श्यामा समाजग्मतुरम्बिकाम् ॥ ५ ॥

ब्राह्मयाद्या मातरश्चैव स्वस्वभूतगणावृताः ।

सिद्धयोऽप्यणिमाद्याश्च योगिन्यश्चैव कोटिशः ॥ ६ ॥

भैरवाः क्षेत्रपालाश्च महशास्ता गणाग्रणीः ।

महगणेशः स्कन्दश्च वटुको वीरभद्रकः ।

आगत्य ते महादेवीं तुष्टुवुः प्रणतास्तथा ॥ ७ ॥

Hayagriva continued the narration, “ O Agastya! Brahma, the creator of the world, along with all the sages, came to visit Sridevi and have her Darshan. Vishnu, on his vehicle Garuda and Lord Shiva on his bull Nandi, came to see the supreme queen of the universe. Narada and the other celestial sages, groups of celestial damsels, Vishwavasu and other Gandharvas (celestial musicians) and Yakshas (a class of demi-gods) also arrived to have a Darshan of Lalita Mahatripurasundari. As per the orders of Brahma, Vishwakarma, the celestial sculptor, constructed a beautiful city for the residence of Sridevi. Then, goddess Durga, the mistress of all Mantras arrived to see Sri Lalita, along with Sri Shyamala, the goddess of learning. The other deities who came to have a Darshan of Sri Lalita Mahatripurasundari included the seven Matrika goddesses (Brahmi, Maheshwari, Kaumari, Vaishnavi, Varahi, Mahendri and Chamunda), the eight great accomplishments

or Siddhis (Animaa, Laghimaa, Mahimaa, Garimaa, Ishitaa, Vashitaa, Prapti and Prakamyaa), crores of Bhairavas, Kshetrapalas, Yoginis, Mahaashaastaa (the leader of Bhoota Ganas), Mahaganesha, Kartikeya, Vatuka Bhairava and Veerabhadra. They prostrated at the lotus feet of the supreme goddess and praised Her in various ways.

तदा तु नगरीं रम्यां साट्टप्राकारतोरणाम् ।

गजाश्वरथशालाढ्यां राजवीधीविराजिताम् ॥ ८ ॥

सामन्तानाममात्यानां सैनिकानां द्विजन्मनाम् ।

वैतालदासदासीनां गृहाणि रुचिराणि च ॥ ९ ॥

मध्ये राजगृहं दिव्यं द्वारगोपुरशोभितम् ।

शालाभिर्बहुभिर्युक्तं सभाभिरुपशोभितम् ॥ १० ॥

सिम्हासनसभां चैव नवरत्नमयीं शुभाम् ।

मध्ये सिम्हासनं दिव्यं चिन्तामणिविनिर्मितम् ॥ ११ ॥

स्वयम्प्रकाशमद्वन्द्वमुदयादित्यसन्निभम् ।

विलोक्य चिन्तयामास ब्रह्मा लोकपितामहः ॥ १२ ॥

यस्त्वेतत्समधिष्ठाय वर्तते बालिशोऽपि वा ।

पुरस्यास्य प्रभावेन सर्वलोकधिपो भवेत् ॥ १३ ॥

न केवला स्त्री राज्यार्हा पुरुषोऽपि तया विना ॥ १४ ॥

मङ्गलाचारसम्पन्नं महापुरुषलक्षणम् ।

अनुरूपाङ्गनायुक्तं अभिषिञ्चेदिति स्मृतिः ॥ १५ ॥

विभातीयं वरारोहा मूर्ता शृङ्गारदेवता ।

वरोऽस्यास्त्रिषु लोकेषु न चान्यः शङ्करादृते ॥ १६ ॥

जटिलो मुण्डधारी च विरूपाक्षः कपालधृत्।

कल्माषी भस्मदिग्धाङ्गः श्मशानस्थो विभीषणः॥ १७॥

अमङ्गलास्पदं नैनं वरयेत्सा सुमङ्गला॥ १८॥

That Devipura (city of the great goddess) began to look supremely beautiful, filled with towers, arched doorways, walls, stables of elephants and horses, high ways and houses of subordinates, ministers, soldiers, Brahmanas, minstrels, maids and others. In the middle of the city was a royal palace, which was decorated with doors and towers. It had a number of rooms and assembly halls. In the center of the main assembly hall, which was studded with the nine gems, there was a throne made of Chinatamani gems (gems that are credited to have the power to grant all that one desires). This throne emitted its own light and was glorious like the rising sun. It was the only one of its kind. Looking at this luxury, Brahma thought, "Oh! A person, who sits on this throne, even if foolish, shall become the ruler of the entire universe by virtue of this throne. A lady or a man, are not eligible to rule a country alone. They have to rule a country together. The Smriti says that a gentleman with righteous behavior, accompanied by a virtuous wife, should be made the king of a nation. This great goddess shines like the very embodiment of romance. There can be no better match for her in all the three worlds, other than Lord Shiva. However, Shiva has long matted locks, has a distorted eye, holds a skull, is dirty, has an ash-smeared body, resides in the crematorium and looks terrible. Will this lady, who seems to be the very personification of auspiciousness, ever wed Shiva, who looks so inauspicious?"

इति चिन्तयमानस्य ब्रह्मणोऽग्रे महेश्वरः।

कोटिकन्दर्पलावण्ययुक्तो दिव्यशरीरवान्॥ १९॥

दिव्याम्बरधरः स्रग्वी दिव्यगन्धानुलेपनः।

किरीटहारकेयूरकुण्डलाद्यैः अलङ्कृतः।

प्रादुर्बभूव पुरुषो जगन्मोहरूपधृत्॥ २०॥

तं कुमारमथालिङ्ग्य ब्रह्मा लोकपितामहः।

चक्रे कामेश्वरं नाम्ना कमनीयवपुर्धरम्॥ २१॥

तस्यास्तु परमाशक्तेरनुरूपो वरस्त्वयम्।

इति निश्चित्य तेनैव सहितस्तामथाययौ॥ २२॥

अस्तुवम्स्ते पराशक्तिं ब्रह्मविष्णुमहेश्वराः॥ २३॥

तां दृष्ट्वा मृगशावाक्षीं कुमारो नीललोहितः।

अभवन्मन्मथाविष्टो विस्मृत्य सकलाः क्रियाः॥ २४॥

सापि तं वीक्ष्य तन्वङ्गी मूर्तिमन्तमिव स्मरम्।

मदनाविष्टसर्वाङ्गी स्वानुरूपममन्यत॥ २५॥

अन्योन्यालोकनासक्तौ तावुभौ मदनातुरौ।

सर्वभावविशेषज्ञौ धृतिमन्तौ मनस्विनौ।

परैरज्ञातचारित्रौ मुहूर्तं स्वस्थचेतसौ॥ २६॥

अथोऽवाच महादेवीं ब्रह्मा लोकैकनायिकाम्।

इमे देवाश्च ऋषयो गन्धर्वाप्सरसां गणाः।

त्वामीशां द्रष्टुमिच्छन्ति सप्रियां परमासने॥ २७॥

को वाऽनुरूपस्ते देवि प्रियो धन्यतमः पुमान्।

लोकसम्रक्षणार्थाय भजस्व पुरुषं परम्॥ २८॥

राज्ञी भव पुरस्याऽस्य स्थिता भव वरानने।

अभिषिक्तां महाभागे देवर्षिभिरकल्मषैः॥ २९॥

साम्राज्यलक्ष्मीसम्युक्तां सर्वाभरणसम्युताम्।

सप्रियामासनगतां द्रष्टुमिच्छामहे वयम्॥ ३० ॥

As Brahma was thinking so, Lord Shankara appeared in front of him in the form of Sri Kameshwara. He had the beauty of crores of cupids and had a divine physique. He wore heavenly garments, wore garlands of flowers and had a body that was anointed with fragrant sandal paste. He was decorated with a crown, necklace, bracelet, earrings and many other ornaments. His beautiful form was capable of enchanting the entire world. Brahma at once embraced this young man and named him 'Kameshwara'. Then Brahma decided that Kameshwara was the perfect match for Parashakti and went to see Sridevi, along with Kameshwara. Brahma, Vishnu and Rudra praised Parashakti by means of a hymn. As soon as Kameshwara saw the deer-eyed Lalita, he immediately fell in love with her. The supremely beautiful goddess saw Kameshwara, who had the beauty of crores of cupids, fell in love with him and decided that he was the perfect match for her. Sri Lalita and Sri Kameshwara (who are the knowers of all emotional specialties, who have conquered the senses and whose ways are not understandable by the rest) were immersed in looking at each other, for a moment. Then Brahma addressed Sridevi thus, “O great Devi! All these celestials, sages and damsels wish to see you seated on this throne, along with your spouse. Who is that blessed man, suitable to be your husband? For the sake of protecting the worlds, please wed such a gentleman”.

॥ श्री ब्रह्माण्डपुराणे उत्तरखण्डे हयग्रीवागस्त्यसम्वादे श्री ललितोपाख्याने

नवमः ॥

॥ बालार्कमण्डलाभासां चतुर्बाहुं त्रिलोचनाम् ।

पाशाङ्कुशधनुर्बाणान् धारयन्तीं शिवां भजे ॥ ॐ ऐं ह्रीं श्रीं साङ्गायै सायुधायै

सवाहनायै सपरिवारायै सर्वदेवतास्वरूपिण्यै श्रीललितामहात्रिपुरसुन्दर्यै परब्रह्मणे

नमः ॥

॥ अथ दशमोऽध्यायः ॥

ध्यानम्

ब्रह्मानन्दैकवार्धिः सुरवरविनुतः पूर्णमाङ्गल्यवेषः

शम्भुः शक्त्याप्यमेयो हरिविधिसुरराड्लोकपलैश्च सेव्यः।
कामेशाख्यप्रियोऽभूदनुपमविभवात्सर्वकामेश्वरीशः
तत्वामीशं सदाऽहं परतरमुमया सुन्दरेशं भजेऽहम्॥

ॐ ऐं ह्रीं श्रीं

श्री हयग्रीव उवाच
तच्छ्रुत्वा वचनं देवी मन्दस्मितमुखाम्बुजा।
उवाच सा ततो वाक्यं ब्रह्मविष्णुमुखान्सुरान्॥ १॥

श्रि देव्युवाच
स्वतन्त्राऽहं सदा देवाः स्वेच्छाचारविहारिणी।
ममानुरूपचरितो भविता तु मम प्रियः॥ २॥
तथेति तत्प्रतिश्रुत्य सर्वैः देवैः पितामहः।
उवाच च महादेवीं धर्मार्थसहितं वचः॥ ३॥
कालक्रीता क्रयक्रीता पितृदत्ता स्वयम्युता।
नारीपुरुषयोरेवमुद्वाहस्तु चतुर्विधः॥ ४॥
कालक्रीता तु सा वेश्या दासी स्यात्क्रयसम्युता।
भार्या स्यात्पितृदत्ता तु गान्धर्वी तु स्वयम्युता।

समधर्मेण युक्ता सा भर्या पित्रर्पिता यथा ॥ ५ ॥

ब्रह्मादयस्तु तामूचुः परब्रह्मस्वरूपिणीम् ॥ ६ ॥

यदद्वैतं परब्रह्म सदसद्भाववर्जितम् ।

चिदानन्दात्मकं तस्मात्प्रकृतिः समजायत ॥ ७ ॥

त्वमेवासि च तद्ब्रह्म प्रकृतिः सा त्वमेव हि ।

त्वमेवानादिरखिला कारणाकरणात्मिका ।

त्वामेव हि विचिन्वन्ति योगिनः सनकादयः ॥ ८ ॥

सदसत्कर्मरूपां च व्यक्ताव्यक्तोदयात्मिकाम् ।

त्वामेव हि प्रशम्सन्ति पञ्चब्रह्मस्वरूपिणीम् ॥ ९ ॥

त्वमेव हि सृजस्यादौ त्वमेव ह्यवसि क्षणात् ।

त्वमेव भूयो हरसि विदधासि महेश्वरि ॥ १० ॥

तस्मात्स्वातन्त्र्यनाशस्ते न भवेत्प्रियसङ्गमात् ।

भजस्व पुरुषं कञ्चिल्लोकानुग्रहकाम्यया ॥ ११ ॥

(Bhagavan Hayagriva continues his narration.) Having heard Brahma's words, Sri Lalita Parameshwari addressed Brahma, Vishnu and the others with a smiling face as follows: "O celestials, I always want to be free and independent. I act as per my sweet will. One who has similar attributes is suitable to be my spouse". Brahma then said, "O great goddess! Marriage between a lady and a man can be of four types: Kalakrita, Krayakrita, Pitrudatta and Swayamyuta. The first two respectively refer to a prostitute and a maidservant. A lady, who is duly given in marriage to a suitable man, by her own father, is called 'Bharya'. A lady who chooses her own husband by means of 'Gaandharva' rites is called Swayamyuta. She is on the same standing as Pitrudatta. O Parameshwari! From that great Parabrahman, which is free from duality and which is the beyond the states of existence and non-existence and which is of the form of the bliss of pure consciousness, from that Brahman- Prakriti, the primordial nature originated. O Devi, you are both Parabrahman and Prakriti. You are without a beginning, and you are everything. Sanaka

and the other great Yogis are forever in search of you. It is you who is perceived as both good and evil deeds. Everyone praises thou who are the embodiment of the five Brahmas. O Maheshwari, in the beginning, you create the entire universe in just a second. It is you who protects the creation. Later, you dissolve the same. Hence, by wedding a suitable man, your independence can never be affected. At least to shower your benevolence on this universe, please wed a suitable person".

इति विज्ञापिता देवी ब्रह्मणा सकलैः सुरैः ।

स्रजमुद्धृत्य हस्तेन चिक्षेप गगनान्तरे ॥ १२ ॥

तयोत्सृष्टा तु सा माला शोभयन्ती नभस्थलम् ।

पपात कण्ठदेशे हि तदा कामेश्वरस्य तु ॥ १३ ॥

मुमुदुश्च ततो देवा ब्रह्मविष्णु पुरोगमाः ।

ववर्षुः पुष्पवर्षाणि बलारातीरिता घनाः ॥ १४ ॥

अथोवाच विधाता तु भगवन्तं जनार्दनम् ॥ १५ ॥

कर्तव्यो विधिनोद्वाहस्त्वनयोः शिवयोर्हरे ।

मुहूर्तोद्यैव सम्प्राप्तो जगन्मङ्गलकारकः ॥ १६ ॥

त्वद्रूपिणी महादेवी सहजश्च भवानसि ।

दातुमर्हसि कल्याणीमस्मै कामशिवाय तु ॥ १७ ॥

तच्छ्रुत्वा वचनं तस्य देवदेवस्त्रिविक्रमः ।

ददौ तस्मै विधानेन प्रीत्या तां शङ्कराय तु ॥ १८ ॥

देवर्षिपितृमुख्यानां गन्धर्वाप्सरसां तथा ।

सर्वासां देवजातीनां सान्निध्ये जलपूर्वकम् ।

कल्याणं कारयामास शिवयोरादिकेशवः ॥ १९ ॥

उपायनानि प्रददुः सर्वे ब्रह्मादयः सुराः ।

ददौ ब्रह्मेक्षुचापं च वज्रसारमनश्वरम् ।

तयोः पुष्पायुधं प्रादादम्लानं हरिरव्ययम् ॥ २० ॥

नागपाशं ददौ ताभ्यां वरुणो यादसां पतिः ।

अङ्कुशं च ददौ ताभ्यां विश्वकर्मा विशां पतिः ॥ २१ ॥

किरीटमग्निः प्रायच्छत्ताटङ्के चन्द्रभास्करौ ।

नवरत्नमयीं भूषां प्रादाद्रत्नाकरः स्वयम् ॥ २२ ॥

ददौ सुराणामधिपो मधुपात्रमथाक्षयम् ।

चिन्तामणिमयीं मालां कुबेरः प्रददौ तदा ॥ २३ ॥

साम्राज्यसूचकं छत्रं ददौ लक्ष्मीपतिः स्वयम् ।

गङ्गा च यमुना चौभे चामरे चन्द्रभास्वरे ॥ २४ ॥

ब्रह्मा च वसवो रुद्रा ह्यादित्याश्चाश्विनौ तथा ।

दिक्पाला मरुतः साध्या गन्धर्वाः प्रमथेश्वराः ।

स्वानि स्वान्यायुधान्यस्मै प्रददुः परितोषिताः ॥ २५ ॥

रथांश्च तुरगान् नागान्महावेगान्महाबलान् ।

पुष्टानरोगानश्रान्तान् क्षुत्तृष्णापरिवर्जितान् ।

ददुर्वज्रोपमाकारानयुधान्सपरिच्छदान् ॥ २६ ॥

Thus requested by Brahma and the other celestials, Sri Lalita Parameshwari picked a garland from her hand and threw it into the sky. It landed around the neck of Sri Kameshwara. This caused a great delight to Brahma, Vishnu and the other Devas. Inspired by Indra, the clouds showered flowers on Sridevi and Sri Kameshwara. Then

Brahma addressed Sri Narayana thus, “O Lord! You have to perform the wedding ceremony of Sridevi with Sri Kameshwara. This muhurtha is auspicious to the entire world. This great goddess is having your own form. You were born with her (you are her brother). Hence, you are eligible to give her hand in wedding to Sri Kameshwara”. Lord Sri Mahavishnu heard Brahma's words and acted accordingly, by performing the wedding of Sridevi and Sri Kameshwara, as per the prescribed ceremonial rites. During that time, Brahma and the other celestials offered various gifts to the newly wedded couple. Brahma gave a sugarcane-bow, which was indestructible as the diamond. Then Narayana offered arrows of flowers, which were forever fresh. Varuna gave a Naga Pasha (a serpent noose) and Vishwakarma (the head of the business class) a hook. Agni gifted a crown, the sun and the moon gave earrings and the Lord of the ocean gave an ornament studded with the nine gems. Indra, the Lord of the celestials gifted a bowl of wine that was ever filled. Kubera gifted a necklace made of Chintamani gems. Then Sri Narayana, the Lord of Sri Mahalakshmi, gifted an umbrella, a symbol of kinghood. Rivers Ganga and Yamuna offered fans, which were shining like the moon. Brahma, the eight Vasus, the twelve suns, Ashwini twins, the guardians of the eight quarters, seven wind-gods, Sadhyas, all of them offered their weapons to Sridevi. They also offered chariots with horses that were extremely speedy, strong and healthy.

अथाभिषेकमातेनुः साम्राज्ये सशिवां शिवाम् ।

अथाकरोद्विमानं तु नाम्ना तु कुसुमाकरम् ।

विधाताऽम्लानमाल्यं वै नित्यमच्छेद्यमायुधैः ॥ २७ ॥

दिवि भूम्यान्तरिक्षे च कामगं सुसमृद्धिमत् ।

यद्गन्धघ्राणमात्रेण भ्रान्तिरोगक्षुधार्तयः ।

तत्क्षणादेव नश्यन्ति मनोह्लादकरं शुभम् ॥ २८ ॥

तद्विमानमथारोप्य तावुभौ दिव्यदम्पती ।

चामरव्यजनच्छत्रध्वजयष्टिमनोहरम् ॥ २९ ॥

वीणावेणुमृदङ्गादि विविधातोद्यवादनैः ।

सेव्यमानौ सुरगणैर्निर्गत्य नृपमन्दिरात् ।

ययौ वीधीं विहारेण शोभयन्ती निजौजसा ॥ ३० ॥

प्रतिहर्म्याग्रसम्स्थाभिरप्सरोभिः सहस्रशः।
सलाजाक्षतहस्ताभिः पुरस्त्रीभिश्च वर्षितौ॥ ३१॥
गाथाभिर्मङ्गलार्थाभिर्विणावेणुविनिस्वनैः।
तुष्यन्ती वीधिवीधीषु मन्दं मन्दमथाययौ॥ ३२॥
प्रतिगृह्याप्सरोभिस्तु कृतां नीराजना विधिम्।
अवरुह्य विमानाग्र्यात्प्रविवेश महासभाम्॥ ३३॥
सिम्हासनमधिष्ठाय सहदेवेन शम्भुना।
यद्यद्वाञ्छन्ति तत्रस्था मनसैव महाजानाः।
सर्वज्ञा साक्षिपातेन तत्तत्कामानपूरयत्॥ ३४॥
तद्दृष्ट्वा चरितं देव्या ब्रह्मा लोकपितामहः।
कामाक्षीति तदाभिख्यां ददौ कामेश्वरीति च॥ ३५॥
ववर्ष काले मेघोऽपि पुरे तस्मिन्स्तदाज्ञया।
महार्हाणि च वस्तूनि दिव्यान्याभरणानि च॥ ३६॥
चिन्तामणिः कल्पवृक्षाः कमला कामधेनवः।
प्रतिवेश्मान्ततस्तस्थुः पुरे देव्याज्ञया तदा॥ ३७॥
तत्सेवैकरसाकारा विमुक्तान्यक्रियागुणाः।
सर्वकामार्थसम्युक्ता हृष्यन्तः सार्वकालिकम्॥ ३८॥
पितामहो हरिश्चैव हरश्चैव च वासवः।
अन्ये दिशामधीशाश्च सकला देवतागणाः॥ ३९॥

देवर्षयो नारदाद्या वसिष्ठाद्यास्तपोधनाः ।

गन्धर्वाप्सरसो यक्षा याश्चान्या देवजातयः ॥ ४० ॥

दिवि भूम्यान्तरिक्षेषु ससम्बाधं वसन्ति ये ।

ते सर्वे चाप्यसम्बाधं निवसन्ति स्म तत्पुरे ॥ ४१ ॥

Then, the celestials performed the crowning ceremony of Sri Kameshwari and Sri Kameshwara, by seating them on the divine throne. During this auspicious occasion, Brahma presented a Vimana called 'Kusumakara' to the divine couple. This was decorated with flowers that were ever fresh. This Vimana was indestructible by weapons of any kind. It had the power to move freely on the land and in the skies. By merely smelling the scent of this Vimana, delusion, hunger, thirst and other diseases would be completely eliminated. The divine couple, seated in this glorious Vimana, which was decorated with fans, pillars and umbrellas, went on a procession in the royal highway, accompanied by all the celestials. This was accompanied by the music of various instruments like the Veena, flute and Mridanga. The celestial damsels and Sumangalis, who were standing in front of each house in that street, held flowers and Laaja Akshata in their hands and showered them on the divine couple, as the procession passed in front of their house. All the citizens of that celestial city praised the divine couple with auspicious songs and the music of Veena, flute and other instruments. Kameshwari and Sri Kameshwara, enjoying this fanfare and welcome in each of the streets of that city, proceeded slowly, feeling pleased and happy. They accepted Aarati from the divine damsels in front of every house and then arrived at their magnificent palace. They got down from the Vimana and entered the courtroom. Sri Lalita Mahatripurasundari, who is all knowing and revered by all, seated on the divine throne with Kameshwara, granted the desires of all her courtiers by a mere graceful sight. Observing this wonderful act of Sridevi, creator Brahma offered Her the titles: Kamakshi and Kameshwari. According to the orders of Sridevi, the clouds showered rain at the appropriate times and also showered valuable things like ornaments. Chintamani, Kalpavriksha, Kamadhenu and Sri Lakshmi resided in every house in that Devi Pura. Brahma, Vishnu, Rudra, Indra, the guardians of the eight directions, the celestials, Narada and the other celestial Rishis, Sanaka, Sanandana and the other Brahma Rishis, Yogis, Maharshis, Manus, Gandharvas, Apsaras, Vasishta and other sages, Yakshas and all the other divine beings, belonging to both the heavens and the earth, gave up all their other occupations and began to reside in that city, filled with the only desire to serve the divine mother.

इयं मद्वत्सला देवी नान्यस्येत्यखिलान् जनान् ।

तोषयामास सततमनुरागेण भूयसा ॥ ४२ ॥
राजा दुहति भूलोके विदुषः सकलेप्सितान् ।
राज्ञी दुदोहाभीष्ठानि सर्वभूतलवासिनाम् ॥ ४३ ॥
त्रिलोकैकमहीपाले साम्बिके कामशङ्करे ।
दशवर्षसहस्राणि ययुः क्षण इवापरः ॥ ४४ ॥
ततः कदाचिदागत्य नारदो भगवानृषिः ।
प्रणम्य परमां शक्तिं उवाच विनयान्वितः ॥ ४५ ॥
परं ब्रह्म परम्धाम पवित्रं परमेश्वरि ।
सदसद्भावसङ्कल्पविकल्पकलनात्मिका ॥ ४६ ॥
जगदभ्युदयार्थाय व्यक्तभावमुपागता ।
असज्जनविनाशार्थं सज्जनाभ्युदयार्थिनी ।
प्रवृत्तिस्तव कल्याणि साधूनां रक्षणाय हि ॥ ४७ ॥
अयं भण्डासुरो देवी बाधते जगतां त्रयम् ।
त्वयैकयैव जेतव्यो न शक्तस्त्वपरैः सुरैः ॥ ४८ ॥
त्वत्सेवैकपरा देवाश्चिरकालमिहोषिताः ।
त्वदाज्ञया गमिष्यन्तु स्वानि स्वानि पुराणि तु ।
अमङ्गलानि शून्यानि मृषार्थानि च सर्वतः ॥ ४९ ॥
एवं विज्ञापिता देवी नारदेनाखिलेश्वरी ।
स्वस्ववासनिवासाय प्रेषयामास चाऽमरान् ॥ ५० ॥

ब्रह्माणं च हरिं शम्भुं वासवादीन् दिशाम्पतीन्।

यथार्हं पूजयित्वा तु प्रेषयामास चाऽम्बिका॥ ५१॥

अपारयन्तस्तां त्यक्तुमपि सम्प्रेषिताः सुराः।

स्वस्वाम्शैः शिवयोः सेवामादिपित्रोरकुर्वत॥ ५२॥

एतदाख्यानमायुष्यं सर्वमङ्गलकारणम्।

आविर्भावं महादेव्यास्तस्या राज्याभिषेचनम्॥ ५३॥

यः प्रातरुत्थितो विद्वान् भक्तिश्रद्धासमन्वितः।

जपेद्धनसमृद्धः स्यात्सुधासम्मितवाग्भवेत्॥ ५४॥

नाशुभं विद्यते तस्य परत्रेह च धीमतः।

यशः प्राप्नोति विपुलं समानोत्तमतामपि॥ ५५॥

अचला श्रीर्भवेत्तस्य श्रेयश्चैव पदे पदे।

कदाचिन्न भयं तस्य तेजस्वी वीर्यवान् भवेत्॥ ५६॥

तापत्रयविहीनश्च पुरुषार्थैश्च पूर्यते।

त्रिसन्ध्यं यो जपेन्नित्यं ध्यात्वा सिम्हासनेश्वरीम्।

षण्मासान्महतीं लक्ष्मीं प्राप्नुयाज्जापकोत्तमः॥ ५७॥

Lalita Parameshwari, who accepted the devout services of all these devotees, showered such grace on them that each of them felt, 'Sridevi is affectionate only towards me. Nobody else receives so much grace from her'. A king takes care to fulfill the wishes of all the scholars in his court. Sridevi, the queen of the celestials, not only granted the desires of the residents of her city, but also fulfilled the wishes of all the mortals on the earth. Thus, along with Sri Lalita, Sri Kameshwara ruled the three worlds and in no time ten thousand years passed, as though in a second. One day Narada came to see Sri Parashakti and with folded hands said, “O great goddess! Thou are the ultimate, auspicious Parabrahman. Your have revealed yourself, just for the sake of the welfare of

the world. Your behavior is such as to always punish the evil and protect the good. Bhandasura is troubling the entire world. No other god or goddess, other than you, is capable of slaying him. All the celestials, immersed in your service, have stayed away from their own abodes for a long time. If you permit them, they shall return to their abodes, which are inauspicious and empty presently. But these shall become prosperous soon, with your grace". Having heard the words of Narada, Sri Parashakti took leave of all the celestials, after paying them, their due respects. Though Sridevi asked the celestials to return to their own abodes, they were not willing to leave the feet of Sridevi. They thus left their Amshas (partial manifestations) behind to serve Sri Kameshwara and Sri Kamakshi, the original parents of the entire creation.

O Agastya! This episode, which explains the appearance and crowning of Sri Lalita, is auspicious. It grants longetivity. A scholar, who recites this episode with respect and devotion, shall become wealthy and prosperous. He will also be the master of nectarine speech. That person will never see inauspicious events, be it in his lifetime or later. Not only does he obtain immense fame, but also will become the best among his equals. He will obtain stable wealth. At every step, he will see progress. He will never face fear in his life. He becomes bright and gallant. He gets rid of the three types of Taapaas (Adyatmika, Adidaivika and Adibhautika) and obtains the four goals of human life. A person who remembers Sri Lalita Mahatripurasundari during the three Sandhyas (morning, noon and evening/night), and recites this episode, shall obtain Lakshmi (immense wealth and prosperity) within six months.

॥ श्री ब्रह्माण्डपुराणे उत्तरखण्डे हयग्रीवागस्त्यसम्वादे श्री ललितोपाख्याने दशमः ॥

॥ बालार्कमण्डलाभासां चतुर्बाहुं त्रिलोचनाम् ।
पाशाङ्कुशधनुर्बाणान् धारयन्तीं शिवां भजे ॥ ॐ ऐं ह्रीं श्रीं साङ्गायै सायुधायै सवाहनायै सपरिवारायै सर्वदेवतास्वरूपिण्यै श्रीललितामहात्रिपुरसुन्दर्यै परब्रह्मणे नमः ॥

॥ अथ एकादशोऽध्यायः ॥

ध्यानम्

कल्याणोत्सववैभवेन लसतोः कामेश्वरीशर्वयोः
विष्णुब्रह्ममहेन्द्रदेवपतिभिर्दिव्यैश्च सर्वर्षिभिः ।
भक्त्या सम्स्तुतयोर्दयार्द्रसदृशोः सौभाग्यपादाम्बुज
श्रीरेणूत्करसम्पदस्त्रिजगतां सन्त्वक्षयाः सौख्यदाः ॥

[ भण्डासुरवधाय शक्तिसेनासहितायाः श्रीदेव्याः प्रस्थानम् ]

ॐ ऐं ह्रीं श्रीं

अथ सा जगतां माता ललिता परमेश्वरी ।
त्रैलोक्यकण्टकं भण्डं दैत्यं जेतुं विनिर्ययौ ॥ १ ॥
कृत्वा मार्दलिकारूपं सप्ताम्भोराशयस्तथा ।
प्रभूतमर्दलध्वानैः पूरयामासुरम्बरम् ॥ २ ॥
मृदङ्गा मुरजाश्चैव पटहा ढक्कलिङ्गणाः ।
शेलुका झल्लरीसङ्घा हुडुक्का हुडुवा घटाः ॥ ३ ॥
आनकाः पणवाश्चैव गोमुखाश्चार्धचन्द्रकाः ।
यवमध्या मुष्टिमध्या मड्डवो डिण्डिमा अपि ॥ ४ ॥
झर्झराश्चर्चरीताला तुङ्ग्यालिङ्ग्यप्रभेदकाः ।
ऊर्ध्वकाश्चैव तम्पोट्टा निस्सणा बर्बराः परे ॥ ५ ॥
दध्वनुः शक्तिसेनाभिराहताः समरोद्यमे ॥ ६ ॥
ललितापरमेशान्या अङ्कुशास्त्रात्समुद्गता ।

सम्पत्करीनाम देवी चचाल सह शक्तिभिः ॥ ७ ॥

अनेककोटिमातङ्गतुरङ्गरथपत्तिभिः ।

सेविता तरुणादित्यपाटला सम्पदीश्वरी ॥ ८ ॥

मत्तमुद्दण्डसङ्ग्रामरसिकं शैलसन्निभम् ।

रणकोलाहलं नाम सारुरोह मतङ्गजम् ॥ ९ ॥

तामन्वगा ययौ सेना महती घोरराविणी ।

लोलाभिः केतुमालाभिरुल्लिखन्ती घनाघनम् ॥ १० ॥

तस्याश्च सम्पन्नाथायाः पीनस्तनसुसङ्कटः ।

कङ्कटो घनसन्नाहो रुरुचे वक्षसि स्थितः ॥ ११

कम्पमाना खड्गलता व्यरुचत्तत्करे धृता ।

कुटिला कालनाथस्य भ्रुकुटीव भयङ्करा ॥ १२ ॥

उत्पातवातसम्पातचालिता इव पर्वताः ।

तामन्वगा ययुः कोटिसङ्ख्याताः कुञ्जरोत्तमाः ॥ १३ ॥

Sri Lalita Parameshwari set out to defeat Bhandasura in a battle, along with her army of infinite Shaktis. The four oceans formed her war-drums. The noise emanating from them filled the entire sky. Innumerable Shaktis present in Sridevi's army played various instruments like Mridanga, Muraja, Pataha, Dhakkaa, Ringana, Shekula, Jhallari, Hudukaa, Huduvaa, Ghatam, Aanaka, Panava, Gomukha, Ardhachandraka, Yamamadhya, Mushtimadhya, Maddu, Dindima, Jharjhari, Charchari, Taala, Tungi, Lingi, Tammata, Nisaana, Barbara, Hunkaara, Kaakatunda and others. From Lalita Devi's Ankusha (spear), a goddess named 'Sampatkari' emerged with many Shaktis and started following Sri Lalita Parameshwari. This goddess had the luster of the rising sun. She was attended by crores of elephants, horses and soldiers. She rode on an elephant named 'Ranakolahala', which was well versed in the art of warfare and was huge like a mountain. The army of Shaktis, with their flags touching the skies, followed Sri Lalita, making a thunderous noise. Sri Sampatkari wore a shining, tight armor and held a sword in her

hand that resembled the crooked eyebrow of Yama, the god of death. An army of crores of mountainous elephants started following Sri Sampatkari Devi.

अथ श्री ललितादेव्याः श्री पाशायुधसम्भवा ।

अतित्वरितविक्रान्तिरश्वारूढा चलत्पुरः ॥ १४ ॥

तया सह हयप्रायं सैन्यं हेषातरङ्गितम् ।

व्यचलत्खुरकुद्दाल निर्दारितमहीतलम् ॥ १५ ॥

वनायुजाश्च काम्भोजा आरट्टाः सिन्धुदेशजाः ।

टङ्कणाः पार्वतीयाश्च पारशीकास्तथापरे ॥ १६ ॥

आजानेया घट्टपुरा घरट्टाः कलावन्तिजाः ।

बाह्लिकेया वनोद्भूता गान्धर्वाश्चापरे हयाः ॥ १७ ॥

प्राग्देशजाश्च कैराताः प्रान्तदेशोद्भवा अपि ।

विनीता साधुवोढारो वेगिनः स्थिरचेतसः ॥ १८ ॥

स्वामिचित्तविषेशज्ञा महायुद्ध सहिष्णवः ।

लक्षणैर्बहुभिर्युक्ता जितक्रोधा जितश्रमाः ॥ १९ ॥

पञ्चधारासु शिक्षाढ्या विनीतार्धपुलायिताः ।

फालशुक्तिश्रिया युक्ताः श्वेतशुक्तिसमन्विताः ॥ २० ॥

देवपद्मं देवमणिं देवस्वस्तिकमेव च ।

अर्धस्वस्तिकशुक्तिं च पुम्स्वरं पुष्पदण्डिकाम् ॥ २१ ॥

एतानि शुभलक्ष्माणि जयराज्यप्रदानि च ।

वहन्तो वातजवना वाजिनस्तां समन्वयुः ॥ २२ ॥

अपराजितनामानमतितेजस्विनं चलम् ।
अत्यन्तोत्तुङ्गवर्ष्माणं कलिकाविलसन्मुखम् ॥ २३ ॥
पार्श्वद्वयेऽपि पतितस्फुरत्केसरमण्डलम् ।
स्थूलवालधिविक्षेपक्षिप्यमाणपयोधरम् ॥ २४ ॥
जङ्घाकाण्डसमुन्नद्धमणिकिङ्किणि भासुरम् ।
वादयन्तमिवोच्चण्डैः खुरनिष्ठुरकुट्टिनैः ॥ २५ ॥
भूमण्डालमहावाद्यं विजयस्य समृद्धये ।
हेषमाणं प्रतिमुहुः सन्दर्शितगतिक्रमम् ॥ २६ ॥
अलोलचामरव्याजाद्वहन्तं पक्षती इव ।
भाण्डैर्मनोहरैर्युक्तं घर्घरीजालमण्डितम् ॥ २७ ॥
हेषाघोषस्य कपटाद्धुङ्कुर्वाणमिवासुरान् ।
अश्वारूढा महादेवी समारूढा हयं ययौ ॥ २८ ॥
चतुर्भिः बाहुभिः पाशमङ्कुशं वेत्रमेव च ।
हयवल्गां च दधती बहुविक्रमशालिनी ॥ २९ ॥
तरुणादित्यसङ्काशा ज्वलत्कान्तितरङ्गिणी ।
सञ्चचाल हयारूढा नर्तयन्तीव वाजिनम् ॥ ३० ॥

From Lalita Devi's Pasha (whip) arose a goddess named 'Ashwaaroodhaa' Devi along with a big army of horses and she started swiftly leading the Shakti Sena (army). The army of horses started following her, making a loud noise. This army included horses, which were of different breeds like the Vanayuja, Kambhoja, Parsi, Bahlika etc. These horses were humble, very swift and were without a fickle mind. They behaved according to the will of their master. They were capable of withstanding the pressure of even a great

battle. They had many auspicious signs and were devoid of anger and fatigue. They were well trained in the five varieties of marching. They were decorated with various ornaments. All these horses started following Sri Ashwaaroodhaa Devi. There was one horse, immensely bright and leading the army. Sri Ashwaaroodhaa Devi rode on this horse, which was named 'Aparaajita'. It had shining hair on either sides of the body. It's swinging tail caused the clouds in the skies to be scattered. The bells in its feet, along with the thumping sound of its hooves, generated a terrifying noise, as though signifying success. Sri Ashwaaroodhaa Devi, riding on this elephant, proceeded to defeat Bhandasura and his army. This goddess held in her four hands, a noose, goad, cane and the reins of the horse. She shone like the rising sun.

अथ श्रीदण्डनाथाया निर्याणपटहध्वनिः ।

उद्दण्ड सिन्धुनिध्वानश्चकार बधिरं जगत् ॥ ३१ ॥

वज्रबाणैः कठोरैश्च भिन्दन्त्यः कुकुभो दश ।

अत्युद्दण्डभुजोष्माणः शक्तयः काश्चिदुत्थिताः ॥ ३२ ॥

काश्चिच्छ्रीदण्डनाथायाः सेनानासीरसङ्गताः ।

खड्गं फलकमादाय पुप्लुवुश्चण्डशक्तयः ॥ ३३ ॥

अत्यन्तसैन्यसम्बाधं वेत्रसन्ताडना शतैः ।

निवारयन्त्यो वेत्रिण्यो व्यचलन् शक्तयः शतम् ॥ ३४ ॥

अथ तुङ्गध्वजश्रेणीर्महिषाङ्का मृगाङ्किताः ।

सिम्हाङ्काश्चैव बिभ्राणाः शक्तयो व्यचलन् पुनः ॥ ३५ ॥

Later, commander-in-chief of the army, Sri Dandanatha Devi (Varahi) started marching. The war-drums that were played during this time resembled the thunderous roar of the great ocean and deafened the entire world. From the flames that emanated from Her powerful shoulders, many Shaktis originated. They proceeded with the army, shooting diamond-arrows in all the ten directions. Many more Shaktis originated from Sri Varahi and holding sword and shield, they walked on either side of the marching army. Many other Shaktis, who emerged from Sri Varahi, regulated the flow of the army with the help of canes. Many other goddesses started marching along with the rest of the Shakti Sena, holding flags that bore signs of animals like buffalo, deer and lion.

॥ श्री ब्रह्माण्डपुराणे उत्तरखण्डे हयग्रीवागस्त्यसम्वादे श्री ललितोपाख्याने एकादशः ॥

॥ बालार्कमण्डलाभासां चतुर्बाहुं त्रिलोचनाम् ।
पाशाङ्कुशधनुर्बाणान् धारयन्तीं शिवां भजे ॥ ॐ ऐं ह्रीं श्रीं साङ्गायै सायुधायै सवाहनायै सपरिवारायै सर्वदेवतास्वरूपिण्यै श्रीललितामहात्रिपुरसुन्दर्यै परब्रह्मणे नमः ॥

॥ अथ द्वादशोऽध्यायः ॥

ध्यानम्

यद्भाण्डासुरसैन्यसङ्घविलयं प्रत्युद्यमः श्रीपरा
शक्तेरद्भुतशक्तिसैन्यसुलभः प्रत्यर्थिसन्तापकः ।
तत्त्वां सर्वसुरेश्वरैर्नुतपदां श्रीकामराजेश्वरीम्
ध्यायेऽम्बां प्रणतः परात्परतरां श्रीसुन्दरेशप्रियाम् ॥

[ श्रीदण्डनाथायाः रणप्रयाणसमये असङ्ख्याकपोत्रिणीनां मूर्तिमता धनुर्वेदेन यन्त्रनायिकायाः सङ्गीतनायिकायास्तत्परिचारिकानां च प्रस्थानम् ]

ॐ ऐं ह्रीं श्रीं

तदनु श्रीदण्डनाथा श्वेतच्छत्रकदम्बकैः ।

स्फुरत्करा प्रचलिताः शक्तयः काश्चिदुत्थिताः ॥ १ ॥

दण्डनाथाविनिर्याणे सङ्ख्यातीतैः सितप्रभैः ।

छत्रैर्गगनमारेजे निःसङ्ख्यशशिमण्डलम् ॥ २ ॥

अन्योन्यसक्तैर्धवलच्छत्रैरन्तर्घनीभवत् ।

तिमिरं नुनुदे भूयस्तत्काण्डमणिरोचिषा ॥ ३ ॥

वज्रप्रभायुधगणच्छायापूरितदिङ्मुखाः ।

तालवृन्ताः शतविधाः क्रोडमुख्यो बलेऽचलन् ॥ ४ ॥

चण्डोच्चण्डादयस्तीव्रा भैरवाः शूलपाणयः ।

ज्वलत्केशपिशङ्गाभास्तटिद्भासुरदिङ्मुखाः ॥ ५ ॥

दहन्त इव दैत्यैघान् तीक्ष्णैस्तीक्ष्णाक्षिवह्निभिः ।

प्रचेलुर्दण्डनाथायाः सेनानासीरधाविनः ॥ ६ ॥

अथ पोत्रमुखी देवी समानाकृतिभूषणाः ।

तत्समानायुधकरास्तत्मानस्ववाहनाः ॥ ७ ॥

तीक्ष्णदम्ष्ट्रा विनिष्ठ्यूतवह्निधूमायिताम्बराः ।

तमालश्यामलाकाराः कपिलक्रूरलोचनाः ।

सहस्रमहिषरूढाः प्रचेलुः सूकराननाः ॥८ ॥

Then, from the white umbrellas of Sri Varahi, many Shaktis emerged. They all had shining hands and started marching with the army. There were so many bright umbrellas in Sri Varahi's army that it seemed as though the sky was filled with countless moons. All the darkness that was present was completely destroyed due to the luster of the gems that were present in these bright umbrellas. These Shakti Devis, who were bore-faced, filled the skies with the light from their weapons and walked with the army, holding hundreds

of varieties of fans in their hands. Chanda, Ucchanda, Teevra and other terrifying Bhairavas, who held tridents in their hands and sported flaming hair, lit up the entire area with their lightening-like brilliance. It seemed as though they would burn the entire clan of the demons by the sparks from their eyes. These Bhairavas walked on either side of the Shakti Sena. There were many more Shakti Devis, who sported similar forms, held similar weapons and were decorated similarly. They had sharp teeth and were wearing smoke-colored saris. They had a bluish-black complexion, had terrifying black eyes, rode on thousands of buffaloes and had bore-faces.

अथ श्री दण्डनाथा च किरिचक्ररथोत्तमात् ।

अवरुह्य महासिम्हमारुरोह स्ववाहनम् ॥ ९ ॥

वज्रघोषमिति ख्यातं धुतकेसरमण्डलम् ।

व्यात्तास्यं विकटाकारं विशङ्कटविलोचनम् ।

दम्ष्ट्राकटककटाकार बधिरीकृतदिङ्मुखम् ॥ १० ॥

आदिकूर्मकठोरास्थि कूर्परप्रतिमैर्नखैः ।

क्षिपन्तमिव भूचक्रमापातालनिमज्जिभिः ॥ ११ ॥

योजनत्रयमुत्तुङ्गं वेगादुद्धतवालधिम् ।

सिम्हवाहनमारुह्य व्यचलद्दण्डनायिका ॥ १२ ॥

तस्यामसुरसम्हार प्रवृत्तायां ज्वलत्क्रुधि ।

उद्वेगं बहुलं प्राप त्रैलोक्यं सचराचरम् ॥ १३ ॥

किमसौ धक्ष्यति रुषा विश्वमद्यैव पोत्रिणी ।

किं वा मुसलघातेन भूमिं द्वेधा करिष्यति ।

अथवा हलनिघातैः क्षोभयिष्यति वारिधीन् ॥ १४ ॥

इति त्रस्तमनाः सर्वो गगने नाकिनां गणः ।

दूरद्रुतविमानाश्च सन्त्रासात्तामुदैक्षत ॥ १५ ॥

ववन्दिरे च ते देवा बद्धाञ्जलिपुटाञ्चिताः ।

मुहुर्द्वादशनामानि कीर्तयन्तो नभस्थले ॥ १६ ॥

अगस्त्य उवाच

कानि द्वादशनामानि तस्या देव्या वद प्रभो ।

अश्वानन महाप्राज्ञ येषु मे कौतुकं महत् ॥ १७ ॥

श्री हयग्रीव उवाच

शृणु द्वादशनामानि तस्या देव्या घटोद्भव ।

येषामाकर्णनामात्रात्प्रसन्ना सा भविष्यति ॥ १८ ॥

पञ्चमी दण्डनाथा च सङ्केता समयेश्वरी ।

तथा समयसङ्केता वाराही पोत्रिणी शिवा ॥ १९ ॥

वार्ताली च महासेनाऽप्याज्ञाचक्रेश्वरी तथा ।

अरिघ्नी चेति सम्प्रोक्तं नामद्वादशकं मुने ॥ २० ॥

नामद्वादशधाभिख्य वज्रपञ्जरमध्यगः ।

सङ्कटे दुःखमाप्नोति न कदाचन मानवः ॥ २१ ॥

एतैर्नामभिरभ्रस्थाः सङ्केतां बहु तुष्टुवुः ।

तेषामनुग्रहार्थाय प्रचचाल च सा पुनः ॥ २२ ॥

Then Sri Varahi Devi got down from her 'Kiri Chakra' chariot and ascended a lion named 'Vajraghosha'. That lion had a truly scary appearance. It had ruffled hair, a widely

opened mouth and crooked eyes. The sound it made from its teeth seemed to deafen all the directions. Its claws had sharp nails that resembled the sharp teeth of Sri Kurma Vishnu. The nails were long enough to penetrate the earth and reach the nether worlds. Its tail had a length of three Yojanas. Sri Varahi rode on this lion. Completely prepared to slay the demons, as Sri Varahi proceeded with anger, the entire world composed of both inanimate and animate creation, was filled with great distress. The Devas thought fearfully, 'Oh! This goddess may burn the universe into ashes. Or she may split the earth into two halves with her weapon named 'Musala'. Or she may disturb the seven great oceans using her weapon named 'Hala' (plough)'. Thinking thus, the celestials were shivering with fear and were staring at Sri Varahi. They were repeatedly chanting her twelve sacred names. Now sage Agastya says, "O great Lord! Please tell me those twelve names of Sri Varahi, that the celestials used to praise Her". Hayagriva continued his narration. O Agastya hear those twelve names. By merely hearing these names, the great goddess Varahi shall become pleased. The names are: Panchami, Dandanatha, Sanketa, Samayeshwari, Samayasanketa, Varahi, Potrini, Shivaa, Vartali, Mahasena, Ajna chakreshwari and Arighni. A man, who remains protected in the diamond-cage composed of these twelve names, shall never become unhappy, even during the most difficult of times. Thus, with these names the celestials stood in the sky and praised Sri Varahi Devi. Pleased with them, she proceeded further to destroy the demons and bring delight to the Devas.

अथ सङ्गीतयोगिन्या मन्त्रिराज्ञीपदस्पृशः ।

निर्याणसूचनकरी दिवि दध्वान काहली ॥ २३ ॥

शृङ्गारप्रायभूषणानां शाद्वलश्यामलत्विषाम् ।

वीणासनाथपाणीनां शक्तीनां निर्ययौ बलम् ॥ २४ ॥

काश्चिद्गायन्ति नृत्यन्ति मत्तकोकिलनिःस्वनाः ।

काश्चित्कादम्बरीपानकषायितविलोचनाः ॥ २५ ॥

वन्धिमागधरूपाश्च काश्चिदन्याः कलस्वनाः ।

वीणावेणुमृदङ्गाढ्याः सविलासपदक्रमाः ॥ २६ ॥

प्रचेलुः शक्तयः श्यामा हर्षयन्तो जगज्जनान् ।

मयूरवाहाः कतिचित्कतिचिद्धंसवाहनाः ॥ २७ ॥

कतिचिन्नकुलारूढाः कतिचित्कोकिलासनाः ।

सर्वाश्च श्यामलाकाराः काश्चित्कर्णीरथस्थिताः ॥ २८ ॥

कदम्बमधुमत्ताश्च काश्चिदारूढसैन्धवाः ।

मन्त्रिनाथां नमस्कृत्य सम्प्रचेलुः पुरः पुरः ॥ २९ ॥

अथारुह्य समुत्तुङ्गं गेयचक्रं महारथम् ।

बालार्कवर्णकवचा मदारुणविलोचना ॥ ३० ॥

ईषत्प्रस्वेदकणिका मनोहरमुखाम्बुजा ।

प्रेषयन्ती कटाक्षेण किञ्चिद् भ्रूवल्लिताण्डवैः ॥ ३१ ॥

समस्तमपि तत्सैन्यं शक्तीनामुद्धतोद्धतम् ।

पिञ्छत्रिकोणचक्रेण बिरुदेन महीयसा ॥ ३२ ॥

असामान्येन चान्यासां शक्तीनामुज्ज्वलोदया ।

निर्जगाम घनश्यामा श्यामला मन्त्रिनायिका ॥ ३३ ॥

तां तुष्टुवुः षोडशभिर्नामभिर्नाकवासिनः ।

तानि षोडशनामानि समाकर्णय कुम्भज ॥ ३४ ॥

सङ्गीतयोगिनी श्यामा श्यामला मन्त्रिनायिका ।

मन्त्रिणी सचिवेशानी प्रधानेशी शुकप्रिया ।

वीणावती वैणिकी च मुद्रिणी प्रियकप्रिया ।

नीपप्रिया कदम्बेशी कदम्बवनवासिनी ।

सदामदा च नामानि षोडशैतानि कुम्भज ॥ ३५ ॥

एतैर्यः सचिवेशानीं सकृत्स्तौति शरीरवान् ।

तस्य त्रैलोक्यमखिलं वशे तिष्ठत्यसम्शयः ॥ ३६ ॥

मन्त्रिनाथा यत्र यत्र कटाक्षं विकिरत्यसौ ।

तत्र तत्र गताशङ्कं शक्तिसैन्यं पतत्यलम् ॥ ३७ ॥

After this, war-drums started playing in order to indicate the commencement of marching of Sri Rajashyamala Devi, the minister (Mantrini) of Sri Lalita Mahatripurasundari. Soldiers of Sri Shyamala, who were sensuously decorated with glorious ornaments, who had a bluish-black glow and held Veenas in their hands, started marching along with the Shakti Sena. In this army, there were goddesses with lovely voices resembling those of nightingales, singing melodiously. There were others who were dancing to the rhythms of instruments like Mridanga, Veena and flute. Their eyes deeply aglow with Kadambari (an extract of Kadamba tree), these Shaktis were dancing and singing all the way. These bluish-black goddesses walked with the army, causing immense delight to the men of all the worlds. They rode on different vehicles like peacocks, swans, cuckoos and mongooses. Some rode on special chariots called 'Karni'. Some goddesses, intoxicated with Kadambari, rode horses and having saluted to Sri Rajashyamala, began to lead the army. Then Sri Shyamala Devi, who had a deep bluish-black complexion, ascended a chariot named 'Geya Chakra' (chariot that makes musical sounds whenever it moves). She had the glow of the rising sun and her eyes with deeply ruddied due to intoxication of Kadambari. Small droplets of sweat on her forehead made her look more beautiful. She regulated the movement of her army by the mere movement of her creeper-like eyebrows. The army carried many triangular banners of peacock feathers. Thus, with great pomp and show, Sri Shyamala Devi began marching along with her army. At the same time, the Devas began to praise the goddess with sixteen divine names. They are: Sangeetayogini, Shyama Shyamala, Mantrinayika, Mantrini, Sachiveshani, Pradhaneshi, Shukapriya, Vinavati, Vainiki, Mudrini, Priyakapriya, Nipapriya, Kadambeshi, Kadambavanavasini and Sadamada. A man who recites these sixteen names shall doubtlessly conquer all the three worlds.

ललितापरमेशान्या राज्यचर्चा तु यावती ।

शक्तिनामपि चर्चाया सा सर्वा तद्वशम्वदा ॥ ३८ ॥

अथ सङ्गीतयोगिन्याः करस्थशुकपोतकात् ।

निर्जगाम धनुर्वेदो वहन् सज्जं शरासनम् ॥ ३९ ॥

चतुर्बाहुयुतो वीरस्त्रिशिरास्त्रिविलोचनः ।

नमस्कृत्य प्रधानेशीमिदमाह स भक्तिमान् ॥ ४० ॥
देवि भण्डासुरेन्द्रस्य युद्धाय त्वं प्रवर्तसे ।
अतस्तव मया साह्यं कर्तव्यं मन्त्रिनायिके ॥ ४१ ॥
चित्रजीवमिदं नाम्ना कोदण्डं सुमहत्तरम् ।
गृहाण जगतामम्ब दानवानां निबर्हणम् ॥ ४२ ॥
इमौ चाक्षयबाणाढौ तूणीरौ स्वर्णचित्रितौ ।
गृहाण दैत्यनाशाय ममानुग्रहहेतवे ॥ ४३ ॥
इति प्रणम्य शिरसा धनुर्वेदेन भक्तितः ।
अर्पितं चापतूणीरं जग्राह प्रियकप्रिया ॥ ४४ ॥
चित्रजीवं महच्चापमादाय च शुकप्रिया ।
विष्फारं जनयामास मौर्वीमुद्धाट्य भूरिशः ॥ ४५ ॥
सङ्गीतयोगिनीचापध्वनिना पूरितं जगत् ।
नाकालयानां च मनोनयनानन्दसम्पदा ॥ ४६ ॥
यन्त्रिणी तन्त्रिणी चैव द्वे तस्याह परिचारिके ।
शुकं विणां च शिरसा वहन्त्यौ परिचेरतुः ॥ ४७ ॥
आलोलवलयक्वाणवर्धिष्णुगुणनिःस्वनम् ।
धारयन्ती वपुः श्यामा चकारारिमनोज्वरम् ॥ ४८ ॥
चित्रजीवशरासेन भूषिता गीतयोगिनी ।
कादम्बिनीव रुरुचे कन्दलच्छक्रकार्मुका ॥ ४९ ॥

कालीकटाक्षवत्तीक्ष्णो नृत्यद्भुजगसन्निभः ।

उल्लसन् दक्षिणे पाणौ विललास शिलीमुखः ॥ ५० ॥

गेयचक्ररथारूढां तां पश्चाच्च निषेविरे ।

तद्वच्छामलशोभाढ्या देव्यो बाणधनुर्धराः ॥ ५१ ॥

सहस्राक्षौहिणीसङ्ख्यास्तीव्रवेगा मदालसाः ।

अपूरयन्त्यः ककुभः कलैः किलकिलारवैः ॥ ५२ ॥

It was Sri Shyamala, who was responsible for handling all the concerns of Sridevi's kingdom and also those of the Shaktis. From the parrot in the hand of Sri Rajashyamala Devi, Dhanurveda Deva (the god of the science of archery or the god of the four Upavedas) emerged. He had a spectacular bow on his shoulders, had four hands, three heads and three eyes. He bowed down to Sri Shyamala and said, "O Devi! You are going to fight Bhandasura. It is my duty to assist you. This wonderful bow is called 'Chitrajiva'. This has the power to destroy the demons completely. Please accept this bow. Also accept this quiver decorated with golden carvings, which is Akshaya (which is always filled with arrows, never goes empty). Please shower your grace on me by accepting these". Then Sri Shyamala accepted the weapons and made a loud noise by pulling the string of the bow. This great sound filled the entire world and brought immense delight to the celestials. Sri Rajashyamala had two handmaids named Yantrini and Tantrini. They were serving her by holding her parrot and Veena on their heads. Sri Rajashyamala, who was decorated with the spectacular bow, looked like the beautiful blue sky that was surrounded by the rainbow. She was very fearful to the enemies. In her right hand, she held an arrow that looked like a dancing snake and was sharp like the sight of goddess Kali. An army consisting of one thousand Akshauhini (one Akshauhini consists of 21870 chariots, as many elephants, 65610 horses and 109350 soldiers on foot) followed Sri Mantrini.

॥ श्री ब्रह्माण्डपुराणे उत्तरखण्डे हयग्रीवागस्त्यसम्वादे श्री ललितोपाख्याने

द्वादशः ॥

॥ बालार्कमण्डलाभासां चतुर्बाहुं त्रिलोचनाम् ।

पाशाङ्कुशधनुर्बाणान् धारयन्तीं शिवां भजे ॥ ॐ ऐं ह्रीं श्रीं  साङ्गायै सायुधायै सवाहनायै सपरिवारायै सर्वदेवतास्वरूपिण्यै श्रीललितामहात्रिपुरसुन्दर्यै परब्रह्मणे नमः ॥

॥ अथ त्रयोदशोऽध्यायः ॥

ध्यानम्

शक्तिर्या परमेश्वरी भगवती श्रीदण्डानाथाभिदाम्
सर्वज्ञाद्भुतकोलवक्त्रकमलां ध्यायामहे श्यामलाम् ।
यन्त्रेशीं ललिताम्बिके परशिवे भण्डैकसैन्यापहाम्
वन्दे त्वां वरकामराजमहिषीं श्रीसुन्दरेशाङ्कगाम् ॥

[ श्री ललिताम्बिकाया रणप्रस्थानम् ]

ॐ ऐं ह्रीं श्रीं

अथचक्रराजरथनायिकाश्रिता
ज्वलिताङ्कुशा फणिसमानपाशभृत् ।
कलक्वणद्वलयमैक्षवं धनुः
दधती प्रदीप्तकुसुमेषु पञ्चका ॥ १ ॥
उदयत्सहस्रमहसां सहस्रतोऽ

प्यतिपाटलं निजवपुः प्रभाझरम्।
किरती दिशासु वदनस्य कान्तिभिः
सृजतीव चन्द्रमयमभ्रमण्डलम्॥ २॥
दशयोजनायतिमता जगत्त्रयीम्
अभिवृण्वता विशदमौक्तिकात्मना।
धवलातपत्रवलयेन भासुरा
शशिमण्डलस्य सखितामुपेयुषा॥ ३॥
अभिवीजिता च मणिकाण्डशोभिना
विजयादिमुख्य परिचारिकाजनैः।
नवचन्द्रिकालहरिकान्तिकन्दली
चतुरेण चामरचतुष्टयेन च॥ ४॥
शक्त्यैकराज्यपदवीमभिसूचयन्ती
साम्राज्यचिह्न शतमण्डितसैन्यदेशा।
सङ्गीतवाद्यरचनाभिरथामराणाम्
सम्स्तूयमानविभवा विशदप्रकाशा॥ ५॥
वाचामगोचरमगोचरमेव बुद्धे
रीदृक्तया न कथनीयमनन्यतुलयम्।
त्रैलोक्यगर्भपरिपूरितशक्तिचक्र
साम्राज्यसम्पदभिमानमभिस्पृशन्ती॥ ६॥

आबद्ध भक्तिपिशुनाञ्जलिशेखराणा

मारादहम्प्रथमिकाकृतसेवनानाम्।

ब्रह्मेन्द्ररुद्रहरिमुख्य सुरोत्तमाणाम्

वक्त्राणि वर्धितनुतीनि कटाक्षयन्ती ॥ ७ ॥

उद्दीप्तपुष्पशरपञ्चकतः समुत्थैः

ज्योतिर्मयं त्रिभुवनं महसा दधानैः।

विद्युत्समद्युतिभिरप्सरसां समूहैः

विक्षिप्यमाण जयमङ्गललाजवर्षा ॥ ८ ॥

कामेश्वरीप्रभृतिभिः कमनीयभाभिः

संग्रामवेषरचनासु मनोहराभिः।

दीप्तायुधद्युतितिरस्कृतभास्कराभिः

नित्याभिरङ्घ्रिसविधे समुपास्यमाना ॥ ९ ॥

श्रीचक्रनामतिलकं दशयोजनाति

तुङ्गध्वजोल्लिखितमेघकदम्बमुच्चैः।

तीव्राभिरावरणशक्तिपरम्पराभिः

युक्तं रथं समरकर्मणि चालयन्ती ॥ १० ॥

पञ्चाधिकैर्विंम्शतिनामरत्नैः

प्रपञ्च पापप्रशमाय दक्षैः।

संस्तूयमाना ललिता मरुद्भिः

सङ्ग्राममुद्दिश्य समुच्चचाल ॥ ११ ॥

Now, Sri Lalita Parameshwari ascended the Srichakra chariot and started to the battlefield. She held a dazzling Ankusha, Pasha that looked like the king cobra, sugarcane-bow decorated with tinkling bells and five flower-arrows (lotus, Asoka, Choota, blue lotus and jasmine) in her hands. Her body emitted a wondrous red glow that was thousand times brighter than that of the rising sun. It seemed as though the groups of clouds in the ten directions were full of moons, due to the reflection of the beauty of her moon-like face. A single pearl of her umbrella lit the entire world with its immense brightness. Holding staffs studded with the nine gems and fans that were shining like the moon, Vijaya and three other handmaids were busy serving Sridevi. Her army was complete with all signs of royalty. All the celestials were busy praising her incomparable glory. Sridevi, surrounded by such luxury and pomp, seemed to indicate that she was the sole empress of the entire kingdom of infinite number of Shaktis. She was representing the glory of Shakti Samrajya, which was beyond the reach of ordinary speech and thought. She was showering grace on Brahma, Vishnu, Rudra, Indra and the other celestials, who were rushing forward with folded hands, to offer her their respects. The light from her five flower-arrows seemed to fill the entire universe. Celestial nymphs with lightening-like beauty were showering Laja Akshata on her, wishing an auspicious victory. Kameshwari and other goddesses, well dressed in battle costumes and holding weapons brighter than the sun, were serving her lotus feet. Her chariot had a flag that was touching the clouds and was decorated with the Srichakra symbol. Sridevi rode this chariot, filled with infinite number of immensely powerful Aavarana Shaktis. The celestials were praising her with twenty-five divine, gem-like names, which are capable of destroying the sins of the entire world.

अगस्त्य उवाच

वाजिवक्त्र महाबुद्धे पञ्चविम्शतिनामभिः ।

ललितापरमेशान्या देहि कर्णरसायनम् ॥ १२ ॥

श्री हयग्रीव उवाच

सिम्हासनेशी ललिता महाराज्ञी वराङ्कुशा ।

चापिनी त्रिपुरा चैव महात्रिपुरसुन्दरी ॥ १३ ॥

सुन्दरी चक्रनाथा च सम्राज्ञी चक्रिणी तथा ।

चक्रेश्वरी महादेवी कामेशी परमेश्वरी ॥ १४ ॥

कामराजप्रिया कामकोटिका चक्रवर्तिनी ।

महाविद्या शिवानङ्गवल्लभा सर्वपाटला ॥ १५ ॥

कुलनाथाम्नायनाथा सर्वाम्नायनिवासिनी ।

शृङ्गारनायिका चेति पञ्चविम्शतिनामभिः ॥ १६ ॥

स्तुवन्ति ये महाभागां ललितां परमेश्वरीम् ।

ते प्राप्नुवन्ति सौभाग्यमष्टौ सीद्धीर्महद्यशः ॥ १७ ॥

इति प्रचण्डसम्रम्भं चालयन्ती महद्बलम् ।

भण्डासुरं प्रतिक्रुद्धा चचाल ललिताम्बिका ॥ १८ ॥

Agastya says, "O horse-faced Lord! Please tell me those twenty-five names which are like nectar to the ears". Hayagriva says, "The twenty five names are: Simhasaneshi, Lalita, Maharajni, Varankusha, Chapini, Tripura, Mahatripurasundari, Sundari, Chakranatha, Samrajni, Chakrini, Chakreshwari, Mahadevi, Kameshi, Parameshwari, Kamarajapriya, Kamakotika, Chakravartini, Mahavidya, Shivanangavallabha, Sarvapatala, Kulanatha, Amnayanatha, Sarvamnayanivasini and Shringaranayika. One who recites these twenty-five names shall attain eight great spiritual accomplishments, prosperity and fame.

॥ श्री ब्रह्माण्डपुराणे उत्तरखण्डे हयग्रीवागस्त्यसम्वादे श्री ललितोपाख्याने त्रयोदशः ॥

॥ बालार्कमण्डलाभासां चतुर्बाहुं त्रिलोचनाम् ।

पाशाङ्कुशधनुर्बाणान् धारयन्तीं शिवां भजे ॥ ॐ ऐं ह्रीं श्रीं साङ्गायै सायुधायै सवाहनायै सपरिवारायै सर्वदेवतास्वरूपिण्यै श्रीललितामहात्रिपुरसुन्दर्यै परब्रह्मणे नमः ॥

॥ अथ चतुर्दशोऽध्यायः ॥

ध्यानम्

श्रीचक्रे नवरत्नजालविलसद्धेमैक सिम्हासने
तीव्राभिर्वरचक्रमध्यविलसद्गम्भीर सच्छक्तिभिः ।
शक्तिर्या ललिताम्बिकाद्भुत महाभण्डं प्रति प्रस्थिता
तां त्रैलोक्यकुटुम्बिनीं भवसतीं श्रीमीननेत्रां भजे ॥

[ श्रीचक्रराज गेयचक्ररथपर्वदेवता वर्णनम् ]

ॐ ऐं ह्रीं श्रीं

अगस्त उवाच

चक्रराजरथेन्द्रस्य याः पर्वाणि समाश्रिताः ।
देवताः प्रकटा मुख्यास्तासामाख्याश्च मे वद ॥ १ ॥
सङ्ख्याश्च तासामखिलान्वर्ण भेदाम्श्च शोभनान् ।
आयुधानि च दिव्यानि कथयस्व हयानन ॥ २ ॥

श्री हयग्रीव उवाच

नवमं पर्व दीप्तस्य रथस्य समुपाश्रिताः ।

दश प्रोक्ताः सिद्धिदेव्यस्तासां नामानि मच्छृणु ॥ ३ ॥

अणिमा महिमा चैव लघिमा गरिमा तथा ।

ईशिता वशिता चैव प्राप्तिः सिद्धिश्च सप्तमी ॥ ४ ॥

प्राकाम्या मुक्तिसिद्धिश्च सर्वकामाभिदा परा ।

एतादेव्यश्चतुर्भुजा जपाकुसुमसन्निभाः ॥ ५ ॥

चिन्तामणिं कपालं च त्रिशूलं सिद्धिकज्जलम् ।

दधाना दयया पूर्णा योगिभिश्च निषेविताः ॥ ६ ॥

तत्र पूर्वोर्ध्वभागे च ब्राह्म्याद्या अष्टशक्तयः ।

ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ॥ ७ ॥

वाराही चैव माहेन्द्री चामुण्डा चैव सप्तमी ।

महालक्ष्मीरष्टमी च द्विभुजाः शोणविग्रहाः ।

कपालमुत्पलं चैव बिभ्राणा रक्तवाससः ॥ ८ ॥

अथवान्यप्रकारेण केचिद्ध्यानं प्रचक्षते ।

ब्रह्मादिसदृशाकारा ब्रह्मादिसदृशायुधाः ॥ ९ ॥

ब्रह्मादीनां परं चिह्नं धारयन्त्यः प्रकीर्तिताः ।

तस्याप्यूर्द्ध्वस्थानगता मुद्रादेव्यो महत्तराः ॥ १० ॥

मुद्राविरचनायुक्तैर्हस्तैः कमलकान्तिभिः ।

दाडिमीपुष्पसङ्काशाः पीताम्बरमनोहराः ॥ ११ ॥

चतुर्भुजा भुजद्वन्द्वदृतचर्मकृपाणिकाः ।

मदरक्तविलोलाक्ष्यस्तासां नामानि मच्छृणु ॥ १२ ॥

सर्वसम्क्षोभिणी चैव सर्वविद्राविणी तथा ।

सर्वाकर्षिणिका मुद्रा तथा सर्ववशङ्करी ॥ १३ ॥

सर्वोन्मादनमुद्रा च षष्ठी सर्वमहाङ्कुशा ।

सर्वखेचरमुद्रा च सर्वबीजा तथाऽपरा ॥ १४ ॥

सर्वयोनिश्च नवमी तथा सर्वत्रिखण्डिका ।

सिद्धिब्राह्म्यादिमुद्राश्च ह्येताः प्रकटशक्तयः ॥ १५ ॥

Agastya says, "O horse-faced Narayana! Who are the deities present in Srichakra chariot? Tell me all about their numbers, appearance, ornaments and weapons". Hayagriva says: Ten great Siddhi goddesses occupy the ninth landing (Parva) of the Srichakra chariot. They are: Anima, Mahima, Laghima, Garima, Ishita, Vashita, Prapti, Prakamya, Mukti and Sarvakama Siddhis. These goddesses have four hands and have a complexion like the hibiscus flower. They hold Chintamani gem, skull, trident and miraculous collyrium. They are filled with compassion. Great yogis always worship these goddesses. Above this landing, in the eastern quarter, Brahmi and the eight Shaktis reside. They are: Brahmi, Maaheshwari, Kaumari, Vaishnavi, Varahi, Maahendri, Chamunda and Mahalakshmi. They have two hands, are of reddish complexion and are dressed in red garments. They hold skull and a blue-lotus in their hands. There is an alternate meditation prescribed for these goddesses. According to this, these Shaktis are meditated as having a similar form as that of their male forms namely Brahma, Ishwara and others. They also hold the same weapons as Brahma and the other male forms. Above the ninth landing, the ten Mudra goddesses are present. They hold their respective Mudras (hand gestures) and have the complexion similar to Dadimi (pomegranate) flower. They are dressed in yellow garments. They sport four hands holding, leather cases and swords in two hands. Their eyes are reddened due to intoxication. Their names are: Sarvasamkshobhini, Sarvavidravini, Sarvakarshini, Sarvavashankari, Sarvonmadini, Sarvamahankusha, Sarvakhechari, Sarvabija, Sarvayoni and Sarvatrikhanda. All these goddesses are known as Prakata (visible) Yoginis.

भण्डासुरस्य संहारं कर्तुं चक्ररथे स्थिताः ।

या गुप्ताख्याः पूर्वमुक्तास्तासां नामानि मच्छृणु ॥ १६ ॥

कामाकर्षिणिका चैव बुद्ध्याकर्षिणिका कला ।

अहङ्काराकर्षिणी  च शब्दाकर्षिणिका कला ॥ १७ ॥

स्पर्शाकर्षिणिका नित्या रूपाकर्षिणिका कला ।

रसाकर्षिणिका चैव गन्धाकर्षिणिका कला ॥ १८ ॥

चित्ताकर्षिणिका चैव धैर्याकर्षिणिका कला ।

स्मृत्याकर्षिणिका नित्या नामाकर्षिणिका कला ॥ १९ ॥

बीजाकर्षिणिका नित्या चात्माकर्षिणिका कला ।

अमृताकर्षिणी नित्या शरीराकर्षिणी कला ॥ २० ॥

एताः षोडश शीताम्शोः कलारूपाश्च शक्तयः ।

अष्टमं पर्व सम्प्राप्ता गुप्ता नाम्ना प्रकीर्तिताः ॥ २१ ॥

विद्रुमद्रुमसङ्काशा मन्दप्रहसिताननाः ।

चतुर्भुजास्त्रिनेत्राश्च चन्द्रार्धमुकुटोज्ज्वलाः ॥ २२ ॥

चापबाणौ चर्मखड्गौ दधाना दिव्यकान्तयः ।

भण्डासुरवधार्थाय प्रवृत्ताः कुम्भसम्भव ॥ २३ ॥

सायन्तनज्वलद्दीपप्रख्ये चक्ररथस्य तु ।

सप्तमे पर्वणि कृतावासा गुप्ततराभिदाः ।

अनङ्गशक्तयस्त्वष्टौ तासां नामानि मच्छृणु ॥ २४ ॥

अनङ्गकुसुमानङ्गमेखला च द्वितीयका ।

अनङ्गमदनानङ्गमदनातुरया सह ॥ २५ ॥

अनङ्गरेखा चानङ्गवेगाऽनङ्गाङ्कुशापि च ।

अनङ्गमालिन्यपरा एता देव्यो जपात्विषः ॥ २६ ॥

इक्षुचापं पुष्पशरान् पुष्पकन्दुकमुत्पलम् ।

बिभ्रत्योऽदभ्रविक्रान्तिशालिन्यो ललिताज्ञया ॥ २७ ॥

भण्डासुरं प्रतिक्रुद्धाः प्रज्वलन्त्य इव स्थिताः ।

चक्रराजरथेन्द्रस्य षष्ठं पर्व समाश्रिताः ॥ २८ ॥

सर्वसम्क्षोभिणीमुख्याः सम्प्रदायाख्यया युताः ।

वेणीकृतकच स्तोमाः सिन्दूरतिलकोज्ज्वलाः ॥ २९ ॥

अतितीव्रस्वभावाश्च कालानलसमत्विषः ।

वह्निचापं वह्निबाणं वह्निरूपमसिं तथा ॥ ३० ॥

वह्निचक्राख्यफलकं दधाना दीप्तविग्रहाः ।

असुरेन्द्रं प्रतिक्रुद्धाः कामभस्मसमुद्भवम् ।

आज्ञाशक्तय एवैता ललितायाः महौजसः ॥ ३१ ॥

सर्वसंक्षोभिणी चैव सर्वविद्राविणी तथा ।

सर्वाकर्षिणिका शक्तिः सर्वाह्लादनिका तथा ॥ ३२ ॥

सर्वसम्मोहिनी शक्तिः सर्वस्तंभनशक्तिका ।

सर्वजृम्भणशक्तिश्च तथा सर्ववशङ्करी ॥ ३३ ॥

सर्वरञ्जनशक्तिश्च सर्वोन्मादनशक्तिका ।

सर्वार्थसाधनीशक्तिः सर्वसम्पत्तिपूरणी ॥ ३४ ॥

सर्वमन्त्रमयी शक्तिः सर्वद्वन्द्वक्षयङ्करी ।

इत्येवं सम्प्रदायानां नामानि कथितानि वै ॥ ३५ ॥

Now I will tell you the names of Gupta (secret) Yoginis who reside in the eighth landing of the Srichakra chariot. They are: Kamakarshani, Budhyakarshini, Ahankarakarshini, Shabdakarshini, Sparshakarshini, Rupakarshini, Rasakarshini, Gandhakarshini, Chittakarshini, Dhairyakarshini, Smrityakarshini, Namakarshini, Bijakarshini, Atmakarshini, Amritakarshini and Sharirakarshini. They are of the form of the sixteen lunar digits. They have a complexion similar to that of the coral creeper. They have a smiling face, four hands and three eyes. Their crowns are decorated with half-moons. They hold bow, arrow, leather case and sword in their hands. They are readily waiting to destroy Bhandasura. In the seventh landing of Srichakra Guptatara (more secretive) Shaktis reside. They are Ananga (without limbs or related to cupid) Shaktis. They are eight in number. Their names are: Anangakusuma, Anangamekhala, Anangamadana, Anangamadanatura, Anangarekha, Anangavegini, Anangaankusha and Anangamalini. They have a hibiscus-like complexion. They are holding sugarcane bows, flower-arrows, flower-balls and blue lotuses in their hands. They are extremely powerful. According to Sri Lalita's orders, they are angrily waiting to destroy Bhandasura. In the sixth landing of the Srichakra chariot, Sampradaaya Yoginis are present. They have plaited hair and are decorated with saffron marks on the forehead. They are of fiery nature and are bright as the final fire of destruction. They hold blazing arrows, noose, sword and a discus like shield in their hands. They are extremely angry with Bhandasura. They are all Ajna Shaktis of Sri Lalita Mahatripurasundari. The names of these sampradaaya Shaktis are: Sarvasamkshobhini, Sarvavidravini, Sarvaakarshini, Sarvahladini, Sarvasammohini, Sarvastambhini, Sarvajrimbhini, Sarvavashankari, Sarvaranjini, Sarvonmadini, Sarvarthasadhini, Sarvasampattipurani, Sarvamantramayi and Sarvadwandwakshayankari.

रथपञ्चमपर्वस्थाः कुलोत्तिर्णा इति स्मृताः ।

ताश्च स्फटिकसङ्काशाः परशुं पाशमेव च ॥ ३६ ॥

गदां घण्टां मणिं चैव दधाना दीप्तविग्रहाः ।

देवद्विषमभिक्रुद्धा भ्रुकुटीकुटिलाननाः ।

एतासामपि नामानि समाकर्णय कुम्भज ॥ ३७ ॥

सर्वसिद्धिप्रदा देवी सर्वसम्पत्प्रदा पुनः ।

सर्वप्रियङ्करी देवी सर्वमङ्गलकारिणी ॥ ३८ ॥

सर्वकामप्रदा देवी सर्वदुःखविमोचिनी ।

सर्वमृत्युप्रशमनी सर्वविघ्ननिवारिणी ॥ ३९ ॥

सर्वाङ्गसुन्दरी देवी सर्वसौभाग्यदायिनी ।

दशैताः कथिता देव्यो दयया पूरिताशयाः ॥ ४० ॥

चक्रे तुरीयपर्वस्था मुक्तागौरसमत्विषः ।

निगर्भयोगिनीनाम्ना प्रथिता दश कीर्तिताः ॥ ४१ ॥

सर्वज्ञा सर्वशक्तिश्च सर्वैश्वर्यप्रदायिनी ।

सर्वज्ञानमयी देवी सर्वव्याधिविनाशिनी ॥ ४२ ॥

सर्वाधारस्वरूपा च सर्वपापहरा तथा ।

सर्वानन्दमयी देवी सर्वरक्षास्वरूपिणी ।

दशमी देवताज्ञेया सर्वेप्सितफलप्रदा ॥ ४३ ॥

एताश्चतुर्भुजा ज्ञेया वज्रं शक्तिं च तोमरम् ।

चक्रं चैवाभिबिभ्राणा भण्डासुरवधोद्यताः ॥ ४४ ॥

अथ चक्ररथेन्द्रस्य तृतीयं पर्वसम्श्रिताः ।

रहस्ययोगिनी नाम्ना प्रख्याता वागधीश्वराः ॥ ४५ ॥

रक्ताशोकप्रसूनाभा बाणकार्मुकपाणयः ।

कवचच्छन्नसर्वाङ्गयो विणापुस्तकशोभिताः ॥ ४६ ॥

वशिनी चैव कामेशी मोदिनी विमला तथा ।

अरुणा च जयिन्याख्या सर्वेशी कौलिनी तथा ।

अष्टावेताः स्मृता देव्यो दैत्यसम्हारमृत्यवः ॥ ४७ ॥

अथ चक्ररथेन्द्रस्य द्वितीयं पर्व सम्श्रिताः ।

तिस्रस्त्रिपीठनिलया अष्टबाहुसमन्विताः ॥ ४८ ॥

चापबाणौ पानपात्रं मातुलुङ्गं कृपाणिकाम् ।

फलकं नागपाशं च घण्टां चैव महाध्वनिम् ।

बिभ्राणा मदिरामत्ता अतिपूर्वरहस्यकाः ॥ ४९ ॥

कामेशी चैव वज्रेशी भगमालिन्यथापरा ।

तिस्र एताः स्मृता देव्यो भण्डशासनतत्पराः ॥ ५० ॥

ललितासममहात्म्या ललितासमतेजसः ।

एतास्तु नित्यं श्रीदेव्या अन्तरङ्गाः प्रकीर्तिताः ॥ ५१ ॥

Kulotteerna Yoginis are present in the fifth landing of the Srichakra chariot. They have a quartz-like (Sphatika) complexion. They hold axe, noose, mace and gem in their hands. Their names are: Sarvasiddhiprada, Sarvasampatprada, Sarvapriyankari, Sarvamangalakarini, Sarvakamaprada, Sarvaduhkhavimochani, Sarvamrityuprashamani, Sarvavighnanivarini, Sarvangasundari and Sarvasaubhagyadayini. These goddesses have compassionate hearts. The Shaktis residing in the fourth landing of the chariot have a pearl-like white complexion. They are ten in number and are called Nigarbha Yoginis. They are: Sarvajna, Sarvashakti, Sarvaishwaryapradayini, Sarvajnanamayi, Sarvavyadhivinashini, Sarvadharaswaroopa, Sarvapaapahara, Sarvanandamayi, Sarvarakshaswaroopini and Sarvepsitaphalaprada. They have four hands in which they hold Vajrayudha, Shakti, discus and an iron club. They are readily waiting to destroy Bhandasura. The goddesses of speech (Vagdevis) present in the third landing of the Srichakra chariot are called Rahasya Yoginis. They have a complexion similar to that of

the red Ashoka flowers. They are wearing armors and are holding bow, arrows, Veena and book in their hands. The eight Vagdevis are: Vashini, Kameshwari, Modini, Vimala, Aruna, Jayini, Sarveshwari and Kaulini. They are like death to the demons. Only three deities reside in the second landing of the Srichakra chariot. Seated on Tripeetha, they have eight hands. They hold goad, arrows, bowl of wine, Matulunga (a kind of citron fruit), sword, shield, snake-noose and a bell that makes a great noise. Intoxicated by wine, they are known as Atirahasya Yoginis. Their names are: Kameshwari, Vajreshwari and Bhagamalini. They are as powerful and charismatic as Sridevi herself. They are said to be highly intimate to Sridevi.

अथानन्दमहापीठे रथमध्यमपर्वणि ।

परितो रचितावासाः प्रोक्ताः पञ्चदशापराः ॥ ५२ ॥

तिथिनित्याः कालरूपाः विश्वं व्याप्यैव सम्स्थिताः ।

भण्डासुरादि दैत्येषु प्रारब्धभ्रुकुटीघनाः ॥ ५३ ॥

देव्या सम निजाकारा देवीसमनिजायुधाः ।

जगतामुपकाराय वर्तमाना युगे युगे ॥ ५४ ॥

तासां नामानि मत्तस्त्वमवधारय कुम्भज ॥ ५५ ॥

कामेशी भगमाला च नित्यक्लिन्ना तथैव च ।

भेरुण्डा वह्निवासिन्यौ महावज्रेश्वरी तथा ॥ ५६ ॥

दूती च त्वरिता देवी नवमी कुलसुन्दरी ।

नित्या नीलपताका च विजया सर्वमङ्गला ।

ज्वालामालिनिका चित्रा दश पञ्च च कीर्तिताः ॥ ५७ ॥

एताभिः सहिता देवी सदा सेवैकबुद्धिभिः ।

दुष्टं भण्डासुरं जेतुं निर्ययौ ललितेश्वरी ॥ ५८ ॥

In the central landing of the great chariot, seated on the Mahananda Peetha (the seat of great bliss) are the fifteen Nitya goddesses. They represent the fifteen Tithis (days) of the fortnight and thus are of the form of time. They have permeated the entire universe. They are extremely angry with Bhandasura and the other demons. These goddesses have a form similar to that of Sri Lalita Parameshwari and also hold similar weapons. They are present in all the yugas for the welfare of the world. Their names are: Kameshwari, Bhagamalini, Nityaklinna, Bherunda, Vahnivasini, Mahavajreshwari, Shivadooti, Tvarita, Kulasundari, Nitya, Neelapataka, Vijaya, Sarvamangala, Jwalamalini and Chitra. These goddesses are always interested in serving Sridevi. Along with all these great goddesses, Sri Lalita Mahatripurasundari proceeded to destroy Bhandasura.

मन्त्रिनाथा महाचक्रे गीतिचक्ररथोत्तमे ।

सप्तपर्वाणि चोक्तानि तत्र देव्यश्च ताः शृणु ॥ ५९ ॥

गेयचक्ररथे पर्वमध्यपीठनिकेतना ।

सङ्गीतयोगिनी प्रोक्ता श्रीदेव्या अतिवल्लभा ॥ ६० ॥

तथैव प्रथमं पर्व मन्त्रिण्यास्तु निवासभूः ।

अथ द्वितीयपर्वस्था गेयचक्ररथोत्तमे ॥ ६१ ॥

रतिः प्रीतिर्मनोजा च वीणाकार्मुकपाणयः ।

तमालश्यामलाकारा दानवोन्मर्दनक्षमाः ॥ ६२ ॥

तृतीयं पर्वसम्रूढा मनोभूबाणदेवताः ।

द्रविणी शोषिणी चैव बन्धिनी मोहिनी तथा ।

उन्मादिनी च पञ्चैता दीप्ता कार्मुकपाणयः ॥ ६३ ॥

तत्र पर्वण्यधस्तास्तु वर्तमाना महौजसः ।

कामराजश्च कन्दर्पो मन्मथो मकरध्वजः ।

मनोभवः पञ्चमः स्यादेते त्रैलोक्यमोहनाः ॥ ६४ ॥

कस्तूरितिलकोल्लासिफाला मुक्ताविभूषणाः ।

कवचच्छन्नसर्वाङ्गाः पलाशप्रसवत्विषः ।

पञ्चकामा इमे प्रोक्ता भण्डासुरवधार्थिनः ॥ ६५ ॥

गेयचक्ररथेन्द्रस्य चतुर्थं पर्व सम्श्रिताः ।

ब्राह्मीमुख्यास्तु पूर्वोक्ताश्चण्डिका त्वष्टमी परा ॥ ६ ।

तत्र पर्वण्यधस्तास्तु लक्ष्मीश्चैव सरस्वती ।

रतिः प्रीतिः कीर्तिशान्ती पुष्टिस्तुष्टिश्च शक्तयः ॥ ६७ ॥

एताश्च क्रोधरक्ताक्ष्यो दैत्यं प्रति महाबलाः ।

कुन्तचक्रधराः प्रोक्ताः कुमार्यः कुम्भसम्भव ॥ ६८ ॥

पञ्चमं पर्व सम्प्राप्ता वामाद्याः षोडशापराः ।

गीतिचक्ररथेन्द्रस्य तासां नामानि मच्छृणु ॥ ६९ ॥

वामा ज्येष्ठा च रौद्री च शान्तिः श्रद्धा सरस्वती ।

क्रियाशक्तिश्च लक्ष्मीश्च तुष्टिश्चैव तु मोहिनी ॥ ७० ॥

तथा प्रमाथिनी चाश्वासिनी वीचिस्तथैव च ।

विद्युन्मालिन्यथ सुरानन्दाऽथो नागबुद्धिका ॥ ७१ ॥

एतास्तु कुरुविन्दाभा जगत्क्षोभणलम्पटाः ।

महासमरसन्नाहमाददानाः पदे पदे ॥ ७२ ॥

वज्रकण्टकसञ्छन्नाः कठोराट्टहासोज्ज्वलाः ।

वज्रदण्डौ शतघ्नीं च सम्बिभ्राणा भुसुण्डिकाम् ॥ ७३ ॥

अथ गीतिरथेन्द्रस्य षष्ठं पर्व समाश्रिताः ।

असिताङ्गप्रभृतयो भैरवाः शस्त्रभीषणाः ॥७४ ॥

त्रिशिखं पानपात्रं च बिभ्राणा नीलवर्चसः ।

असिताङ्गो रुरुश्चण्डः क्रोधोन्मत्तश्च भैरवः ।

कपाली भीषणश्चैव सम्हाराश्चाष्ट भैरवाः ॥ ७५ ॥

अथ गीतिरथेन्द्रस्य सप्तमं पर्व सम्श्रिताः ।

मातङ्गी सिद्धलक्ष्मीश्च महामातङ्गिका तथा ।

महती सिद्धिलक्ष्मीश्च शोणा बाणधनुर्धराः ॥ ७६ ॥

तस्यैव पर्वणोऽधस्ताद्गणपः क्षेत्रपस्तथा ।

दुर्गाम्बा बटुकश्चैव सर्वे ते शस्त्रपाणयः ॥ ७७ ॥

तत्रैव पर्वणोऽधस्ताल्लक्ष्मीश्चैव सरस्वती ।

शङ्खपद्मनिधी चैव ते सर्वे शस्त्रपाणयः ।

लोकद्विषं प्रति क्रुद्धा भण्डं चण्डपराक्रमम् ॥ ७८ ॥

शक्रादयश्च विष्ण्वन्ता दशदिक् चक्रनायकाः ।

शक्तिरूपास्तत्र पर्वण्यधस्तात्कृतसम्श्रयाः ॥ ७९ ॥

वज्रं शक्तिं कालदण्डमसिं पाशं ध्वजं तथा ।

गदां त्रिशूलं दर्भास्त्रं चक्रं च दधतस्त्वमी ॥ ८० ॥

सेवन्ते मन्त्रिनाथां तां नित्यं भक्तिपरायणाः ।

भण्डासुरादिदुर्दान्तान्विजेतुं विश्वकण्टकान् ॥ ८१ ॥

मन्त्रिनाथाश्रयद्वारा ललिताज्ञापनोत्सुकाः ।

गीतिचक्ररथेन्द्रस्य दिक्पालाः सम्श्रयं दधुः ॥ ८२ ॥

There are seven landings in the Geeti Chakra or Geya Chakra (the chariot that makes musical sound whenever it moves) chariot of Sri Mantrini. In the central landing of this Geya Chakra chariot (circle of army formed by singers), Sri Rajashyamala Devi is seated. She is extremely dear to Sri Lalita Parameshwari. In the second landing of this great chariot, three goddesses Rati, Priti and Manoja reside. They hold Veena and bows in their hands and have a Tamaala-like (Tamaala is a tree with a very dark bark) bluish-black complexion. They are extremely capable in destroying demons. The deities present in the third landing of the chariot are called Manobhubana Devas (arrows personified as deities). They are five in number. Their names are: Dravini, Shoshini, Bandhini, Mohini and Unmadini. They hold blazing bows in their hands. Five cupids reside below this landing and are known as Panchakamas. They are: Kamaraja, Kandarpa, Manmatha, Makaradhwaja and Manobhava. They are capable of enchanting the entire world with their looks. They are decorated with a musk mark on the forehead and ornaments of pearls. They wear shiny armors. They have a complexion like the flower of Palasha tree (a green colored blossom). Brahmi and the other seven goddesses (already described) reside in the fourth landing of the Geya Chakra chariot along with Chandika. Below this landing, Lakshmi, Saraswati, Rati, Priti, Kirti, Shanti, Pushti and Tushti are present. These powerful virgin goddesses sport Kunta Chakra (a discus like lance or a barbed dart) in their hands. There are sixteen goddesses residing in the fifth landing of the chariot. They are: Vaamaa, Jyeshta, Raudri, Shanti, Shraddha, Saraswati, Kriya, Lakshmi, Tushti, Mohini, Pramathini, Ashwasini, Vichi, Vidyunmalini, Surananda and Nagabuddhikaa. These goddesses have a ruby-like complexion. They are capable of causing agitation to the entire creation. They are busy making preparations for the battle again and again. Wearing diamond armors, they laugh with a thunderous roar. They are holding weapons like Vajradanda, Shataghni and Bhusundi. Terrifying Bhairavas occupy the sixth landing of Geya Chakra chariot. They are of a blue complexion and hold tridents and bowls of wine in their hands. They are: Asitanga, Ruru, Chanda, Krodha, Unmatta, Kapali, Bheeshana and Samhara Bhairavas. Let me tell you the divine names of the deities present in the seventh landing of the chariot. They are: Matangi, Siddhalakshmi, Mahaamaatangika, Mahati and Siddhilakshmi. They are of a red complexion and hold bow and arrows in their hands. Below the seventh landing, Ganapathi, Kshetrapala, Durga and Vatuka Bhairava reside, sporting various weapons in their hands. Even below this, Lakshmi, Saraswati, Shankha & Padma Nidhis (treasures) reside. Even below this, Indra, Vishnu and the other eight Dikpalas (caretakers of the ten quarters) are present as Shaktis. They sport weapons like Vajra, Shakti, Kaladanda (staff of Yama, the Lord of death), sword, noose, flag, mace, trident, Darbhastra and discus. In order to destroy Bhandasura and the other demons, these celestials are busy serving Sri Shyamala. They are forever ready to execute the orders of Sri Lalita Parameshwari, which they receive through the agency of Sri Rajashyamala Devi.

सर्वेषां चैव देवानां मन्त्रिणी द्वारतः कृता ।

विज्ञापना महादेव्याः कार्यसिद्धिं प्रयच्छति ॥ ८२ ॥

राज्ञि विज्ञापना चेत्स्यात्प्रधानद्वारतः कृता ।

तदा खलु फलप्राप्तिः सेवकानां प्रजायते ॥ ८४ ॥

अन्यथा कुत एतेषां सामर्थ्यं ज्वलितौजसः ।

अप्रधृष्य प्रभावायाः श्रीदेव्या उपसर्पणे ॥ ८५ ॥

सा हि सङ्गीतविद्येशी श्रीदेव्या अतिवल्लभा ।

नातिलंघयति क्वापि तदुक्तं कार्यसिद्धिषु ॥ ८६ ॥

श्रीदेव्याः शक्तिसाम्राज्ये सर्वकर्माणि मन्त्रिणी ।

अकर्तुमन्यथाकर्तुं कर्तुं चैव प्रगल्भते ॥ ८७ ॥

तस्मात्सर्वेऽपि दिक्पालाः श्रीदेव्या जयकांक्षिणः ।

तस्याः प्रधानभूतायाः सेवामेव वितन्वते ॥ ८८ ॥

इति श्रीललितादेव्याश्चक्रराज रथोत्तमे ।

पर्वस्थितानां देवीनां नामानि कथितान्यलम् ॥ ८९ ॥

भण्डासुरस्य सम्हारे तासां दिव्यायुधान्यपि ।

प्रोक्तानि गेयचक्रस्य पर्वदेव्यश्च कीर्तिताः ॥ ९० ॥

इमानि पर्वदेवीनां नामान्याकर्णयन्ति ये ।

सर्वपापविनिर्मुक्ता युद्धे विजयिनो नराः ॥ ९१ ॥

Sri Lalita Parameshwari grants the desires of all those celestials who approach her through Sri Rajashyamala Devi. In the world, it is possible to obtain favors from the king by approaching him through the agency of his minister. Or else how would it become possible for anyone to gain entry to the supreme queen Sri Lalita Mahatripurasundari? Sri Mantrini, who is the goddesses of music, is extremely dear to Sridevi. Sri Lalita never acts against the counsel of Sri Shyamala. It is Sri Mantrini Devi who is responsible for the all the happenings in the Shakti kingdom of Sridevi. Hence, Indra, Vishnu and the other guardians of the quarters, desirous of Sridevi's victory, serve Sri Mantrini Devi. I have elaborately told you the names of the deities present in the nine landings of the great Srichakra chariot. I have told you the weapons that they hold in order to destroy Bhandasura. I have also described the names of the deities residing in the Geya Chakra. Men who hear the names of all these divine Shaktis shall get rid of all their accumulated sins and obtain victory in warfare.

॥ श्री ब्रह्माण्डपुराणे उत्तरखण्डे हयग्रीवागस्त्यसम्वादे श्री ललितोपाख्याने चतुर्दशः ॥

॥ बालार्कमण्डलाभासां चतुर्बाहुं त्रिलोचनाम् ।
पाशाङ्कुशधनुर्बाणान् धारयन्तीं शिवां भजे ॥ ॐ ऐं ह्रीं श्रीं साङ्गायै सायुधायै सवाहनायै सपरिवारायै सर्वदेवतास्वरूपिण्यै श्रीललितामहात्रिपुरसुन्दर्यै परब्रह्मणे नमः ॥

॥ अथ पञ्चदशोऽध्यायः ॥

ध्यानम्

श्रीदेव्या नवचक्रपर्वनिहिता श्रीमन्त्रिणी चक्रगा
शृङ्गारैकसुविग्रहोत्करलसन्नानायुधोद्यत्कराः ।
विष्ण्वाद्या अपि लोकपालविभवो यस्याङ्घ्रिसेवापरा

स्युस्तां पर्वसु सुन्दरेशमहिषीं श्रीमीननेत्रां भजे ॥

[ किरिचक्र रथपर्व देवतानुवर्णनम् ]

ॐ ऐं ह्रीं श्रीं

श्री हयग्रीव उवाच

किरिचक्ररथेन्द्रस्य पञ्चपर्व समाश्रिताः ।

देवताश्च शृणु प्राज्ञ नाम यच्छृण्वतां जयः ॥ १ ॥

प्रथमं पर्व बिन्द्वाख्यं सम्प्राप्ता दण्डनायिका ।

सा तत्र जगदुद्दण्डकण्टकव्रातघस्मरी ॥ २ ॥

नानाविधास्त्रज्वालाभिर्नर्तयन्ती जयश्रियम् ।

उद्दण्डप्रोतनिर्घातनिर्भिण्णोद्धत दानवा ॥ ३ ॥

दंष्ट्रा बालमृगाङ्कस्य विहासनविभावरी ।

प्रावृषेण्यपयोवाह व्यूहनीलवपुर्लता ॥ ४ ॥

किरिचक्ररथेन्द्रस्य सालङ्कारयते सदा ।

पोत्रिणी पुत्रिताशेषविश्वा वार्तालिकाम्बिका ॥ ५ ॥

तस्यैव रथनाथस्य द्वितीयं पर्व सम्श्रिताः ।

जृम्भिनी मोहिनी चैव स्तम्भिनी तिस्र एव च ।

उत्फुल्लदाडिमीप्रख्याः सर्वदानवमर्दनाः ॥ ६ ॥

मुसलं च हलं हालापात्रं फणिमहागुणम् ।

ज्वलन्माणिक्यवलयैर्बिभ्राणाः पाणिभिर्निजैः ॥ ७ ॥
अतिदीप्तकरालाक्षिज्वालाभिर्दैत्यसैनिकान् ।
दहन्त्य इव निश्शङ्कं सेवन्ते सूकराननाम् ॥ ८ ॥
किरिचक्ररथेन्द्रस्य तृतीयं पर्व सम्श्रिताः ।
अन्धिन्याद्याः पञ्चदेव्यो देवीमन्त्रकृतास्पदाः ॥ ९ ॥
कठोरेणाट्टहासेन भिन्दन्त्यो भुवनत्रयम् ।
ज्वाला इव च कल्पाग्नेरङ्गनावेषमाश्रिताः ॥ १० ॥
भण्डासुरस्य सैन्यानां सर्वेषां रुधिरप्लुतिम् ।
लिलिक्षमाणा जिह्वाभिर्लेलिहानाभिरुज्वलाः ।
सेवन्ते सततं दण्डनाथामुद्दण्डविक्रमाम् ॥ ११ ॥
किरिचक्ररथेन्द्रस्य चतुर्थं पर्व सम्श्रिताः ।
ब्राह्म्याद्याः पञ्चमीवर्ज्या अष्टमीवर्जिता अपि ॥ १२ ॥
षडेव देव्यः षट्चक्रं ज्वलज्ज्वालाकलेवराः ।
महता विक्रमौघेन पिबन्त्य इव दानवान् ।
आज्ञया दण्डानाथायास्तं प्रदेशमुपासते ॥ १३ ॥
तस्यैव पर्वणोऽधस्तात्परितः स्थानमाश्रिताः ।
याकिनी राकिनी चैव लाकिनी वाकिनी तथा ॥ १४ ॥
शाकिनी डाकिनी चैव तासामैक्यस्वरूपिणी ।
हाकिनी सप्तमीत्येताश्चण्डदोर्दण्डविक्रमाः ॥ १५ ॥

पिबन्त्य इव भूतानि पिंक्षन्त्य इव मेदिनीम् ।

त्वचं रक्तं तथा माम्सं मेदोऽस्थि च विरोधिनाम् ॥ १६ ॥

मज्जां प्लीहं च शुक्लं च पिबन्त्यो विकटाननाः ।

निष्ठुरैः सिम्हनादैश्च पूरयन्त्यो दिशो दश ।

धातुनाथा इति प्रोक्ता अणिमाद्यष्टसिद्धिदाः ॥ १७ ॥

मोहने मारणे चैव स्तम्भने ताडने तथा ।

भक्षणे दुष्टदैत्यानामामूलं च निकृन्तने ॥ १८ ॥

पण्डिताः खण्डिताशेषविपदो भक्तिशालिषु ।

धातुनाथा इमाः प्रोक्ताः सर्वधातुषु सम्स्थिताः ॥ १९ ॥

सप्तापि वारिधीनूर्मिमाला सञ्चूषिताम्बरान् ।

क्षणार्धेनैव निष्पातुं निष्पन्नबहुसाहसाः ॥ २० ॥

शकटीचक्रवद्वृत्तभयङ्करविलोचनाः ।

स्वस्वामिनीद्रोहकृतां स्वकीयसमयद्रुहाम् ॥ २१ ॥

वैदिकद्रोहिणां देवद्रोहिणां वीरवैरिणां ।

यज्ञद्रोहकृतां दुष्टदैत्यानां भक्षणे क्षमाः ।

नित्यमेव हि सेवन्ते पोत्रिणीं दण्डनायिकाम् ॥ २२ ॥

O Agastya! Now listen to the divine names of the deities present in the Kiri Chakra chariot of Sri Dandanatha (Varahi) Devi. By simply listening to these divine names, one shall obtain victory. The first landing of this chariot is the great bindu. Sri Varahi is present in this Bindu. Staying here, she destroys all the evils that bother the creation. With various weapons, she is forever in charge of victory. She is piercing the demons with her sharp teeth (horn). She has a creeper like body with a blue complexion that is

comparable to a group of rain clouds. Her blue body seems like the dark night in which her half-moon-like teeth shine bright (as though the moon is smiling in the night sky). The great goddess has the entire world as her child. She enhances the beauty of the Kiri Chakra chariot, on which she is seated. There are three goddesses seated on the second landing of this chariot. They are: Jrimbhini, Mohini and Stambhini. These goddesses have a complexion like that of the blooming Dadimi (pomegranate) flower. They are capable of eliminating the entire race of the demons. Holding weapons like Musala, plough, bowl of wine ands snake, they are decorated with bangles made of ruby. They are capable of burning the demons from the sparks that emanate from their sharp, terrifying eyes. They are busy serving Sri Varahi without any doubt. The deities residing in the third landing of the chariot are: Andhini, Rundhini, Stambhini, Mohini and Jhrimbhini. These are associated with the Mantra of Sri Varahi Devi. Their form seems to be the very personification of the flames of the final fire of destruction. Their thunderous laughter is sufficient to pierce the three worlds. They have stretched their tongues to drink the blood of Bhandasura's army. They are always busy serving Sri Varahi. The six deities residing in the fourth landing are: Brahmi, Maaheshwari, Kaumari, Vaishnavi, Indrani and Chamunda. These goddesses with blazing forms reside in the six Chakras as per the order of Sri Dandanatha Devi. Below this landing, present are the deities Yakini, Rakini, Lakini, Vakini, Shakini and Dakini. The seventh goddess Hakini is the congregate of the rest. These goddesses are extremely powerful. They have fearful faces and are busy drinking the blood, skin, flesh, bones, semen, fat and bone marrow of the enemies. These goddesses known as the Dhatunathas (the deities of the seven Dhatus in the body) grant the eight great spiritual accomplishments to the devoted. They are busy in enchanting, killing, immobilizing, beating and swallowing the demons. They are also well versed in destroying all the dangers that bother the good and the devoted. These goddesses are powerful enough to drink the waters of the seven great oceans. Their eyes are round and large like the wheels of a cart. They are ever ready to destroy people who offend or act against Sri Varahi, the Vedas, the system of Samayachara, deities, Veerachara and Yajnas.

तत्रैव पर्वणः पार्श्वद्वितये कृतमन्दिरे ।

क्रोधिनी स्तम्भिनी ख्याते वर्तेते देवते उभे ॥ २३ ॥

चामरे वीजयन्त्यौ च लोलकङ्कणदोर्लते ।

देवद्विषां चमूरक्तहालापानमदोद्धते ।

सदैव घूर्णमानाक्ष्यौ सदा प्रहसितानने ॥ २४ ॥

अथ तस्य रथेन्द्रस्य किरिचक्राभिधाजुषः ।

पार्श्वद्वयकृतावासमायुधद्वयमुद्धतम् ।
हलं च मुसलं चैव देवतारूपमास्थितम् ॥ २५ ॥
स्वकीयमुकुटस्थाने स्वकीयायुधविग्रहम् ।
आबिभ्राणं जगद्वेषिघस्मरं विबुधैः स्मृतम् ॥ २६ ॥
एतदायुधयुग्मेन ललिता दण्डनायिका ।
खण्डयिष्यति संग्रामे विषङ्गं नाम दानवम् ॥ २७ ॥
तस्यैव पर्वणो दण्डनाथायास्त्वग्रसीमनि ।
वर्तमानो महाभीम सिम्हनादध्वनन्नभाः ॥ २८ ॥
दंष्ट्राकटककटात्कार बधिरीकृतदिङ्मुखः ।
चण्डोच्चण्ड इति ख्यातश्चतुर्हस्तस्त्रिलोचनः ॥ २९ ॥
शूलं खड्गं प्रेतपाशौ दधानो दीप्तविग्रहः ।
सदा सम्सेवते देवीं पश्यन्नेव हि पोत्रिणीम् ॥ ३० ॥
किरिचक्ररथेन्द्रस्य पञ्चमं पर्व सम्श्रिताः ।
वार्ताल्याद्या अष्टदेव्यो दिक्ष्वष्टसु च विश्रुताः ॥ ३१ ॥
अष्टपर्वत निष्पाति घोरनिर्घात निःस्वनाः ।
अष्टनागस्फुरद्भूषा अनष्टबलतेजसः ॥ ३२ ॥
प्रकृष्टदोःप्रकाण्डोष्म हुतदानवकोटयः ।
सेवन्ते ललितादेव्या दण्डनाथामहर्निशम् ॥ ३३ ॥
तासामाख्याश्च विख्याताः समाकर्णय तापस ॥ ३४ ॥

वार्ताली चैव वाराही सा वराहमुखी परा ।

अन्धिनी रुन्धिनी चैव जृम्भिणी चैव मोहिनी ।

स्तम्भिनीति रिपुक्षोभ स्तम्भनोच्चाटनक्षमाः ॥ ३५ ॥

तस्यैव पर्वणो वामभागे सन्ततसंस्थितिः ।

दण्डनाथौपवाह्यस्तु कासरो धूसराकृतिः ॥ ३६ ॥

अर्धक्रोशायतः शृङ्गद्वितयः क्रोशविग्रहः ।

खड्गवन्निष्ठुरैर्लोमजालैः सम्वृतविग्रहः ॥ ३७ ॥

नीलाञ्जनाचलप्रस्थविकटोन्नतपृष्ठभूः ।

महानीलगिरिश्रेष्ठगरिष्ठस्कन्धमण्डलः ॥ ३८ ॥

प्रभूतोष्मल निःश्वासप्रसराकम्पिताम्बुधिः ।

घर्घरध्वनिना कालमहिषं विहसन्निव ।

वर्तते खुरविक्षिप्तपुष्कलावर्तवारिदः ॥ ३९ ॥

तस्यैव पर्वणोऽधस्तादुच्चस्थानकृतालयाः ।

इन्द्रादयोऽनेकभेदा दिशामष्टकदेवताः ॥ ४० ॥

ललितायां कार्यसिद्धिं विज्ञापयितुमागताः ।

लोकस्यापि च सम्रक्षां सम्पादयितुमागताः ॥ ४१ ॥

तन्नामानि शृणु प्राज्ञ सङ्कोचात्कथितानि मत् ।

इन्द्रश्चाप्सरसश्चैव सचतुष्षष्टिकोटयः ॥ ४२ ॥

सिद्धा अग्निश्च साध्याश्च विश्वेदेवास्तथाऽपरे ।

विश्वकर्मा मयश्चैव मातरश्च बलोन्नताः ॥ ४३ ॥

रुद्रस्य परिवाराश्च रुद्राश्चैव पिशाचकाः ।

निर्ऋती रक्षसां नाथो राक्षसा बहवस्तथा ॥ ४४ ॥

मित्राश्च तत्र गन्धर्वाः सदा गानविशारदाः ।

विश्वावसुप्रभृतयो विख्यातास्तत्पुरोगमाः ॥ ४५ ॥

तथा भूतगणाश्चान्ये वरुणो वसवः परे ।

विद्याधराः किन्नराश्च मारुतेश्वर एव च ॥ ४६ ॥

तथा चित्ररथश्चैत्ररथकाननकारकः ।

तुम्बुरुर्नारदो यक्षः सोमो यक्षेश्वरस्तथा ॥ ४७ ॥

देवाश्च भगवांस्तत्र गोविन्दः कमलापतिः ।

ईशानश्च जगच्चक्ररक्षकः शूलभीषणः ॥ ४८ ॥

ब्रह्मा चाश्विनिपुत्रौ च वैद्यविद्याविशारदौ ।

धन्वन्तरिश्च भगवानऽथान्ये गणनायकाः ॥ ४९ ॥

कटक्रोडगलद्दानसन्तर्पित मधुव्रताः ।

एवं प्रकारा बहवो देवतास्तत्र जाग्रति ।

पूर्वादि दिशमारभ्य परितः कृतमन्दिराः ॥ ५० ॥

तत्रैव देवताश्चक्रे शक्रासुरमरुद्दिशः ।

आश्रित्य किल वर्तन्ते तदधिष्ठानदेवताः ॥ ५१ ॥

On either side of the same landing, there are two Shaktis called Krodhini and Stambhini. Decorated with loose bangles, they fan Sri Dandanatha. They are intoxicated with the

blood of the demons and have a smiling face. On either side of the Kiri Chakra chariot, weapons called Hala (plough) and Musala (lance) are present in the form of deities. In place of crown, they are decorated with their own weapons. In future, it is with these weapons that Sri Varahi kills a demon called Vishanga. Right in front of Sri Dandanatha is a deity named Chandocchanda. His thunderous roar echoes all through the sky and the sound he makes with his sharp teeth deafens the world. He has four hands and three eyes. He holds trident, sword and Pretapasha in his hands. With his sight fixed on Sri Dandanatha, he is busy serving Sri Varahi. Vartali and the other goddesses are present in the fifth landing of this great chariot. They are decorated with eight serpents and have indestructible vigor and power. Capable of burning the race of demons, they are busy serving the commander of Sri Lalita Mahatripurasundari. Their names are: Vartali, Varahi, Varahamukhi, Andhini, Rundhini, Jrimbhini, Mohini and Stambhini. They are well versed in agitating the enemies and eradicating them. On the left side of the same landing, a smoke-colored buffalo is present, which is a vehicle of Sri Dandanatha. Its horns are as long as two Kroshas. Its body is about one Krosha. Its body is covered with hair, which are sharp like the sword. It has a tail that resembles the staff of Yama, the god of death. Its back, which is scary and tall, resembles a mountain of collyrium. Its breath is capable of agitating the seven oceans. The 'Ghurughuru' noise it makes seems to make fun of Mahisha, Yama's vehicle. By simply thumping its hooves, it is able to scatter the clouds in the sky. Below the same landing, Indra and the other celestials are present on raised platforms. They are present here to remind Sri Lalita Parameshwari of their request and to facilitate the protection of the world. Let me briefly describe their names. Indra, sixty-four crores of divine damsels and celestials, Siddhas, fire-god, Sadhyas, Vishwedevas, Vishwakarma and Maya (sculptors), Matridevatas, eleven Rudras and their group, Pishachas, Nirriti, demons, Mitras, Vishwavasu and the other Gandharvas, groups of spirits, Varuna, eight Vasus, Vidyadharas, Kinnaras, Vayu, Chitraratha- the creator of forests, Tumburu, Narada, Yakshas headed by Kubera, Soma, Lord Narayana, Lord Ishwara, Brahma, Ashwini Devas- the celestial physicians, Dhanvantari, Gananayakas - all of them are present there. In this circle of celestials, Indra, Kubera and Vayu are present in their respective directions.

जृम्भिणी स्तम्भिनी चैव मोहिनी तिस्र एव हि ।

तस्यैव पर्वणः प्रान्ते किरिचक्रस्य भास्वतः ॥ ५२ ॥

कपालं च गदां बिभ्रदूर्ध्वकेशो महावपुः ।

पातालतलजम्बाल बहुलाकारकालिमा ॥ ५३ ॥

अट्टहासमहावज्रदीर्णब्रह्माण्डमण्डलः ।

भिन्दन् डमरुकध्वानैरोदसीकन्दरोदरम् ॥ ५४ ॥

पूत्कारित्रिफणायुक्तं फणिपाशं करे वहन्।
क्षेत्रपालः सदा भाति सेवमानः किटीश्वरीम् ॥ ५५॥
तस्यैव च समीपस्थस्तस्या वाहनकेसरी।
यमारुह्य प्रववृधे भण्डासुरवधैषिणी॥ ५६॥
प्रागुक्तमेव दण्डेशीवाहसिम्हस्य लक्षणम्।
तस्यैव पर्वणोऽधस्ताद्दण्डनाथासमत्विषः॥ ५७॥
दण्डिनीसदृशाशेष भूषणायुधमण्डिताः।
श्यामाः क्रोडाननाश्चन्द्ररेखोत्तम्सितकुन्तलाः॥ ५८॥
हलं च मुसलं हस्ते घूर्णयन्त्यो मुहुर्मुहुः।
ललिताद्रोहिणां श्यामाद्रोहिणां स्वमीनीद्रुहाम्॥ ५९॥
रक्तस्रोतोभिरुत्कूलैः पूरयन्त्यः कपालकम्।
निजभक्तद्रोहकृतामान्त्रमाला विभूषणाः॥ ६०॥
स्वगोष्ठीसमयाक्षेपकारिणां मुण्डमण्डलैः।
अखण्डरक्तविच्छेदैः कृतपैकक्ष्यकश्रियः।
सहस्रं देवताः प्रोक्ताः सेवमानाः किटीश्वरीम्॥ ६१॥
तासां नामानि सर्वासां दण्डिन्याः कुम्भसम्भव।
सहस्रनामाध्याये तु वक्ष्यन्ते नाधुना पुनः॥ ६२॥
अथासां देवतानां च कोलास्यानां समीपतः।
वाहनः कृष्णसारङ्गो दण्डिन्याः समवस्थितः॥ ६३॥

क्रोशार्धार्धायतः शृङ्गे तदर्धार्धायतो मुखे ।

क्रोशप्रमाणपादश्च सदा चोद्धृतवालधिः ॥ ६४ ॥

उदरे धवलच्छायो हुङ्कारेण महीयसा ।

हसत्मारुतवाहस्य हरिणस्य पराक्रमम् ।

तस्यैव पर्वणो देशे वर्तते वाहनोत्तमः ॥ ६५ ॥

किरिचक्ररथेन्द्रस्य तस्य तत्रैव पर्वणि ।

वर्तते मदिरासिन्धुर्देवतारूपमास्थितः ॥ ६६ ॥

माणिक्यगिरिवच्छोणं हस्ते पिशितपिण्डकम् ।

दधानो घूर्णमानाक्षः स्वर्णाम्भोजस्रगावृतः ।

मदशक्त्या समाश्लिष्टो धृतरक्तसरोजया ॥ ६७ ॥

यदा यदा भण्डदैत्यसंग्रामः सम्प्रवर्तते ।

युद्धे खेदमनुप्राप्ताः शक्तयः स्युः पिपासिताः ॥ ६८ ॥

तदा तदा सुरासिन्धुरात्मानं बहुधा क्षिपन् ।

रणखेदं देवतानामञ्जसाऽपाकरिष्यति ॥ ६९ ॥

तदत्यद्भुतमेवर्षे भविष्यति न सम्शयः ।

तदा श्रोष्यसि संग्रामे कथ्यमानं मया मुदा ॥ ७० ॥

तस्यैव पर्वणोऽधस्तादष्टदिक्ष्वथ एव च ।

उपर्यपि कृतावासा हेतुकाद्या दश स्मृताः ॥ ७१ ॥

महान्तो भैरवश्रेष्ठा ख्याता वातापितापन ।

उद्दिप्तायुधतेजोभिर्दिवा दीपितभानवः ॥ ७२ ॥

कल्पान्तकाले दण्डिन्या आज्ञया विश्वघस्मराः ।

अत्युदग्रप्रकृतयः कटुदंष्ट्रारटन्मुखाः ॥ ७३ ॥

त्रिशूलाग्रविनिर्भिण्ण महावारिदमण्डलाः ।

हेतुकस्त्रिपुरारिश्च तृतीयश्चाग्निभैरवः ॥ ७४ ॥

यमजिह्वैकपादौ च तौ च कालकरालकौ ।

भीमरूपो हाटकेशस्तथैवाचल नामवान् ॥ ७५ ॥

एते दशैव विख्याता दशकोटिभटान्विताः ।

तस्यैव किरिचक्रस्य वर्तन्ते पर्वसीमनि ॥ ७६ ॥

एवं हि दण्डनाथायाः किरिचक्रस्थदेवताः ।

जृम्भिण्याद्यचलेन्द्रान्ताः प्रोक्तास्त्रैलोक्यपालनाः ॥ ७७ ॥

तत्रत्यैर्देवतावृन्दैर्बहवस्तत्र सङ्गरे ।

दानवा मारयिष्यन्ते पास्यन्ते रक्तवृष्टयः ॥ ७८ ॥

इत्थं बहुविधत्राणं पर्वस्थैर्देवतागणैः ।

किरिचक्रं दण्डनेत्र्या रथरत्नं चचाल ह ॥ ७९ ॥

Three goddesses Jhrimbhini, Stambhini and Mohini are present in the fifth landing of this radiant chariot. In the region of the same landing, Kshetrapala is present holding skull and mace in his hands. He has his hair tied upwards and has a large body. He is dark like the moss at the bottom of the nether worlds. His thunderous laughter is like the Vajrayudha, capable of slicing the entire universe. He is constantly agitating the earth and sky by sounding his Damaruka (hand drum). In the form of noose, he is holding a serpent with three heads, in his hands. Kshetrapala is always serving Sri Varahi Devi. Her vehicle, the great lion, is also present nearby. O Agastya, I have already described this lion to you. Below this region, there are a thousand Shaktis, resembling Sri Dandanatha

in from and complexion and sporting the same weapons as Sri Varahi. They have long, sharp canines and have a bluish-black complexion. They hold Hala and Musala in their hands. They fill the skulls held in their hands with the blood of all those who betray Sri Lalita Parameshwari, Sri Shyamala or Sri Varahi. They decorate themselves with the intestines of all those who betray or offend the devotees of Sridevi. I shall tell you the divine names of these thousand Shaktis in the Sahasranama chapter (of Sri Dandanatha). So, I will not repeat them now. Also nearby is another vehicle of Sri Dandanatha, the Krishna Saranga (the black antelope or spotted deer). Its horns are about half a Krosha, face is about ¾th Krosha and its legs are about a Krosha each. Its tail is always raised. It has a white belly. This wonderful vehicle is also present in the fifth landing of the Kiri Chakra chariot. In the same landing, Sura Samudra (the ocean of liquor or wine) is also present in the form of a deity. Like a mountain of ruby, he has a red complexion and is holding a lump of meat in his hands. Decorated with golden ornaments, he is in the embrace of Mada Shakti, who holds a red lotus in her hands. During the battle, whenever the Shaktis experience fatigue, Sura Samudra assumes various forms and distributes Sura to them to banish their fatigue. You shall know his wonderful role in the later part of the story. In the eight directions of this landing, ten great Bhairavas are present. They are very famous and powerful. They seem to brighten the sun with their own brightness. During the end of the creative cycle, they destroy the world as per the orders of Sri Varahi. Holding tridents, they seem to pierce the skies. Their names are: Hetuka, Tripurari, Agni, Yamajihva, Ekapada, Kaala, Karaala, Bheemaroopa, Haatakesha and Achala Bhairavas. Along with ten crore attendants, they reside in the fifth landing of the Kiri Chakra chariot. O sage! I have described to you, all the divinities residing in this chariot, from Jrimbhini to Achala Bhairava. All these deities shall kill demons and drink their blood in the battle. In this way, with all these Shaktis, the great Kiri Chakra chariot of Sri Dandanatha Varahi proceeded further towards the battlefield.

चक्रराजरथो यत्र तत्र गेयरथोत्तमः ।

यत्र गेयरथस्तत्र किरिचक्ररथोत्तमः ॥ ८० ॥

एतद्रथत्रयं तत्र त्रैलोक्यमिव जङ्गमम् ।

शक्तिसेनासहस्रस्य मध्ये विरुरुचेतराम् ॥ ८१ ॥

मेरुमन्दरविन्ध्यानां समवाय इवाभवत् ।

महाघोषः प्रववृधे शक्तीनां सैन्यमण्डले ।

चचाल वसुधा सर्वा तच्चक्रैरवदारिता ॥ ८२ ॥

ललिताचक्रराजाख्यरथनाथस्य कीर्तिताः ।

षट्सारथय उद्दण्ड पाशग्रहणकोविदाः ॥ ८३ ॥

इरादेवी प्रथमतस्तथा त्रिपुरभैरवी ।

सम्हारभैरवश्चान्यो रक्तयोगिनीवल्लभः ॥ ८४ ॥

सारसः पञ्चमश्चैव चामुण्डा च तथा परा ।

एतासु देवतास्तत्र रथसारथयः स्मृताः ॥ ८५ ॥

गेयचक्ररथेन्द्रस्य सारथिस्तु हसन्तिका ।

किरिचक्ररथेन्द्रस्य स्तम्भिनी सारथिः स्मृता ॥ ८६ ॥

दशयोजनमुन्नम्रो ललितारथपुङ्गवः ।

सप्तयोजनमुच्छ्रायी गीतिचक्ररथोत्तमः ।

षड्योजनसमुन्नम्रः किरिचक्ररथो मुने ॥ ८७ ॥

महामुक्ताशपत्रं तु दशयोजनविस्तृतम् ।

वर्तते ललितेशान्या रथ एव न चान्यतः ॥ ८८ ॥

तदेव शक्तिसाम्राज्यसूचकं परिकीर्तितम् ।

सामान्यमातपत्रं तु रथद्वन्देवेऽपि वर्तते ॥ ८९ ॥

अथ सा ललितेशानी सर्वशक्तिमहेश्वरी ।

महासाम्राज्यपदवीमारूढा भुवनेश्वरी ।

चचाल भण्डदैत्यस्य जयसिद्ध्यभिकांक्षिणी ॥ ९० ॥

शब्दायन्ते दिशः सर्वाः कम्पते च वसुन्धरा ।

क्षुभ्यन्ति सर्वभूतानि ललितेश्या विनिर्गमे ।

देवदुन्दुभयो नेदुर्निपेतुः पुष्पवृष्टयः ॥ ९१ ॥

विश्वावसुप्रभृतयो गन्धर्वाः सुरगायकाः ।

तुम्बुरुनारदश्चैव साक्षादेव सरस्वती ॥ ९२ ॥

जयमङ्गलशब्दानि पठन्ति पटुगीतिभिः ।

हर्षसम्फुल्लवदनाः स्फुरत्पुलकभूषणाः ।

मुहुर्जयजयेत्येवं स्तुवाना ललितेश्वरीम् ॥ ९३ ॥

हर्षेणान्धा मदोन्मत्ताः प्रनृत्यन्तः पदे पदे ।

सप्तर्षयो वसिष्ठाद्या ऋग्यजुस्सामरूपिभिः ॥ ९४ ॥

अथर्वरूपैर्मन्त्रैश्च वधयन्तो जयश्रियम् ।

हविषेव महावह्निशिखामत्यन्तपावनीम् ।

आशिर्वादेन महता वर्धयामासुरुत्तमाः ॥ ९५ ॥

तैः स्तूयमाना ललिता प्रचचाल रथोत्तमे ।

भण्डासुरं विनिर्जेतुमुद्दण्डैः सह सैनिकैः ॥ ९६ ॥

Srichakra, Geya Chakra and Kiri Chakra chariots started moving together, as though the three worlds were on motion. The three looked like Meru, Mandara and Vindhya mountains. There was a tremendous uproar in the Shakti Sena. The earth trembled due to the force with which the three chariots moved. Srichakra chariot has six charioteers who are capable of holding the reins effectively. They are: Ira Devi, Tripura Bhairavi, Samhara Bhairava, Raktayoginivallabha, Saarasa and Chamunda. Geya Chakra chariot has Hasantika Shyamala Devi as the charioteer. Kiri Chakra chariot has Stambhini as the charioteer. The Srichakra chariot has a height of ten Yojanas. Geya Chakra and Kiri Chakra are respectively seven and six yojanas in height. Only Srichakra chariot has a beautiful umbrella of pearls, which has a breadth of ten Yojanas. The other two chariots have ordinary umbrellas only. This umbrella of pearls is the symbol of royalty for the great kingdom of Shaktis. Thus, Sri Lalita Parameshwari, the supreme queen of all the Shaktis, proceeded to the battlefield to destroy the army of Bhandasura. The celestials

were playing drums and showering flowers on Sridevi. Vishwavasu and the other celestial singers along with Tumburu, Narada and Saraswati were singing auspicious songs in praise of Sridevi, wishing her victory. With mantras from the four Vedas and words of benediction, Rishis like Vasishta and others were continuously increasing the power of Sridevi, just as the great sacrificial fire is made more radiant by offering Havis. Riding the great Srichakra chariot, Sridevi proceeded to win over the army of Bhandasura.

॥ श्री ब्रह्माण्डपुराणे उत्तरखण्डे हयग्रीवागस्त्यसम्वादे श्री ललितोपाख्याने पञ्चदशः ॥

॥ बालार्कमण्डलाभासां चतुर्बाहुं त्रिलोचनाम् ।
पाशाङ्कुशधनुर्बाणान् धारयन्तीं शिवां भजे ॥ ॐ ऐं ह्रीं श्रीं साङ्गायै सायुधायै सवाहनायै सपरिवारायै सर्वदेवतास्वरूपिण्यै श्रीललितामहात्रिपुरसुन्दर्यै परब्रह्मणे नमः ॥

॥ अथ षोडशोऽध्यायः ॥

ध्यानम्

नाना दिव्यसुविग्रहाः करलसन्नानायुधाश्शक्तयः
स्वानन्दाः किरिचक्रपर्वनिलयाः श्रीदण्डनाथाम्बिकाम् ।
सेवन्ते वरभैरवाश्शुभतरा दिग्देवपालाभिधाः
यस्याज्ञावशगाः शिवामिह भजे तां सुन्दरेशप्रियाम् ॥

[ भण्डासुरस्य शून्यनगरे उतपाताविर्भावः - भण्डासुरादि दानवकृत मन्त्रालोचनाप्रकारः ]

ॐ ऐं ह्रीं श्रीं

आकर्ण्य ललितादेव्या यात्रानिःसाणनिस्वनम् ।
महान्तं क्षोभमायाता भण्डासुरपुरालयाः ॥ १ ॥
यत्तत्रासीद्दुराशस्य भण्डदैत्यस्य दुर्धियः ।
महेन्द्रपर्वतोपान्ते महार्णवतटे पुरम् ॥ २ ॥
तत्तु शून्यकनाम्नैव विख्यातं भुवनत्रये ।
विषङ्गाग्रजदैत्यस्य सदावासः किलाभवत् ॥ ३ ॥
तस्मिन्नेव पुरे तस्य शतयोजनविस्तरे ।
वित्रेसुरसुराः सर्वे श्रीदेव्यागमसम्भ्रमात् ॥ ४ ॥
शतयोजनविस्तीर्णं तत्सर्वं पुरमासुरम् ।
धूमैरिवावृतमभूदुत्पातजनितैर्मुहुः ॥ ५ ॥
अकाण्ड इव निर्भिण्णा भित्तयो दैत्यपत्तने ।
घूर्णमानाः पतन्ति स्म महोल्का गगनस्थलात् ॥ ६ ॥
उत्पातानां प्राथमिको भूकम्पः पर्यवर्तत ।
मही जज्वाल सकला तत्र शून्यकपत्तने ॥ ७ ॥
अकाण्ड इव हृत्कम्पं भेजुर्दैत्यपुरौकसः ।
ध्वजाग्रवर्तिनः काका गृध्राश्चैव वलाः खगाः ।
आदित्यमण्डलं दृष्ट्वा दृष्ट्वा चक्रन्दुरुच्चकैः ॥ ८ ॥
क्रव्यादा बहवस्तत्र लोचनैर्नावलोकिताः ।

मुहुराकाशवाणीभिः परुषाभिर्बभाषिरे ॥ ९ ॥

सर्वतो दिक्षु दृश्यन्ते केतवस्तु मलीमसाः ।

धूमायमानाः प्रक्षोभजनका दैत्यरक्षसाम् ॥ १० ॥

दैत्यस्त्रीणां च विभ्रष्टा अकाण्डाद्भूषणस्रजः ।

हाहेति दूरं क्रन्दन्त्यः पर्यश्रु समरोदिषुः ॥ ११ ॥

दर्पणानां वर्मणां च ध्वजानां खड्गसम्पदाम् ।

मणीनामम्बराणां च मालिन्यमभवन्मुहुः ॥ १२ ॥

सौधेषु चन्द्रशालासु केलीवेश्मसु सर्वशः ।

अट्टालकेषु गोष्ठीषु विपणीषु सभासु च ॥ १३ ॥

चतुष्किकास्वलिन्देषु प्रक्रीडेषु बलेषु च ।

सर्वतोभद्रवासेषु विन्ध्यावर्तादिवेश्मसु ॥ १४ ॥

विच्छन्दकेषु शुद्धान्तेष्ववरोधनपालिषु ।

स्वस्तिकेषु च सर्वेषु गर्भागारपुटेषु च ॥ १५ ॥

गोपुरेषु कवाटेषु वलभीनां च सीमसु ।

वातायनेषु कक्ष्यासु धिष्ण्येषु च खलूरिषु ॥ १६ ॥

सर्वत्र दैत्यनगरावासिभिर्जनमण्डलैः ।

अश्रूयन्त महाघोषाः परुषा भूतभाषिताः ॥ १७ ॥

शिथिली सर्वतो जाता घोरवर्णा भयानकाः ।

करटैः कटुकालापैरवलोक्य दिवाकरम् ॥ १८ ॥

समराटकरोटीनां कोटयश्चापतन् भुवि ।

अपतन् वेदिमध्येषु बिन्दवः शोणिताम्भसाम् ।

केशोण्डूकाश्च निष्पेतुः सर्वतो धूमधूमलाः ॥ १९ ॥

भौमान्तरिक्षदिव्यानामुत्पातानामिति व्रजम् ।

अवलोक्य भृशं त्रस्ताः सर्वे नगरवासिनः ।

निवेदयामासुरमी भण्डाय प्रथितौजसे ॥ २० ॥

स च भण्डः प्रचण्डोष्मा तैरुत्पातकदम्बकैः ।

असञ्जातधृतिभ्रम्शो मन्त्रस्थानमुपागमत् ॥ २१ ॥

मेरोरिव वपुर्भेदं बहुरत्नविचित्रितम् ।

अध्यासामास दैत्येन्द्रः सिम्हासनमनुत्तमम् ॥ २२ ॥

The great uproar of the Shakti Sena caused agitation in the minds of the residents of 'Shoonyaka', the capital of Bhandasura. It is located at the base of Mahendra Mountain and on the banks of the great ocean. It has a dimension of about a hundred Yojanas. The demons in the city were scared stiff by the pompous arrival of Sridevi. While Lalita Devi was proceeding for the war, many bad omens were observed in Bhanda's 'Shoonyaka' town. The city was filled with smoke and became dark. The walls of houses began to crack. Meteors stared falling from the sky. The land started smoldering everywhere in the city. The people began to feel upset for no apparent reason. Crows, vultures, hawks and owls ascended the flags and began to shriek, looking at the sun. Spirits, invisible to the eye, began to predict inauspicious future for the city and its residents. Spotted comets were seen all over the city, as though indicating the end of days for the demons. The jewelry of the ladies began to unfasten and fall down. They started wailing loudly, shedding profuse tears. Mirrors, armors, flags, swords and other things became lusterless. Multistoried buildings, sports complexes, castles, market places, courtrooms, squares, courtyards, clubs and places of amusements, military housings, private apartments of the royalty, towers, doors, balconies, rooms- everywhere inauspicious words were heard by the people. The ground was filled with bundles of hair that appeared from nowhere. Bundles of smoke-colored hair and drops of blood were seen on Yajna Vedis (special platforms for the performance of Yajna). Observing these bad omens, both in the sky and on the land, the people flocked to their king Bhandasura and reported the same to him.

Bhandasura, not a bit scared of these omens, entered his courtroom and sat on his magnificent throne.

स्फुरन्मुकुटलग्नानां रत्नानां किरणोद्गमैः ।

दीपयन्नखिलाशान्तानद्युतद्दानवेश्वरः ॥ २३ ॥

एकयोजनविस्तारे महत्यास्थानमण्टपे ।

तुङ्गसिम्हासनस्थं तु निषेवाते तदानुजौ ॥ २४ ॥

विशुक्रश्च विषङ्गश्च महाबलपराक्रमौ ।

त्रैलोक्यकण्टकीभूतभुजदण्डभयङ्करौ ॥ २५ ॥

अग्रजस्य सदैवाज्ञामविलंघ्य मुहुर्मुहुः ।

त्रैलोक्यविजये लब्धं वर्धयन्तौ महद्यशः ॥ २६ ॥

नतेन शिरसा तस्य मृद्नन्तौ पादपीठिकाम् ।

कृताञ्जलिप्रणामौ च समुपाविशतां भुवि ॥ २७ ॥

अथाऽस्थानस्थिते तस्मिन्नमरद्वेषिणां वरे ।

सर्वे सामन्तदैत्येन्द्रास्तं द्रष्टुं समुपागताः ॥ २८ ॥

तेषामेकैकसैन्यानां गणना न हि विद्यते ।

स्वस्वनाम समुच्चार्य प्रणेमुः शून्यकेश्वरम् ॥ २९ ॥

स च तानसुरान् सर्वानतिधीरकनीनिकैः ।

सम्भावयन् समालोकैः कियन्तं चित्क्षणं स्थितः ॥ ३० ॥

अवोचत विशुक्रस्तमग्रजं दानवेश्वरम् ।

मथ्यमानमहासिन्धु समानगलनिःस्वनः ॥ ३१ ॥

देव त्वदीयदोर्दण्ड विध्वस्तबलविक्रमाः।
पापिनः पामराचारा दुरात्मानः सुराधमाः॥ ३२॥
शरण्यमन्यतः क्वापि नाऽप्नुवन्तो विषादिनः।
ज्वलज्ज्वालामये वह्नौ पतिता नाशमागताः॥ ३३॥
तस्माद्दैवात्समुत्पन्ना काचित्स्त्री बलगर्विता।
स्वयमेव किलास्राक्षीत्तान् देवान् वासवादिकान्॥ ३४॥
तैः पुनः प्रबलोत्साहैः प्रोत्साहितपराक्रमा।
बहुस्त्रीपरिवारा च विविधायुधमण्डिता॥ ३५॥
अस्मान् जेतुं किलायाति हा कष्टं विधिवैशसम्।
अबलानां समूहश्चेद्बलिनोऽस्मान् विजेष्यते॥ ३६॥
तर्हि पल्लवभङ्गेन पाषाणस्य विदारणम्।
उच्यमानमिदं हन्त परिहासाय कल्पते।
विडम्बना न किमसौ लज्जाकरमिदं न किम्॥ ३७॥
अस्मत्सैनिकनासीरभटेभ्योऽपि भवेद्भियः॥ ३८॥
कान्दिशीकत्वमापन्नाः शक्राद्यास्त्रिदिवौकसः।
ब्रह्मादयश्च निर्भिण्णविग्रहा मद्बलायुधैः॥ ३९॥
विष्णोश्च का कथा वास्ति वित्रस्तः स महेश्वरः।
अन्येषामिह का वार्ता दिक्पाः सर्वे पलायिताः॥ ४०॥
अस्माकमिषुभिस्तीक्ष्णैरदृश्यैरङ्गपातिभिः।

सर्वत्र विद्धवर्माणो दुर्मना विबुधाः कृताः ॥ ४१ ॥

तादृशानामपि महापराक्रमभुजोष्मणाम् ।

अस्माकं विजयायाऽद्य स्त्री काचिदभिधावति ॥ ४२ ॥

यद्यपि स्त्री तदाप्येषा नावमान्या कदाचन ।

अल्पोऽपि रिपुरात्मज्ञैर्नावमान्यो जिगीषुभिः ॥ ४३ ॥

तस्मात्तदुत्सारणार्थं प्रेषणीयास्तु किङ्कराः ।

सकचग्राहमाकृष्य साऽऽनेतव्या मदोद्धता ॥ ४४ ॥

देव तवदीयशुद्धान्तवर्तिनीनां मृगीदृशाम् ।

चिरेण चेटिकाभावं सा दुष्टा सम्श्रयिष्यति ॥ ४५ ॥

एकैकस्माद्भटादस्मात्सैन्येषु परिपन्थिनः ।

शङ्कते खलु वित्रस्तं त्रैलोक्यं सचराचरम् ॥ ४६ ॥

अत्र देवस्य चित्तं तु प्रमाणमिति दानवः ।

निवेद्य भण्डदैत्याय क्रोधं तस्य व्यवीवृधत् ॥ ४७ ॥

विषङ्गस्तु महासत्त्वो विचारज्ञो विचक्षणः ।

इदमाह महादैत्यमग्रजन्मानमुद्धतम् ॥ ४८ ॥

देव त्वमेव जानासि सर्वकार्यमरिन्दम ।

न तु ते क्वापि वक्तव्यं नीतिवर्त्मनि वर्तने ॥ ४९ ॥

सर्वं विचार्य कर्तव्यं विचारः परमा गतिः ।

अविचारेण चेत्कर्म समूलमवकृन्तति ॥ ५० ॥

परस्य कटके चाराः प्रेषणीयाः प्रयत्नतः ।
तेषां बलाबलं ज्ञेयं जयसम्सिद्धिमिच्छुना ॥ ५१ ॥
चारचक्षुर्दृढप्रज्ञः सदा शङ्कितमानसः ।
अशङ्किताकारवांश्च गुप्तमन्त्रः स्वमन्त्रिषु ॥ ५२ ॥
षडुपायान् प्रयुञ्जानः सर्वत्राभ्यर्हिते पदे ।
विजयं लभते राजा जाल्मो मंक्षु विनश्यति ॥ ५३ ॥
अविमृश्यैव यः कश्चिदारम्भः स विनाशकः ।
विमृश्य तु कृतं कर्म विशेषाज्जयदायकम् ॥ ५४ ॥
तिर्यगित्यपि नारीति क्षुद्र इत्यपि राजभिः ।
कार्या वैरिणि नावज्ञा शक्तेः सर्वत्र सम्भवात् ॥ ५५ ॥
स्तम्भोत्पन्नेन केनापि नरतिर्यग्वपुर्धृता ।
भूतेन सर्वभूतानां हिरण्यः कण्टको हतः ॥ ५६ ॥
पुरा हि चण्डिका नाम नारी मायाविजृम्भिणी ।
निशुम्भशुम्भौ महिषं व्यापादितवती रणे ॥ ५७ ॥
तत्प्रसङ्गेन बहवस्तया दैत्या विनाशिताः ।
अतो वदामि नावज्ञा स्त्रीमात्रे क्रियतां क्वचित् ॥ ५८ ॥
शक्तिरेव हि सर्वत्र कारणं विजयश्रियः ।
शक्तेराधारतां प्राप्तैस्त्रीपुल्लिङ्गैर्न नो भयम् ॥ ५९ ॥
शक्तीश्च सर्वतो भाति सम्सारस्य स्वभावतः ।

तर्हि तस्या दुराशायाः प्रवृत्तिर्ज्ञायतां त्वया ॥ ६० ॥

केयं कस्मात्समुत्पन्ना किमाचारा किमाश्रया ।

किम्बला किम्सहाया वा देव तत्प्रविचार्यताम् ॥ ६१ ॥

Seated on the magnificent throne, Bhandasura was being served by his brothers Vishukra and Vishanga, who were very powerful and evil-minded. They never acted against his orders. They were always trying to increase the fame that Bhandasura had obtained by conquering the three worlds. They bowed down to Bhandasura by placing their heads on his footstool and sat down on the floor near his feet. Meanwhile, all subordinates of Bhandasura arrived to see him. Each of these subordinate kings had immense armies. They mentioned their own names before Bhandasura and bowed down to him. Bhandasura greeted them appropriately and remained quiet for a while, staring at them. Then Vishukra began to speak in a deep voice, addressing his brother Bhandasura, "Lord! You, by your might, have defeated the Devas, who are nothing but a bunch of sinful and ignorant fools. Unable to find refuge anywhere, they jumped into fire and burnt themselves out of despair. From the same fire-pit arose a lady, who revived and rejuvenated Indra and the other celestials. Encouraged by Indra and the other Devas, she is coming for a war with us, equipped with various weapons and followed by an army of women. It will be the surprising play of fate if that docile lady is able to defeat us. It is like trying to cut hard stones using tender leaves. This whole thing looks like a joke. Scared of us, Indra, Vishnu, Brahma and the others have fled without recourse. Now, a woman is here to defeat us. Even if she is an ordinary woman, we should not neglect her. Wise men who desire victory, never underestimate the enemy. Hence my Lord! Send your servants to drive her away. Or let them drag her to your presence, holding her by the hair. She will henceforth become your maid servant". Then Vishanga said thoughtfully, "Master! You are aware of everything. There is nothing I can advice you on matters of administration. Only after careful thought should a person act. Actions undertaken without careful thinking lead to destruction. We should send spies to the enemy's camp. In order to obtain victory, it is necessary to estimate the strengths and weaknesses of the enemy. A king who has spies as his eyes, has a firm mind, who never expresses his doubts in public, who discusses strategies with his ministers and resorts to the timely execution of the six plans (Sama, Dana etc.) will always be victorious. A foolish person who does not follow this scheme will surely attain destruction. A king should never underestimate the enemy even if the enemy is an animal or a docile lady. Long ago, a creature with a half-lion-half-man form emerged from a pillar and killed the powerful demon Hiranyakashipu. A great enchantress, Chandika killed powerful demons like Shumbha, Nishumbha and Mahishasura in battle. She destroyed most of the demons in that battle. Hence, never ignore an enemy simply because she is a woman. Victory can be obtained only by power. Be it a man or a woman, a powerful enemy is always a threat. So, we must get more information about her. We have to know who she is, who is supporting or protecting her, what she wants and her strength".

इत्युक्तः स विषङ्गेण नीतमार्गविदाऽमुना ।
अवज्ञाभ्रुकुटीं चक्रे स्त्रीति हेलापरायणः ॥ ६२ ॥
अरे नीतिविचारोऽयं समसत्वेषु शत्रुषु ।
युज्यते वनितायां तु को विचारो महौजसाम् ॥ ६३ ॥
अस्मद्बले महासत्वा अक्षौहिण्याधिपाः शतम् ।
पातुं समस्तजलधीनलं दग्धुं त्रिविष्टपम् ॥ ६४ ॥
अरे पापसमाचार किं वृथा शङ्कसे स्त्रियम् ।
तत्सर्वं हि मया पूर्वं चारद्वारा विलोकितम् ॥ ६५ ॥
अग्नेः समुत्थिता काचिल्ललितानामधारिणी ।
यथार्थनामवत्येषा पुष्पवत्पेशलाकृतिः ॥ ६६ ॥
न सत्त्वं न च वा वीर्यं न सङ्ग्रामेषु वा गतिः ।
अश्रावि चारनिवहात्किन्तु मायापरायणा ॥ ६७ ॥
तत्सत्त्वेनाविद्यमानं स्त्रीकदम्बकमात्मनः ।
उत्पादितवती किञ्चित्तेन चैवं विचेष्टते ॥ ६८ ॥
अथवा भवदुक्तेन न्यायेनास्तु महद्बलम् ।
त्रैलोक्योल्लंघिमहिमा भण्डः केन विजीयते ॥ ६९ ॥
इदानीमपि मद्बाहुबलसम्मर्दमूर्छिताः ।
श्वसितुं शापि पटवो न कदाचन नाकिनः ॥ ७० ॥
केचित्पातालगर्भेषु केचिदम्बुधिवारिषु ।

केचिद्दिगन्तकोणेषु केचित्कुञ्जेषु भूभृताम् ॥ ७१ ॥

विलीना भृशवित्रस्तास्त्यक्तदारसुतश्रियः ।

भ्रष्टाधिकारा बहवश्छन्नवेषाश्चरन्ति ते ॥ ७२ ॥

एतादृशं न जानाति मम बाहुपराक्रमम् ।

अबला न चिरोत्पन्ना तेनैषा दर्पमश्नुते ॥ ७३ ॥

न जानन्ति स्त्रियो मूढा वृथा कल्पितसाहसाः ।

विनाशमनुधावन्ति कार्याकार्यविमोहिताः ॥ ७४ ॥

अथवा तां पुरस्कृत्य यद्यागच्छन्ति नाकिनः ।

यक्षा महोरगाः सिद्धा साध्या वा युद्धदुर्मदाः ॥ ७५ ॥

ब्रह्मा वा पद्मनाभो वा रुद्रो वाऽथ सुराधिपः ।

अन्ये वा हरितां नाथास्तेषां पेष्टुमहं पटुः ॥ ७६ ॥

अथवा मम सेनासु सेनान्यो रणदुर्मदाः ।

पक्वकर्करिकापेषमिव पेक्ष्यन्ति वैरिणः ॥ ७७ ॥

कुटिलाक्षः कुरण्डश्च करुङ्कः काकवाशितः ।

वज्रदन्तो वज्रमुखो वज्रलोमा बलाहकः ॥ ७८ ॥

सूचीमुखः फालमुखो विकर्णो विकटाननः ।

करालाक्षः करटको दमनो दीर्घजीवकः ॥ ७९ ॥

हुम्बेको हुलुमुल्लश्च कल्कसः कल्किवाहनः ।

पुल्कसः पुण्ड्रकेतुश्च चण्डबाहुश्च कुक्कुरः ॥ ८० ॥

जम्बूकाक्षो जम्भनश्च तीक्ष्णशृङ्गस्त्रिकण्टकः ।

चन्द्रगुप्तश्चतुर्बाहुश्चकोराक्षश्चतुश्शिराः ॥ ८१ ॥

वज्रघोषश्चोर्ध्वकेशो महामायो महाहनुः ।

मखशत्रुर्मखास्कन्धी सिम्हघोषः सिरालकः ॥ ८२ ॥

अन्धकः सिन्धुनेत्रश्च कूपकः कूपलोचनः ।

गुहाक्षो गण्डगल्लश्च चण्डवर्मा यमान्तकः ॥ ८३ ॥

लट्टणः पण्डसेनश्च पुरुजित्पूर्वमारकः ।

स्वर्गशत्रुः स्वर्गबलो दुर्गाख्यः स्वर्गकण्टकः ॥ ८४ ॥

अतिमायो बृहन्माय उपमाय उलूकजित् ।

पुरुषेणो विशेणश्च कुन्तिषेणः कुरूषकः ॥ ८५ ॥

मलदश्च करूशश्च मङ्गलो द्रुघणस्तथा ।

कोल्लाटः कुटिलाक्षश्च दाशेरो बभ्रुवाहनः ॥ ८६ ॥

दुष्टहासो धृष्टकेतुः परिक्षितपापकञ्चुकः ।

महामोहो महादंष्ट्रो दुर्मतिः स्वर्गमेजयः ॥ ८७ ॥

शठकेतुः शठवसुः शठदन्तः शठप्रियः ।

दुःशठो दुर्विनीतश्च भिन्नकर्णश्चमूरुहः ॥ ८८ ॥

अट्टहासी महाहासी सिम्हहासी मदोत्कटः ।

कुम्भोत्कुचः कुम्भनासः कुम्भग्रीवः कुटोदरः ॥ ८९ ॥

हस्तिमेढ्रो महाण्डश्च कुम्भाण्डः पूतिनासिकः ।

पूतिदन्तः पूतिचक्षुः पत्यास्यः पूतिमेहनः ॥ ९० ॥

इत्येवमादयः शूरा हिरण्यकशिपोः समाः ॥ ९१ ॥

हिरण्याक्षसमाश्चैव मम पुत्रा महाबलाः ।

एकैकस्य सुतास्तेषु जाताः शूराः शतं शतम् ॥ ९२ ॥

सेनान्यश्च मदोद्वृत्ता मम पुत्रैरनुद्रुताः ।

नाशयिष्यन्ति समरे दुर्वृत्तानमराधमान् ॥ ९३ ॥

एते चेत्कुपिता युद्धे सहस्राक्षौहिणीश्वराः ।

भस्मशेषि भवेद्युद्धं हा हन्त किमुताबला ॥ ९४ ॥

मायाविलासः सर्वोऽपि तस्याः समरसीमनि ।

महामायाविनामस्मद्दलानामामिषं भवेत् ॥ ९५ ॥

तद्वृथा शङ्कया खिन्नं मा ते भवतु मानसम् ॥ ९६ ॥

इत्युक्त्वा भण्डदैत्येन्द्रः समुत्थाय नृपासनात् ।

उवाच निजसेनान्यं कुटिलाक्षं महाबलम् ॥ ९७ ॥

उत्तिष्ठ रे बलं सर्वं सन्नाहय समन्ततः ।

शून्यकस्य समन्ताच्च द्वारेषु बलमर्पय ॥ ९८ ॥

दुर्गाणि संगृहाण त्वं कुरु क्षेपणिकाशतम् ।

दुष्टाभिचाराः कर्तव्या मन्त्रिभिश्च पुरोहितैः ।

सज्जीकुरु च शत्राणि युद्धमेतदुपस्थितम् ॥ ९९ ॥

सेनापतिषु यं कञ्चिदग्रे प्रस्थापयाधुना ।

अनेकबलसंघातसहितं घोरदर्शनम् ॥ १०० ॥

तेन संग्रामसमये सन्निपात्य विनिर्जिता ।

केशेष्वाकृष्यतां मूढा देवसत्त्वेन दर्पिता ॥ १०१ ॥

इत्याभाष्य चमूनाथं सहस्रपृतनाधिपम् ।

कुटिलाक्षं महासत्त्वं स्वयं चान्तःपुरं गतः ॥ १०२ ॥

आपतन्त्या महादेव्या यात्रानिःसाणनिस्वनः ।

अश्रूयत च दैत्येन्द्रैरतिकर्णज्वरावहः ॥ १०३ ॥

Hearing Vishanga's words, Bhandasura made fun of Sridevi as being just a helpless woman and shuddered his counsel with a sarcastic grin. He said, “All the rules that you explained hold good only if the battle is between two equals. Why all this useless thinking when the enemy is just a hapless woman? We have hundreds of powerful commanders, who head several Akshauhinis of armies. They are capable of burning the heaven and emptying the waters of the seven great oceans. O sinful fool! Are you scared of that meek woman? I have already gathered information about her from my spies. Her name is 'Lalita' and she has emerged from the sacrificial fire. Befitting her name, she has a flower-like tender body. She has no strength or valor. She knows nothing about the art of warfare. However, she is said to be an expert in creating illusions. She created an army of women and this makes her feel powerful unnecessarily. Even if I agree that she has a mighty army, what harm could she possibly cause to Bhandasura, whose fame and prowess have transgressed the three worlds? Struck by me, the celestials who fainted, are still incapable of even taking a breath. Having lost their powers, authority, prosperity, kingdom and wives, they are roaming in disguise. They are hiding in the nether worlds, oceans, mountains and caves. That woman, who took birth just a few days ago, is unaware of my powers. That is the reason she feels strong and proud. Generally women have no common sense. Unable to discriminate between what should be done and what should not be done, they perish due to ignorance. Be it Brahma, Vishnu, Rudra, Indra or any other celestial, I shall destroy anyone who supports or protects her in the battle. The commanders of my army are extremely capable. They crush enemies like ripe berries. They equal Hiranyakashipu in might. All my sons are powerful like Hiranyaksha. Each of my sons has hundred sons. All these, together with my commanders, can surely destroy the wretched Devas. These commanders who head thousands of Akshauhinis will not retire from battlefield until only the ashes of the enemies remain. Then what to speak of a helpless woman? We have nothing to fear. Do not entertain such useless thoughts and spoil your mind”. Having said this, Bhandasura addressed his commander Kuitilaksha thus, “Get up! Organize the army and station it around the city appropriately at all

entrances. Get ready with all the weapons and make arrangements to protect the forts. Get the priests and ministers to perform black magic rites. Send one of our commanders along with a huge army to defeat that lady and drag her to me holding her hair". Having said this, Bhandasura retired to his private apartment. Meanwhile, the great uproar of Sri Lalita's army caused great distress to the commanders of Bhandasura's army.

॥ श्री ब्रह्माण्डपुराणे उत्तरखण्डे हयग्रीवागस्त्यसम्वादे श्री ललितोपाख्याने षोडशः ॥

॥ बालार्कमण्डलाभासां चतुर्बाहुं त्रिलोचनाम् ।
पाशाङ्कुशधनुर्बाणान् धारयन्तीं शिवां भजे ॥ ॐ ऐं ह्रीं श्रीं साङ्गायै सायुधायै सवाहनायै सपरिवारायै सर्वदेवतास्वरूपिण्यै श्रीललितामहात्रिपुरसुन्दर्यै परब्रह्मणे नमः ॥

॥ अथ सप्तदशोऽध्यायः ॥

ध्यानम्

यन्मायापरिमोहितैः परिवृतो भण्डासुरेन्द्रोऽसुरैः
प्राप्ताहङ्कृतिमात्मनाशजननीं वंशैरशेषैः स्वकैः ।
संख्यातीतमहापराक्रमयुतैर्युद्धे कृतोद्योगवान्
तत्त्वां सर्वसुरेश्वरप्रणयिनीं श्रीमीननेत्रां भजे ॥

[ भण्डासुरस्य सेनासन्नाहः - श्रीसम्पत्करीदेव्या श्रीमदश्वारूढया च कृत दुर्मद कुरण्ड दानवयोर्वधः ]

ॐ ऐं ह्रीं श्रीं

श्री हयग्रीव उवाच

अथ श्रीललितासेना निःसाणप्रतिनिस्वनः ।

उच्चचालऽसुरेन्द्राणां उद्धतो दुन्दुभिस्वनः ॥ १ ॥

तेन मर्दितदिक्केन क्षुभ्यद्गर्भपयोधिना ।

बधिरीकृतलोकेन चकम्पे जगतां त्रयी ॥ २ ॥

मर्दयन्ककुभां वृन्दं भिन्दन् भूधरकन्धरान् ।

ववृधे गगनाभोगे दैत्यनिःसाणनिस्वनः ॥ ३ ॥

महानरहरिक्रोधहुङ्कारोद्धतमध्वनिः ।

विरसं विररासोच्चैर्विबुधद्वेषिझल्लरी ॥ ४ ॥

ततः किलकिलारावमुखरा दैत्यकोटयः ।

समहन्यन्त संक्रुद्धाः प्रति तां परमेश्वरीम् ॥ ५ ॥

कश्चिद्रत्नविशेषेण वर्मणा छन्नविग्रहः ।

चकाशे जङ्गम इव प्रोत्तुङ्गो रोहणाचलः ॥ ६ ॥

कालरात्रिमिवोदग्रां शस्त्राकारेण गोपिताम् ।

अधुनीत भटः कश्चिदतिधौ तां कृपाणिकाम् ॥ ७ ॥

उल्लासयन् कराग्रेण कुन्तपल्लवमेकतः ।

आरूढतुरगो वीथ्यां चारिभेदं चकार ह ॥ ८ ॥

केचिदारुरुहुर्योधा मातङ्गान् तुङ्गवर्ष्मणः ।

उत्पातवातसम्पातप्रेरितानिव पर्वतान् ॥ ९ ॥

पट्टसैर्मुद्गरैश्चैव भिदुरैर्भिन्दिपालकैः ।

द्रुघणैश्च मुसुण्डीभिः शणयैर्मुसलैरपि ॥ १० ॥

गदाभिश्च शतघ्नीभिस्त्रिशिखैर्विशिखैस्तथा ।

अर्धचक्रैर्महाचक्रैर्वक्रास्त्रैररुगाननैः ॥ ११ ॥

फणिशीर्षप्रभेदैश्च धनुर्भिः शार्ङ्गधन्विभिः ।

दण्डैः क्षेपणिकाशस्त्रैर्वज्रबाणैर्घरट्टकैः ॥ १२ ॥

यवमध्यैर्मुष्टिमध्यैर्वल्लैः खण्डलैरपि ।

कटारैः कोणमध्यैश्च फणिदन्तैः परश्वधैः ॥ १३ ॥

पाशायुधैः पाशतुण्डैः काकतुण्डैः सहस्रशः ।

एवमादिभिरत्युग्रैः आयुधैर्जीवहारिभिः ।

परिकर्मितहस्ताग्रा वर्मिता दैत्यकोटयः ॥ १४ ॥

अश्वारोहा गजारोहा गर्दभारोहिणः परे ।

उष्ट्रारोहा वृकारोहाः शुनकारोहिणस्तथा ॥ १५ ॥

काकाधिरोहिणो गृध्रारोहाः कङ्काधिरोहिणः ।

व्याघ्राधिरोहाश्च परे तथा सिम्हाधिरोहिणः ॥ १६ ॥

शरभारोहिणश्चान्ये भेरुण्डारोहिणः परे ।

सूकरारोहिणो व्यालारूढाः प्रेताधिरोहिणः ॥ १७ ॥

एवं नानाविधैर्वाहवाहिभिर्ललितां प्रति ।

प्रचेले प्रबलक्रोधसम्मूर्छितनिजाशयैः ॥ १८ ॥

कुटिलाक्षश्च भूभर्ता दुर्मदं नाम दानवम् ।

दशाक्षौहिणिकायुक्तं प्राहिणोल्ललितां प्रति ॥ १९ ॥

दिधक्षुभिरिवाशेषविश्वं सह बलोत्कटैः ।

भटैर्युक्तः स सेनानीर्ललिताभिमुखो ययौ ॥ २० ॥

भिन्दन् पटहसम्रावैश्चतुर्दशजगद्दरीम् ।

अट्टहासं वितन्वानो दुर्मुखस्तन्मनो ययौ ॥ २१ ॥

अथ भण्डासुराज्ञप्तः कुटिलाक्षो महाबलः ।

शून्यकस्य पुरद्वारे प्राचीने समकल्पयत् ।

रक्षणार्थं दशाक्षौहिण्युपेतं तालजङ्घकम् ॥ २२ ॥

अर्वाचीने पुरद्वारे दशाक्षौहिणिसम्युतम् ।

नाम्ना तालभुजं दैत्यं रक्शणार्थमकल्पयत् ॥ २३ ॥

प्रतीचीने पुरद्वारे दशाक्षोहिणिसम्युतम् ।

तालग्रीवं नाम दैत्यं रक्षणार्थमकल्पयत् ॥ २४ ॥

उत्तरे तु पुरद्वारे कालकेतुं महाबलम् ।

आदिदेश सुरक्षार्थं दशाक्षोहिणिसम्युतम् ॥ २५ ॥

पुरस्य सालवलये कटिशीर्षकवेश्मसु ।

मण्डलाकारतो वस्तुं दशाक्षोहिणिमादिशत् ॥ २६ ॥

एवं पञ्चशता कृत्वाऽक्षोहिणीभिस्तु रक्षणम् ।

शून्यकस्य पुरस्यैष तद्वृत्तं स्वमिनेऽवदत् ॥ २७ ॥

कुटिलाक्ष उवाच

देव त्वदाज्ञया दत्तं सैन्यैर्नगररक्षणम् ।

दुर्मदः प्रेषितः पूर्वं तां दुष्टां ललितां प्रति ॥ २८ ॥

अस्मत्किङ्करमात्रेण सुनिरासा हि साऽबला ।

तथापि राज्ञामाचारः कर्तव्यं पुररक्षणम् ॥ २९ ॥

इत्युक्त्वा भण्डदैत्येन्द्रं कुटिलाक्षोऽतिगर्वितः ।

स्वसैन्यं सज्जयामास सेनापतिभिरन्वितः ॥ ३० ॥

यस्तु सम्प्रेषितः पूर्वं कुटिलाक्षेण दानवः ।

स ध्वनन् ध्वजिनीयुक्तो ललितासैन्यमक्षिनोत् ॥ ३१ ॥

कृत्वा किलकिलारावं भटास्तस्य सहस्रशः ।

दोधूयमानैरसिभिर्निपेतुः शक्तिसैनिके ॥ ३२ ॥

ताश्च शक्तय उद्दण्डस्फुरिताट्टहासस्वनाः ।

देदीप्यमानशस्त्राभाः समयुध्यन्त दानवैः ॥ ३३ ॥

शक्तीनां दानवानां च संक्षोभितजगत्रयम् ।

समवर्तत संग्रामो धूलिग्रामं तदाम्बरम् ॥ ३४ ॥

रथवंशेषु मूर्छन्त्यः करिकर्णैः प्रचालिताः ।

अश्वनिःश्वासविक्षिप्ता धूलयः प्रजुघूर्णिरे ॥ ३५ ॥

तमापतन्तमालोक्य दृप्ताक्षोहिणिसम्वृतम् ।

सम्पत्करी त्वतिक्रोधादभिदुद्राव सङ्गरे ॥ ३६ ॥

In response to the uproar of the Shakti Sena, the demons also played war drums loudly. This great sound deafened all the directions and the three worlds started trembling with fright. Making terrible sounds, crores of demons marched to fight with Sri Lalita Parameshwari. One of the demons wore an armor studded with precious gems and looked like the very personification of a mountain. The demons were holding various weapons like Pattasa, Mudgara, Bhidura, Bhindipala, Drughana, Musundi, Kuthaara, Musala, mace, Shataghni, trident, Dwishula, discus, half-moon shaped discus, crooked discus, bows, staffs, arrows, Yavamadhya, Mushtimadhya, Valala, sword, knofe, sickle, axe, Pashatunda, Phanaitunda etc. They rode on animals like horses, elephants, donkeys, camels, wolves, dogs, crows, vultures, hawks, tigers, lions, Sharabha (a mystic animal), Gandabherunda (a mystic bird), boar, python and corpses. Kutilaksha sent a demon named Durmada along with ten Akshauhinis of army to fight with Sridevi. Sounding war drums, Durmada approached Lalita Devi as if he would burn the three worlds. As per Bhandasura's orders, Kutilaksha made arrangements for the protection of the city of Shoonyaka. He stationed a demon named Talajangha at the eastern entrance of the city, Talabhuja at the southern entrance, Talagriva at the western entrance and Talaketu at the northern entrance. An army of Ten Akshauhinis supported each of them. He also positioned ten Akshauhinis of army around the fort in a circular fashion. He thus stationed fifty Akshauhinis of army for the protection of the city and elaborated the details to Bhandasura. Kutilaksha said, “Master, as per your orders I have stationed the army for the protection of the city. I have sent Durmada to fight with that wretched lady Lalita. An ordinary soldier of our army can easily defeat her. However going by the rules of administration, it becomes necessary to arrange for the protection of the city”. Kutilaksha then sent his own army with commanders, to defeat Sridevi. By then, Durmada surrounded the Shakti Sena with his immense army. Thousands of demon-soldiers jumped on the Shaktis with iridescent swords in their hands. However, the great Shaktis made thunderous sounds and began to fight with the demons ferociously. Dust from the battlefield, due to the movements of chariots, horses and elephants covered the skies. Seeing the attack of ten Akshauhinis of army under the leadership of Durmada, Sri Sampatkari Devi jumped into the battlefield.

सम्पत्करीसमानाभिः शक्तिभिः समधिष्ठिता ।

अश्वाश्च दन्तिनो मत्ता व्यमृदन् दानवीं चमूम् ॥ ३७ ॥

अन्योन्यं तुमुले युद्धे जाते किलकिलारवे ।

धूलीषु धूयमानासु ताड्यमानासु भेरिषु ॥ ३८ ॥

इतस्ततः प्रववृधे रक्तसिन्धुर्महीयसी ।

शक्तिभिः पात्यमानानां दानवानां सहस्रशः ॥ ३९ ॥

ध्वजानि लुठितान्यासन् विलूनानि शिलीमुखैः ।

विस्रस्ततत्तच्चिन्हानि समं चक्रकदम्बकैः ॥ ४० ॥

रक्तारुणायां युद्धोर्व्यां पतितैश्छत्रमण्डलैः ।

आलम्भि तुलनां सन्ध्या रक्ताभ्रहिमरोचिषा ॥ ४१ ॥

ज्वालाकलापाः कल्पाग्नेरिव वारि पयोनिधेः ।

दैत्यसैन्यानि निवहाः शक्तीनां पर्यवारयन् ॥ ४२ ॥

शक्तिच्छटोज्वलच्छस्त्रधारानिष्कृतकन्धराः ।

दानवानां रणतले निपेतुर्मुण्डमण्डलाः ॥ ४३ ॥

दष्टोष्ठैर्भ्रुकुटीक्रूरैः क्रोधसंरक्तलोचनैः ।

मुण्डैरखण्डमभवत्सङ्ग्रामधरणीतलम् ॥ ४४ ॥

एवं प्रवृत्ते समरे जगच्चक्रभयङ्करे ।

शक्तयो भृशसंक्रुद्धा दैत्यसेनाममर्दयन् ॥ ४५ ॥

इतस्ततः शक्तिशस्त्रैस्ताडिता मूर्छिता इति ।

विनेदुर्दानवास्तत्र सम्पद्देवीबलाहताः ॥ ४६ ॥

अथ भग्नं समाश्वास्य निजं बलमरिन्दमः ।

उष्ट्रमारुह्य सहसा दुर्मदोऽभ्यद्रवच्चमूम् ॥ ४७ ॥

दीर्घग्रीवः समुन्नम्रः पृष्ठे निष्ठुरतोदनः ।
अधिष्ठितो दुर्मदेन वाहनोष्ट्रश्चचाल ह ॥ ४८ ॥
तमुष्ट्रवाहनं दुष्टमन्वयुः क्रुद्धचेतसः ॥ ४९ ॥
अवाकिरदसौ भल्लैरुल्लसत्फलशालिभिः ।
सम्पत्करीचमूचक्रं वनं वार्भिरिवाम्बुदः ॥ ५० ॥
तस्य दुस्सहसत्वस्य ताडिता बहुभिः शरैः ।
स्तम्भितेवाभवत्सेना सम्पत्कर्या क्षणं रणे ॥ ५१ ॥
अथ क्रोधारुणं चक्षुर्दधाना सम्पदम्बिका ।
रणकोलाहलं नागमारूढा युध्यताऽमुना ॥ ५२ ॥
आलोलकङ्कणक्वाणरमणीयतरः करः ।
तस्याश्चकर्ष कोदण्डमौर्वीमाकर्णमाहवे ॥ ५३ ॥
लघुहस्ततया तस्या नाकृष्टं न च मोक्षणम् ।
ददृशे धनुषश्चक्रात्केवलम् शरधोरणिः ॥ ५४ ॥
अर्कांशु भरसम्पर्कस्फुरत्प्रतिहलत्फलाः ।
शराः सम्पत्करीचापच्युताः समदहन्नरीन् ॥ ५५ ॥
दुर्मदस्य च तस्याश्च सुमहद्युद्धमद्भुतम् ।
अभूदन्योन्यसंघट्टसस्फुलिङ्गशिलीमुखम् ॥ ५६ ॥
प्रथमं प्रसृतैर्बाणैः सम्पद्देवीसुरद्विषोः ।
अन्धकारः समभवत्तिरस्कुर्वन्नहस्करम् ॥ ५७ ॥

तदन्तरे च बाणानामतिसंघट्टयोनयः ।

विस्फुलिङ्गा विदधिरे खद्योतभ्रमचातुरीम् ॥ ५८ ॥

तयाधिरूढः सुश्रेण्या रणकोलाहलः करी ।

पराक्रमं बहुविधं दर्शयामास सङ्गरे ॥ ५९ ॥

करेण कतिचिद्दैत्यान् पादाघातेन काञ्श्चन ।

उदग्रदन्तमुसलाघातैरन्यान्श्च दानवान् ॥ ६० ॥

वालदण्डहतैरन्यान् घीट्कारैरपरान् रिपून् ।

गात्रव्यामर्दनैरन्यान् नखाघातैस्तथापरान् ॥ ६१ ॥

प्रथिमानाभिघातेन काञ्श्चिद्दैत्यान् विमर्दयन् ।

चतुरं चरितं चक्रे सम्पद्देवीमतङ्गजः ॥ ६२ ॥

स दुर्मदः क्रुधा रक्तदृष्टिरेकेन पत्रिणा ।

सम्पत्करीमुकुटगं मणिमेकमपातयत् ॥ ६३ ॥

अथ क्रोधारुणदृशा तया मुक्तैः शिलीमुखैः ।

विक्षितो वक्षसि क्षिप्रं जीवितं दुर्मदो जहौ ॥ ६४ ॥

ततः किलकिलारावं कृत्वा शक्तिचमूवरैः ।

तत्सैनिकचरास्त्वन्ये निहता दानवोत्तमाः ।

हतावशिष्टा दैत्यास्तु शक्तिबाणखिलीकृताः ।

पलायिता रणक्षोण्याः शून्यकं पुरमाश्रयन् ॥ ६६ ॥

Along with Sri Sampatkari Devi, various Shaktis rushed into the battlefield, riding on horses and elephants. The Shaktis started killing the demons on a massive scale and the

battlefield was filled with the blood of the demons. Struck by the sharp arrows of the Shaktis, the flags of the demons fell to the ground. The signs of royalty of the kingdom of demons began to collapse. On the blood-red battleground, the sight of the fallen umbrellas of the demons looked like the scene of moonrise in the evening. The Shakti Sena completely surrounded the demons and began to destroy them. They chopped the heads of the demons with their sharp weapons. The fearful heads of the demons (that were chopped off by the Shaktis) lay scattered everywhere in the battleground. Unable to bear the blows of Sampatkari and her Shaktis, the demons began to scream "O I was hit! I am fainting!" etc. Durmada consoled his men and began to lead them back to the battlefield, riding on a camel. The camel that he was riding had a long neck and it rushed forward very quickly. Rejuvenated by this, the demons, holding weapons that resembled hissing snakes, followed Durmada. Durmada showered weapons on the Shakti Sena. It seemed as though the army of Shaktis was immobilized for a moment by this attack. However, Sampatkari herself decided to fight with Durmada and entered the scene riding on her elephant Ranakolahala. Her hands, decorated with tinkling bangles, began to shoot arrows at Durmada. She was so skillful and fast that neither the act of pulling the string of the bow nor the shooting of arrows was visible to anyone. However, arrows flew from her bow continuously. These arrows began to burn and destroy the demons. Sampatkari and Durmada began to fight one-to-one with each other. The arrows shot by Durmada covered the sun resulting in pitch darkness everywhere. In the battle, Ranakolahala also exhibited great heroism. It destroyed some demons with its trunk, killed some by crushing them under its feet and some with its sharp tuskers. It killed some by slashing them with its whip-like tail. Angry with this, Durmada struck an arrow at Sri Sampatkari Devi and was able to destroy one gem from her crown. Greatly annoyed, Sri Sampatkari Devi shot several arrows at him, which pierced his heart and killed him. The Shakti Sena began to make sounds of rejoice and began to slaughter the remaining demons. Unable to bear the strength of the Shaktis, the remaining demons fled back to their city of Shoonyaka.

श्री हयग्रीव उवाच

तं वृत्तान्तं समाकर्ण्य संक्रुद्धो दानवेश्वरः ।

प्रचण्डेन प्रभावेन दीप्यमान इवात्मनि ॥ ६७ ॥

स शीघ्रस्पर्शमुद्धूय खड्गमुग्रविलोचनः ।

कुटिलाक्षं निकटगं बभाषे पृतनापतिम् ॥ ६८ ॥

कथं सा दुष्टवनिता दुर्मदं बलशालिनम् ।

निपातितवती युद्धे कष्ट एव विधेः क्रमः ॥ ६९ ॥

न सुरेषु स मर्त्येषु नोरगेन्द्रेषु यद्बलम्।
अभूत्प्रतिहतं सोऽपि दुर्मदोऽबलया हतः॥ ७०॥
तां दुष्टवनितां जेतुमाकृष्टुं च कचे हठात्।
सेनापतिं कुरुण्डाख्यं प्रेषयाऽहवदुर्मदम्॥ ७१॥
इति सम्बोधितस्तेन कुटिलक्षो महाबलम्।
कुरुण्डं चण्डदोर्दण्डमाजुहाव प्रभोः पुरः॥ ७२॥
स कुरुण्डः समागत्य प्रणामं स्वामिनेऽदिशत्।
उवाच कुटिलाक्षस्तं गच्छ सज्जय सैनिकम्॥ ७३॥
मायायां चतुरोऽसि त्वं चित्रयुद्धविशारदः।
कूटयुद्धे च निपुणस्तां स्त्रियं परिमर्दय॥ ७४॥
इति स्वामिपुरस्थेन कुटिलाक्षेण देशितः।
निर्जगाम पुरात्तूर्णं कुरुण्डश्चण्डविक्रमः॥ ७५॥
विंशत्यक्षोहिणीभिश्च समन्तात्परिवारितः।
मर्दयन् स महीगोलं हस्तिवाजिपदातिभिः।
दुर्मदस्याग्रजश्चण्डः कुरुण्डः समरं ययौ॥ ७६॥
धूलिभिस्तुमुलीकुर्वन् दिगन्तं धीरमानसः।
शोकरोषग्रहग्रस्तो जवनाश्वगतो ययौ॥ ७७॥
शार्ङ्गं धनुः समादाय घोरटङ्कारनिस्वनम्।
ववर्ष शरधाराभिः सम्पत्कर्यां महाचमूम्॥ ७८॥

पापे मदनुजं हत्वा दुर्मदं युद्धदुर्मदम् ।
वृथा वहसि विक्रान्तिलवलेशान्महामदम् ॥ ७९ ॥
इदानीमेव भवतीमेभिर्नाराचमण्डलैः ।
अन्तकस्य पुरीमद्य प्रापयिष्यामि पश्य माम् ॥ ८० ॥
अतिहृद्यमतिस्वादु त्वद्वपुर्वल्लिनिर्गतम् ।
अपूर्वमङ्गनारक्तं पिबन्तु रणपूतनाः ॥ ८१ ॥
ममानुजवधोत्थस्य प्रत्यवायस्य दुष्फलम् ।
अधुना भोक्ष्यसे दुष्टे पश्य मे भुजयोर्बलम् ॥ ८२ ॥
इति सन्तर्जयन् सम्पत्करीं करिवरस्थिताम् ।
सैन्यं प्रोत्साहयामास शक्तिसेनाविमर्दने ॥ ८३ ॥
अथ तां पृतनां चण्डीं कुरुण्डस्य महौजसः ।
विमर्दयितुमुद्युक्ता स्वसैन्यं प्रोदसीसहत् ॥ ८४ ॥
अपूर्वाहवसञ्जातकौतुकाथ जगाद ताम् ।
अश्वारूढा समागत्य स्नेहेनार्द्रमिदं वचः ॥ ८५ ॥
सखि सम्पत्करि प्रीत्या मम वाणी निशाम्यताम् ।
अस्य युद्धमिदं देहि मम कर्तुं गुणोत्तरे ॥ ८६ ॥
क्षणं सहस्व समरे मयैवैष नियोत्स्यते ।
याचितासि सखित्वेन नात्र संशयमाचर ॥ ८७ ॥
इति तस्याः वचः श्रुत्वा सम्पद्देवी कृतस्मिता ।

निवर्तयामास चमूं कुरुण्डाभिमुखोत्थिताम् ॥ ८८ ॥

अथ बालार्कवर्णाभिः शक्तिभिः समधिष्ठिताः ।

तरङ्गा इव सैन्याब्धेस्तुरङ्गा वातरम्हसः ॥ ८९ ॥

खरैः खुरपुटैः क्षोणीमुल्लिखन्तो मुहुर्मुहुः ।

पेतुरेकप्रवाहेण कुरुण्डस्य चमूमुखे ॥ ९० ॥

वल्गाविभागकृत्येषु सम्वर्तननिवर्तने ।

गतिभेदेषु चारीषु पञ्चधारासु पातने ॥ ९१ ॥

प्रोत्साहने च संज्ञाभिः करपादाग्रयोनिभिः ।

चतुराभिस्तुरङ्गस्य हृदयज्ञाभिराहवे ॥ ९२ ॥

अश्वारूढाम्बिकासैन्यशक्तिभिः सह दानवाः ।

प्रोत्साहिता कुरुण्डेन समयुद्यन्त दुर्मदाः ॥ ९३ ॥

एवं प्रवृत्ते समरे शक्तीनां च सुरद्विषाम् ।

अपराजितनामानं हयमारुह्य वेगिनम् ।

अभ्यद्रवद्दुराचारमश्वारूढा कुरुण्डकम् ॥ ९४ ॥

प्रचलद्वेणिसुभगा चलच्चन्द्रकलोज्ज्वला ।

सन्ध्यानुरक्तशीतांशुमण्डली सुन्दरानना ॥ ९५ ॥

स्मयमानेव समरे गृहीतमणिकार्मुका ।

अवाकिरच्छरासारैः कुरुण्डं तुरगासना ॥ ९६ ॥

तुरगारूढया क्षिप्ताः समाक्रान्तदिगन्तराः ।

दिशो दश व्यानशिरे रुक्मपुंखाः शिलीमुखाः ॥ ९७ ॥

दुर्मदस्याग्रजः क्रुद्धः कुरुण्डश्चण्डविक्रमः ।

विशिखैः शार्ङ्गनिष्ठ्योतैरश्वारूढामवाकिरत् ॥ ९८ ॥

चण्डैः खुरपुटैः सैन्यं खण्डयन्नतिवेगतः ।

अश्वारूढातुरङ्गोऽपि मर्दयामास दानवान् ॥ ९९ ॥

तस्य हेषारवाद्दूरमुत्पाताम्बुदनिस्वनाः ।

अमूर्छयन्ननेकानि तस्यानीकानि वैरिणः ॥ १०० ॥

इतस्ततः प्रचलिता दैत्यचक्रे हयासना ।

निजं पाशायुधं दिव्यं मुमोच ज्वलिताकृतिम् ॥ १०१ ॥

तस्मात्पाशात्कोटिशोऽन्ये पाशा भुजगभीषणाः ।

समस्तमपि तत्सैन्यं बध्वा बध्वा व्यमूर्छयन् ॥ १०२ ॥

अथ सैनिकबन्धेन क्रुद्धः स च कुरुण्डकः ।

शरेणैकेन चिच्छेद तस्या मणिधनुर्गुणम् ॥ १०३ ॥

छिन्नमौर्वि धनुस्त्यक्त्वा भृशं क्रुद्धा हयासना ।

अङ्कुशं पातयामास तस्य वक्षसि दुर्मतेः ॥ १०४ ॥

तेनाङ्कुशेन ज्वलिता पीतजीवितशोणितः ।

कुरुण्डो न्यपतद्भूमौ वज्ररुग्ण इव द्रुमः ॥ १०५ ॥

तदङ्कुशविनिष्ठ्यूताः पूतनाः काश्चिदुद्भटाः ।

तत्सैन्यं पाशनिष्पन्दं भक्षयित्वा क्षयं गताः ॥ १०६ ॥

इत्थं कुरुण्डे निहते विंशत्यक्षोहिणीपतौ ।

हतावशिष्टास्तद्भृत्याः प्रपलायिषत द्रुतम् ॥ १०७ ॥

कुरुण्डं सानुजं युद्धे शक्तिसैन्यनिपातितम् ।

श्रुत्वा शून्यकनाथोऽपि निशश्वास भुजङ्गवत् ॥ १०८ ॥

Hearing the news of Durmada's death, Bhandasura was extremely angry. He immediately drew out his sword named 'Shighasparsha' and told his commander Kutilaksha, “What! Did that wicked lady kill Durmada in the battle? Oh! Strange is the play of fate. How is that a helpless woman killed Durmada, who had killed the armies of men, snakes and celestials? To defeat her and drag her to me holding her hair, send our commander Kurunda to the battlefield immediately”. Kurunda immediately appeared before Bhandasura and bowed down in respect. Kutilasha said, “Kurunda! Leave with your army to the battlefield. You are an expert in creating illusions. You are also well versed in magical warfare (Maya Yuddha). You have to defeat and destroy that woman and her army”. Kurunda, the elder brother of Durmada, left for the battlefield with twenty Akshauhinis of army. Even though he was grieving the death of his brother, he marched to the battlefield on a horse, with full speed. He started showering arrows on Sri Sampatkari Devi. He addressed her thus, “O sinner! Don't think that you are very powerful simply because you have killed my brother Durmada. Right now I will send you to the city of Yama with my sharp arrows. Let the Putanas (a class of beings like the Dakinis who drink blood and eat flesh of corpses on the battleground) drink the blood from your creeper-like tender body. You shall pay for my brothers murder”. He started encouraging his army to destroy the Shakti Sena. To get rid of him, Sri Sampatkari rushed forward with her army. At that moment, Ashwaaroodhaa Devi came forward with great enthusiasm and spoke these friendly words, “Dear friend! Please listen to me. Please give me the chance to fight with this demon. I have posed this request to you only because you are my dear friend”. Sampatkari acknowledged the request with a smile and moved back with her army. Along with Sri Ashwaaroodhaa Devi, innumerable Shaktis, riding on speedy horses, rushed forward to fight with the demons. The Shaktis were well versed in riding the horses, controlling their speeds and knew the mannerisms of the horses extremely well. As the Shaktis began to fight with the demons, Ashwaaroodhaa Devi started chasing Kurunda on her horse named Aparajita. She had long plaited hair and seemed like the beautiful moon in Sharadritu. It seemed as though she was smiling even in the battlefield. Holding a bow decorated with precious gems, she stared shooting arrows at Kurunda. These arrows covered him in all the directions. Angry with her, Kurunda also stared shooting arrows at Sri Ashwaaroodhaa Devi. Aparajita, the powerful horse, started killing many demons by striking them with its hooves. It made terrible sounds that resulted in the fainting of several segments of Kurunda's army. Sri Ashwaaroodhaa Devi used her Pasha on the army of demons. From her pasha, several fiery Pashas, resembling snakes emerged. They bound the army of demons and made

them unconscious. Kurunda became wild at this and with a single arrow, destroyed the bow of Sri Ashwaaroodhaa Devi. Filled with anger, she used her Ankusha on his heart. That mighty weapon drained all his blood and killed him. He collapsed to the ground like a tree stuck with Indra's Vajra. Many Putanas emerged from the Ankusha and began to swallow the unconscious demons. After their job was done, they vanished. After the death of Kurunda, the leader of twenty Akshauhinis of army, the remaining demons fled back to their city. When this news reached Bhandasura, he sighed like a snake.

॥ श्री ब्रह्माण्डपुराणे उत्तरखण्डे हयग्रीवागस्त्यसम्वादे श्री ललितोपाख्याने

सप्तदशः ॥

॥ बालार्कमण्डलाभासां चतुर्बाहुं त्रिलोचनाम् ।

पाशाङ्कुशधनुर्बाणान् धारयन्तीं शिवां भजे ॥ ॐ ऐं ह्रीं श्रीं साङ्गायै सायुधायै

सवाहनायै सपरिवारायै सर्वदेवतास्वरूपिण्यै श्रीललितामहात्रिपुरसुन्दर्यै परब्रह्मणे

नमः ॥

॥ अथ अष्टादशोऽध्यायः ॥

ध्यानम्

श्रीविद्याद्भुतकामराजमहिषी श्रीशक्तिसैन्येऽद्भुते

युद्धार्थं चलिते महायुधयुते भीतस्स भण्डासुरः ।

प्राप्तोऽभूद्बहुदैत्यकोटिसहितो लोकाश्च भीतिं गताः

त्रातुं तान् दयमानपूर्णहृदयां श्रीमीननेत्रां भजे ॥

[ करङ्कादि पञ्चसेनाधिपतीनां वधः - शताक्षौहिणीसेनानाशश्च ]

ॐ ऐं ह्रीं श्रीं

श्री हयग्रीव उवाच

अथाऽश्वारूढया ध्वस्ते कुरुण्डे भण्डदानवः ।

कुटिलाक्षमिदं प्रोचे पुनरेव युयुत्सया ॥ १ ॥

स्वप्नेऽपि यन्न संभाव्यं यन्न श्रुतमितः पुरा ।

यच्च नो शङ्कितं चित्ते तदेतत्कष्टमागतम् ॥ २ ॥

कुरुण्डदुर्मदौ सत्त्वशालिनौ भ्रातरौ हतौ ।

दुष्टदास्याः प्रभावोऽयं मायाविन्या महत्तरः ॥ ३ ॥

इतः परं करङ्कादीन् पञ्चसेनाधिनायकान् ।

शतमक्षौहिणीनां च प्रस्थापय रणाङ्गणम् ॥ ४ ॥

ते युद्धदुर्मदाः शूराः सङ्ग्रामेशु तनुत्यजः ।

सर्वथैव विजेष्यन्ति दुर्विदग्धविलासिनीम् ॥ ५ ॥

इति भण्डवचः श्रुत्वा भृशं च त्वरयान्वितः ।

कुटिलाक्षः करङ्कादीनाजुहाव चमूपतीन् ॥ ६ ॥

ते स्वामिनं नमस्कृत्य कुटिलाक्षेण दर्शिताः ।

अग्नौ पतिष्णव इव क्रुधान्धा निर्ययुः पुरात् ॥ ७ ॥

तेषां प्रयाणनिस्साणरणितं भृशदुस्सहम् ।

आकर्ण्य दिग्गजास्तूर्णं शीर्णकर्णा विघूर्णिरे ॥ ८ ॥

शतमक्षौहिणीनां च प्रचलत्केतुमालिकम् ।

उत्तरङ्गतुरङ्गालि बभौ मत्तमतङ्गजम् ॥ ९ ॥

हेषमाणहयाकीर्णं क्रंदद्भटकुलोद्भटम् ।

बृंह्यमाणगजं गर्जद्रथचक्रं चचाल तत् ॥ १० ॥

चक्रनेमिहतक्षोणीक्षोदक्षपितरोचिषा ।

बभूवे तुहिनासारच्छन्नेनेव विवस्वता ॥ ११ ॥

धूलीमयमिवाशेषमभवद्विश्वमण्डलम् ।

क्वचिच्छब्दमयं चैव निःसाणकठिनस्वनैः ॥ १२ ॥

उद्धूतैर्धूलिकाजालैराक्रान्ते दैत्यसैनिके ।

इयत्तया न सेनायाः संख्यापि परिभाविता ॥ १३ ॥

ध्वजा बहुविधाकारा मीनव्यालादिचित्रिताः ।

प्रचेलुर्धूलिकाजाले मत्स्या इव महोदधौ ॥ १४ ॥

तानापतत आलोक्य ललितासैनिकं प्रति ।

वित्रेसुरसुराः सर्वे शक्तीनां भङ्गशङ्कया ॥ १५ ॥

ते करङ्कमुखाः पञ्चसेनापतय उद्धताः ।

सर्पिणीं नाम समरे मायां चक्रुर्महीयसीम् ॥ १६ ॥

तैः समुत्पादिता दुष्टा सर्पिणी रणशाम्बरी ।

धूम्रवर्णा च धूम्रोष्ठी धूम्रलम्बपयोधरा ॥ १७ ॥

महोदधिवदत्यन्त गम्भीरकुहरोदरा ।

पुरश्चचाल शक्तीनां त्रासयन्ती मनो रणे ॥ १८ ॥

कद्रूरिव परा दुष्टा बहुसर्पविभूषणा।
सर्पाणामुद्भवस्थानं मायामयशरीरिणाम्॥ १९॥
सेनापतीनां नासीरे कंसयन्ती महीतलम्।
वल्गितं बहुधा चक्रे शिवाघोरविराविणी॥ २०॥
तयैव मायाया पूर्वं ते सुरेन्द्रान् व्यजेष्यत।
करङ्काद्या दुरात्मानः पञ्चपञ्चत्वकामुकाः॥ २१॥
अथ प्रववृधे युद्धं शक्तीनाममरद्विषाम्।
अन्योन्यं वीरभाषाभिः प्रोत्साहितरणक्रुधा॥ २२॥
अत्यन्तसङ्कुलतया न विज्ञातपरस्पराः।
शक्तयो दानवाश्चैव प्रजह्रुः शस्त्रपाणयः॥ २३॥
अन्योन्यशस्त्रसंघट्टसमुत्थितहुताशने।
प्रवृत्तविशिखस्तोमप्रच्छन्नहरिदन्तरे॥ २४॥
बहुरक्तनदीपूर ह्रियमाणहतद्विपे।
मांसकर्दमनिर्मग्न निष्पन्दरथमण्डले॥ २५॥
विकीर्णकेशशैवाल विलसद्रक्तनिर्झरे।
अतिनिष्ठुरवीरोत्थसिंहनादभयङ्करे॥ २६॥
रजोऽन्धकारतुमुले राक्षसीतृप्तिदायिनी।
निस्त्रिंशङ्क विनिर्भिण्णदैत्यकण्ठोत्थितासृजि॥ २७॥
प्रवृत्ते घोरसंग्रामे शक्तीनां च सुरद्विषाम्।

अथ स्वं बलमादाय पञ्चभिः प्रेरिता सती।

सर्पिणी बहुधा सर्पान् विससर्ज शरीरतः॥ २८॥

तक्षककर्कोटकसमा वासुकिप्रतिमत्विषः।

नानाविधवपुर्वर्णा नाना दंष्ट्रा भयङ्कराः॥ २९॥

नानाविधविषज्वाला निर्दग्धभुवनत्रयाः।

दारदं वत्सनाभं च कालकूटमथाऽपरम्॥ ३०॥

सौराष्ट्रजविषं घोरं ब्रह्मपुत्रमथाऽपरम्।

प्रदीपनं शौक्तिकेयमन्यान्यपि विषाणि च ॥ ३१॥

व्यात्तैः स्वकीयवदनैर्विलोलरसनाद्वयैः।

विकिरन्तः शक्तिसैन्ये विसस्रुः सर्पिणीतनोः॥ ३२॥

धूम्रवर्णा द्विवदनाः सर्पा अतिभयङ्कराः।

सर्पिण्या नयनद्वन्द्वादुत्थैताः सर्पकोटयः॥ ३३॥

अग्रे पुच्छे च वदनं धारयन्तः फणान्वितम्।

आस्यादानीलवपुषः सर्पिण्याः फणिनोऽभवन्॥ ३४॥

अन्ये शबलवर्णाभाश्चतुर्वक्त्राश्चतूरदाः।

नासिकाविवरात्तस्या उद्गता उग्ररोचिषः॥ ३५॥

पीतवर्णास्त्रिफणका दंष्ट्राऽतिविकटाननाः।

सर्पिण्याः कर्णकुहरादुत्थिताः क्रोधदीपिताः॥ ३६॥

लम्बमानमहाचर्मादतिस्थूलपयोधरात्।

नाभिकुण्डाश्च बहवो रक्तवर्णा भयानकाः ॥ ३७ ॥

हालाहलं वमन्तश्च प्रोत्थिताः पन्नगाधिपाः ।

विदशन्तः शक्तिसेनां दहन्तो विषवह्निभिः ॥ ३८ ॥

बध्नन्तो भोगपाशैश्च निघ्नन्तः फणमण्डलैः ।

अत्यन्तमाकुलीचक्रुर्ललितेशीचमूममी ॥ ३९ ॥

खण्ड्यमाना अपि मुहुः शक्तीनां शस्त्रकोटिभिः ।

उपर्युपरि वर्धन्ते सर्पाः स्म प्रविसर्पिणः ।

नश्यन्ति बहवः सर्पा जायन्ते चापरे पुनः ॥ ४० ॥

एकस्य नाशसमये बहवोऽन्ये समुत्थिताः ।

मूलभूता यतो दुष्टा सर्पिणी न विनश्यति ।

अतस्तत्कृतसर्पाणां नाशे सर्पान्तरोद्गमः ॥ ४१ ॥

ततश्च शक्तिसैन्यस्य शरीराणि विषानलैः ।

दह्यमानानि दुःखेन विप्लुष्टान्यभवन् रणे ॥ ४२ ॥

किंकर्तव्यविमूढेषु शक्तिचक्रेषु भोगिभिः ।

पराक्रमं बहुविधं चक्रुस्ते पञ्चदानवाः ॥ ४३ ॥

करङ्को गर्दभशतैर्युक्तं स्यन्दनमास्थितः ।

उत्पातवारिद इव प्रववर्ष शरावलीः ॥ ४४ ॥

काकवासितनामाऽन्यः सेनानाथो गजे स्थितः ।

चक्रेण तीक्ष्णधारेण शक्तिसेनाममर्दयत् ॥ ४५ ॥

वज्रदन्ताभिदश्चान्यो भण्डदैत्यचमूपतिः ।

वज्रबाणाभिघातेन महोष्ट्रस्थो रणं व्यधात् ॥ ४६ ॥

अथ वज्रमुखश्चान्यश्चक्रीवन्तं महत्तरम् ।

आरुह्य कुन्तधाराभिः शक्तिचक्रममर्दयत् ॥ ४७ ॥

वज्रलोमाभिदश्चान्यश्चमूनाथो महाबलः ।

गृध्रयुग्यरथारूढः प्रजहार शिलीमुखैः ॥ ४८ ॥

तैः सेनापतिदुर्दुष्टैः प्रोत्साहितमहाहवे ।

शतमक्षौहिणीनां च निपपातैकहेलया ॥ ४९ ॥

सर्पिणी च दुराचारा बहुमायापरिग्रहा ।

क्षणे क्षणे कोटिसंख्यान् विससर्ज फणाधरान् ॥ ५० ॥

तया व्याकुलितं सैन्यमवलोक्य रुषाकुला ।

नकुली गरुडारूढा संपपात रणाजिरे ॥ ५१ ॥

After the death of Kurunda, Bhandasura said, “Kutilaksha! I had never even imagined in dream that I would face such a difficult situation. Both the brothers Durmada and Kurunda are now dead. Both of them were extremely powerful. I now agree that the witch is very powerful. Forget the past. Send our five chief commanders with a hundred Akshauhinis of army. They will give up their lives in battle, but will never return defeated. They will surely defeat that proud woman”. Kutilaksha called the five commanders at once. They immediately bowed down to Bhandasura and left for the battlefield in a fury. Seeing the huge army of the demons, the celestials became concerned. They began to worry if the Shaktis would face defeat at the hands of the demons. Karanka and the other commanders created a great magical serpent called 'Ranashambari'. She had a smoke-colored body and a large belly that resembled a deep ocean. The serpent started walking around in the battlefield causing terror to the Shaktis. It seemed as though she was another 'Kadru' (the mother of snakes and the queen of serpents). She was wearing snakes for ornaments and was making terrible sounds. The demons had previously defeated the Devas using this serpent power. Encouraged by the five commanders, she started creating innumerable snakes from her body. The snakes that

emerged from her body were poisonous like Takshaka and Karkotaka and had a glossy look like Vasuki. They were of various colors and sizes. They began to burn the three worlds with their poisonous flames. From their long, split tongues, they were exuding nine types of deadly poisons (Darada, Vatsanabha, Kalakoota, Saurashtra, Brahmaputra, Pradipana, Shauktikeya and others). Innumerable smoke-colored snakes with two heads started taking birth from her eyes. From her blue face, many snakes with heads on both ends of the body began to emerge. From her nostrils, snakes with four heads and four teeth appeared. From her ears, many white-colored snakes with sharp, ugly teeth appeared. Red colored snakes also emerged from her sagging skin, large breasts and navel. All the snakes were spitting deadly poison at the Shaktis. They were biting the Shaktis and burning them with poisonous flames. They were also binding them and thrashing them. The Shaktis were killing hundreds of snakes continuously. But by the time they killed one snake, countless new snakes would have already taken birth from Ranashambari. Since she was alive, there was no end to the birth of snakes. Greatly tormented by these snakes, the Shakti Sena became directionless. Taking advantage of this situation, Karanka and the other commanders began to show their valor. Karanka was seated on a chariot driven by hundred donkeys. He began to shoot arrows at the Shakti Sena continuously. Kakavasita, riding on a elephant, began to use a discus on the Shaktis. Vajradanta, seated on a huge camel, began to shoot diamond-arrows at the Shakti Sena. Vajramukha, seated in a large chariot, began to hit the Shaktis with a barbed dart. Vajraloma, seated on a chariot driven by two vultures, shot arrows at the Shaktis. As per the orders of the five commanders, the hundred Akshauhini army jumped on the Shaktis, all at once. The serpent sorceress continued creating crores of snakes every second. Seeing the perturbed Shakti Sena, Sri Nakuleswari, mounted on a Garuda, jumped into the battlefield.

प्रतप्तकनकप्रख्या ललिता तालुसम्भवा ।

समस्तवाङ्मयाकारा दन्तैर्वज्रमयैर्युता ।

सर्पिण्यभिमुखं तत्र विससर्ज निजं बलं ॥ ५२ ॥

तयाधिष्ठित तुङ्गांसः पक्षविक्षिप्तभूधरः ।

गरुडः प्राचलद्युद्धे सुमेरुरिव जङ्गमः ॥ ५३ ॥

सर्पिणीमायया जातान्सर्पान्दृष्ट्वा भयानकान् ।

क्रोधरक्तेक्षणं व्यात्तं नकुली विदधे मुखम् ॥ ५४ ॥

अथ श्रीनकुलीदेव्या द्वात्रिंशद्दन्तकोटितः ।

द्वात्रिंशत्कोटयो जाता नकुलाः कनकप्रभाः ॥ ५५ ॥

इतस्ततः खण्डयन्तः सर्पिणीसर्पमण्डलम् ।

निजदंष्ट्रावमर्शेन नाशयन्तश्च तद्विषं ॥ ५६ ॥

व्यभ्रमन् समरे घोरे बभ्रवः स्वर्णबभ्रवः ।

उत्कर्णाः क्रोधसंपर्काद्धृषिताशेषलोमकाः ॥ ५७ ॥

उत्पुच्छा नकुला व्यात्तवदना व्यदशन्नहीन् ।

एकैकमायासर्पस्य बभ्रुरेकैक उद्गतः ॥ ५८ ॥

तीक्ष्णदन्तनिपातेन खण्डयामास विग्रहम् ।

भोगिभोगस्रुतै रक्तैः सृक्वणी शोणतां गते ।

वहन्तो नकुलाजिह्वापल्लवैः पुप्लवुर्मृधे ॥ ५९ ॥

नकुलैर्दश्यमानानामत्यन्तचटुलं वपुः ।

मुहुः कुण्डलितैर्भोगैः पन्नगानां व्यवेष्टत ॥ ६० ॥

नकुलावलिदष्टानां नष्टासूनां फणाभृताम् ।

फणाशतसमुत्कीर्णा मणयो व्यरुचन् रणे ॥ ६१ ॥

नकुलाघातासंकीर्णफणाचक्रविनिर्गताः ।

मणयस्तन्महाकोपवह्निज्वाला इवाबभुः ॥ ६२ ॥

एवं प्रकारतो बभ्रुमण्डलैरवखण्डिते ।

मायामये सर्पजाते सर्पिणी कोपमादधे ॥ ६३ ॥

तया सह महद्युद्धं कृत्वा सा नकुलीश्वरी ।

गारुडास्त्रमतिक्रूरं समधत्त शिल्लिमुखे ॥ ६४ ॥
तद्गारुडास्त्रमुद्दामज्वालादीपितदिङ्मुखम् ।
प्रविश्य सर्पिणीदेहं सर्पमायां व्यशोषयत् ॥ ६५ ॥
मायाशक्तिविनाशेन सर्पिणी विलयं गता ।
क्रोधं च तद्विनाशेन प्राप्ताः पञ्चचमूवराः ॥ ६६ ॥
यद्बलेन सुरान्सर्वान् सेनान्यस्तेऽवमेनिरे ।
सा सर्पिणी कथाशेषं नीता नकुलिवीर्यतः ॥ ६७ ॥
अथ स्वबलनाशेन भृशं क्रुद्धाश्चमूवराः ।
एकोद्योगेन शस्त्रौघैर्नकुलीं तामवाकिरन् ॥ ६८ ॥
एकैव सा तार्क्ष्यरथा पञ्चभिः पृतनेश्वरैः ।
लघुहस्ततया युद्धं चकार शरवर्षिणी ॥ ६९ ॥
पट्टसैर्मुसलैश्चैव भिण्डिपालैः सहस्रशः ।
नकुलान् खण्डयामासुरितश्चेतश्च दानवाः ॥ ७० ॥
ज्वलदग्निप्रकाशास्ते नकुला वैरिणां बलम् ।
वज्रसारमयैर्दन्तैर्व्यदशन् मर्मसीमसु ॥ ७१ ॥
ततो हाहाकृतं घोरं कुर्वाणा दैत्यकिङ्कराः ।
उदग्रदंशन कुलैर्नकुलैराकुलीकृताः ॥ ७२ ॥
उत्प्लुत्य गगनात्केचिद्घोरसीत्कारकारिणः ।
दशन्ति स्म द्विषां सैन्यं नकुलाः प्रज्वलत्कृधा ॥ ७३ ॥

कर्णेषु दष्टा नासायामन्ये दष्टाः क्षयं गताः ।
अपरे विलयं प्राप्ता दष्टा मर्मसु बभ्रुभिः ॥ ७४ ॥
पतन्ति केचिन्नकुला दानवानां शिरस्तटे ।
पृष्ठतो व्यदशन् केचिदागत्य कृतसीत्कृताः ॥ ७५ ॥
विकला विद्धमर्माणो भयवित्रस्तशस्त्रकाः ।
नकुलैरभिभूतास्ते न्यपतन्नमरद्रुहः ॥ ७६ ॥
केचित्प्रविश्य नकुला व्यात्तान्यास्यानि वरिणाम् ।
भोगिभोगानिवाकृष्य प्रादशन् रसनालताः ॥ ७७ ॥
अन्ये कर्णेषु नकुलाः प्राविशन् देववैरिणाम् ।
सूक्ष्मरूपा विशन्त्यन्ये नासारंध्राणि बभ्रवः ॥ ७८ ॥
इति तैरभिभूतानि नकुलैरवलोकयन् ।
निजसैन्यानि दीनानि करङ्कः कोपमास्थितः ॥ ७९ ॥
अन्येऽपि च चमूनाथा लघुहस्ता महाबलाः ।
प्रतिबभ्रु शरस्तोमानवर्षयन् वारिदा इव ॥ ८० ॥
दैत्यसैन्यपतिप्रौढकोदण्डोत्थाः शिलीमुखाः ।
बभ्रूणां दन्तकोटीषु कठोरं घट्टनं व्यधुः ॥ ८१ ॥
चमूपतिशरव्यूहैराहतेभ्यः परः शतम् ।
बभ्रूणां वज्रदन्तेभ्यो निश्चक्राम हुताशनः ॥ ८२ ॥
पञ्चापि ते चमूनाथा विसृष्टैरेकहेलया ।

स्फुरत्फलैः शरकुलैर्बभ्रुसेनाममर्दयन् ॥ ८३ ॥

इतस्ततश्चमूनाथक्षिप्तैश्च शरकोटिभिः ।

विशीर्णगात्रा नकुला नकुलीं पर्यवारयन् ॥ ८४ ॥

अथ सा नकुली वाणी वाङ्ग्मयस्यैकनायिका ।

नकुलानां परावृत्त्या महान्तं कोपमास्थिता ॥ ८५ ॥

अक्षीणनकुलं नाम महास्त्रं सर्वतो मुखम् ।

वह्निज्वालापरीताग्रं सन्दधे शार्ङ्गधन्वनि ॥ ८६ ॥

तदस्त्रतो विनिष्ठ्यूता नकुलाः कोटिसंख्यकाः ।

वज्राङ्गा वज्ररोमाणो वज्रदन्ता महाजवाः ॥ ८२ ॥

वज्रसाराश्च निबिडा वज्रवालभयङ्कराः ।

वज्राकारनखैस्तूर्णं दारयन्तो महीतलम् ॥ ८८ ॥

वज्ररत्नप्रकाशेन लोचनेनोपशोभिताः ।

वज्रसम्पातसदृश नासासीत्कारकारिणः ॥ ८९ ॥

मर्दयन्तः सुरारातिसैन्यं दशनकोटिभिः ।

पराक्रमं बहुविधं तेनिरे ते निरेनसः ॥ ९० ॥

एवं नकुलकोटीभिर्वज्रघोरैर्महानखैः ।

विदष्टाः प्रत्यवयवं विनेशुर्दानवाधमाः ॥ ९१ ॥

एवं वज्रमयैर्बभ्रुमण्डलैः खण्डिते बले ।

शताक्षोहिणिकासंख्ये स्वस्वमात्रावशेषिताः ॥ ९२ ॥

अतित्रासेन रोषेण गृहीताश्च चमूवराः ।

संग्राममधिकं तेनुः सामाकृष्टशरासनाः ॥ ९३ ॥

तैः समं बहुधा युद्धं तन्वाना नकुलीश्वरी ।

उत्प्लुत्य गरुडारूढा निपपात रणाङ्गणे ॥ ९४ ॥

महाजवेन ताक्ष्र्येण गत्वा सा नकुलीश्वरी ।

पट्टसेन करङ्कस्य चिच्छेद कठिनं शिरः ॥ ९५ ॥

काकवासितमुख्यनां चतुर्णामपि वैरिणाम् ।

उत्पत्योत्पत्य ताक्ष्र्येण व्यलुनादसिना शिरः ॥ ९७ ॥

तादृशं लाघवं दृष्ट्वा नकुल्या श्यामलाम्बिका ।

बहुमेने महासत्वां दुष्टासुरविनाशिनीम् ॥ ९७ ॥

निजाङ्गदेवतात्वं च तस्यै श्यामाम्बिका ददौ ।

लोकोत्तरे गुणे दृष्टे कस्य न प्रीतिसम्भवः ॥ ९८ ॥

हतशिष्टा भीतभीताः शून्यकाय पलायिताः ।

तमुदन्तं ततः श्रुत्वा भण्डश्चण्डो रुषाभवत् ॥ ९९ ॥

Sri Nakuleswari, who originated from the palate of Sri Lalita Parameshwari, has a golden complexion. She is the very personification of the entire Vangmaya (speech or knowledge). She has diamond-like strong teeth. She drove her army towards the demons. Her vehicle Garuda had huge shoulders and when he moved, it seemed as though Mount Sumeru was in motion. Seeing the snakes generated by Sarpini, she angrily opened her mouth wide. From her thirty-two teeth, thirty-two crore mongooses took birth. They all had bodies with golden complexion. They stared moving about in the battlefield and began to bite the snakes into pieces. With stiff ears and hair, they quickly navigated through the battlefield and destroyed the snakes. For each of the serpent created by Sarpini, a mongoose took birth. With raised tails, they gobbled up all the snakes. Gems from the hoods of the snakes lay scattered all over the battlefield. Seeing the death of all

her snakes, Sarpini began to fight with Nakuleswari angrily. Sri Nakuleswari shot Sarpini with Garudastra. This blazing weapon entered the serpent's body and dried up all her magical powers. Once she lost her powers, she was destroyed. The five commanders were filled with anger because Nakuleswari had destroyed the magical serpent, who had helped them previously in humiliating the Devas. They began to shower arrows on her. They began to kill the mongooses with weapons like Pattasa, Musala and Bhindipala. Blazing like fire, the mongooses bit the private parts of the demons with their sharp teeth. The demons began to scream loudly with pain. The mongooses bit the ears, noses, genitalia and the rear parts of the demons. Some entered the moths of the demons and bit off their tongues. Some entered their ears. Some assumed subtle forms and entered their nostrils. Seeing this, Karanka began to fight with increased vigor. He began to attack the army of mongooses with sharp arrows. The five commanders shot fiery arrows at the mongooses. With wounded bodies, the mongooses assembled around Sri Nakuleswari. Then Sri Nakuli Saraswati shot a great arrow called 'Akshina Nakula'. From this arrow, crores of mongooses with diamond-like bodies, hair and teeth emerged. They had diamond-like strong tails and nails. With the exception of the five commanders, the mongooses destroyed the entire army of hundred Akshauhinis. Filled with both fear and anger, they fought ferociously with Nakuleswari. She ascended her vehicle Garuda and flying over the demons, chopped off Karanka's head with Pattasa. She also chopped off the heads of the other four commanders with her sword. Seeing the heroism of Nakuleswari, Sri Rajashyamala Devi was extremely pleased. She granted the prestigious status of being her 'Anga Devata' to Sri Nakuleswari. The few remaining demons fled back to Shoonyaka and reported the news of their defeat to Bhandasura.

॥ श्री ब्रह्माण्डपुराणे उत्तरखण्डे हयग्रीवागस्त्यसम्वादे श्री ललितोपाख्याने अष्टादशः ॥

॥ बालार्कमण्डलाभासां चतुर्बाहुं त्रिलोचनाम् ।
पाशाङ्कुशधनुर्बाणान् धारयन्तीं शिवां भजे ॥ ॐ ऐं ह्रीं श्रीं साङ्गायै सायुधायै सवाहनायै सपरिवारायै सर्वदेवतास्वरूपिण्यै श्रीललितामहात्रिपुरसुन्दर्यै परब्रह्मणे नमः ॥

॥ अथ एकोनविंशोऽध्यायः ॥

ध्यानम्

हत्वा भण्डमहासुरस्य महतीमक्षोहिणीनां शतम्

सेनां श्रीनकुलीश्वरी समरगा श्यामाम्बिकायाः प्रिया ।

संप्राप्ता नकुलैश्च कोटिनियुतैः संसेवते सन्ततम्

तत्वां श्रीललिताम्बिकां भगवतीं श्रीसुन्दरेशीं भजे ॥

[ बलाहकादि सप्तसेनानि वधः ]

ॐ ऐं ह्रीं श्रीं

श्री हयग्रीव उवाच

हतेषु तेषु रोषान्धो निःश्वसन् शून्यकेश्वरः ।

कुटिलाक्षमिति प्रोचे युयुत्साव्याकुलाशयः ॥ १ ॥

भद्र सेनापतेऽस्माकमभद्रं समुपागतम् ।

करङ्काद्याश्चमूनाथाः कन्दलद्भुजविक्रमाः ॥ २ ॥

सर्पिणीमायया सर्वगीर्वाणमदभञ्जनाः ।

पापीयस्या तया गूढमायया विनिपातिताः ॥ ३ ॥

बलाहकप्रभृतयः सप्त ये सेनैकाधिपाः ।

तानुदग्रभुजास्सत्त्वान् प्रणिहु प्रथनं प्रति ॥ ४ ॥

त्रिशतं चाक्षोहिणीनां प्रस्थापय सहैव तैः ।

ते मर्दयित्वा ललितासैन्यं मायापरायणाः ।

विजयाग्रेसरा भूयः सम्प्राप्स्यन्ति ममान्तिकम् ॥ ५ ॥

कीकसागर्भसञ्जातास्ते प्रचण्डपराक्रमाः ।
बलाहकमुखाः सप्तभ्रातरो जयिनः सदा ।
तेषामवश्यं विजयो भविष्यति रणाङ्गणे ॥ ६ ॥
इति भण्डासुरेणोक्तः कुटिलाक्शः समाह्वयत् ।
बलाहकमुखान् सप्त सेनापालान् मदोत्कटान् ॥ ७ ॥
बलाहकः प्रथमतः ततः सूचीमुखोऽपरः ।
अन्यः फालमुखश्चैव विकर्णो विकटाननः ।
करालाक्षः करटकः सप्तैते वीर्यशालिनः ॥ ८ ॥
भण्डासुरं नमस्कृत्य युद्धकौतूहलोल्बणाः ।
कीकसासूनवः सर्वे भ्रातरोऽन्योन्यमादृताः ।
अन्योन्यसुसहायाश्च निरगुर्नगरान्तरात् ॥ ९ ॥
त्रिशताक्षोहिणी सेना तानन्वगमगात्तदा ।
उल्लिखन्ती केतुजालैरम्बरे घनमण्डलम् ॥ १० ॥
घोरसंराविणी पादाघातैर्मर्दितमेदिनी ।
पिबन्ती धूलिकाजालैरशेषानपि सागरान् ॥ ११ ॥
भेरीनिःसाणतम्पोट्टपणवानकनिःस्वनैः ।
नभोगुणमयं विश्वमादधाना पदे पदे ॥ १२ ॥
त्रिशताक्षोहिणीसेनां तां गृहीत्वा मदोद्धताः ।
प्रपेष्टुमिव विश्वस्य कैकसेयाः प्रतस्थिरे ॥ १३ ॥

रोषारुणमुखाः सूर्यमण्डलोद्दीप्तकंटकाः ।
उद्दीप्तशस्त्राभरणाश्चेलुर्दीप्तोर्ध्वकेशिनः ॥ १४ ॥
सप्तलोकान् प्रमथितुं प्रेषिताः पूर्वमुत्थिताः ।
भण्डासुरेण महता जगद्विजयकारिणा ॥ १५ ॥
सप्तलोकविमर्देन तेन दृष्टमहाबलाः ।
प्रेषिता ललितासैन्यं जेतुकामेन दुर्धिया ॥ १६ ॥
ते पतन्तो रणतलमुज्ज्वलच्छस्त्रपाणयः ।
शक्तिसेनाभिमुखं सक्रोधमभिदुद्रुवुः ॥ १७ ॥
मुहुः किकिलारावैर्घोषयन्तो दिशो दश ।
देव्यास्तु सैनिकं यत्र तत्र ते जग्मुरुद्धताः ॥ १८ ॥
सैन्यं च ललितादेव्या सन्नद्धं शस्त्रभीषणम् ।
अभ्यमित्रीणमभवद्बद्धभ्रुकुटिनिस्वनम् ॥ १९ ॥
पाशिन्यो मुसलिन्यश्च चक्रिण्यश्चापरा मुने ।
मुद्गरिण्यः पट्टिसिन्यः कोदण्डिन्यस्तथा मुने ॥ २० ॥
अनेकाः शक्तयस्तीव्रा ललितासैन्यसङ्गताः ।
पिबन्त्य इव दैत्याब्धिं सन्निपेतुः सहस्रशः ॥ २१ ॥
आयातायात हे दुष्टाः पापिन्यो वनिताधमाः ।
मायापरिग्रहैर्दूरं मोहयन्त्यो जडाशयान् ॥ २२ ॥
नेष्यामो भवतीरद्य प्रेतनाथनिकेतनम् ।

श्वसद्भुजगसङ्काशैर्बाणैरत्यन्तभीषणैः ।

इति शक्तीर्भर्त्सयन्तो दानवाश्चक्रुराहवम् ॥ २३ ॥

शक्तयश्चापि संक्रुद्धा दानवान् प्रति कुम्भज ।

रोषेण महताविष्टाश्चक्रुर्युद्धं सुदारुणम् ॥ २४ ॥

काचिच्चिच्छेद दैत्येन्द्रं कण्ठे पट्टसपातनात् ।

तद्गलोल्लुठितो रक्तपूर ऊर्ध्वमुखोऽभवत् ॥ २५ ॥

तत्र लग्ना बहुतरा गृध्रा मण्डलतां गताः ।

तेनैव प्रेथनाथस्य छत्रच्छविरुदञ्चिता ॥ २६ ॥

काचिच्छक्तिः सुरारातिं मुक्तशक्त्यायुधं रणे ।

लूनतच्छक्तिनैकेन बाणेन व्यलुनीत च ॥ २७ ॥

एका हस्तिनमारूढा कस्यचिद्दैत्यदुर्मतेः ।

उरः स्थले स्वकरिणो वप्राघातमशिक्षयत् ॥ २८ ॥

काचित्प्रतिभटारूढं दन्तिनं कुम्भसीमनि ।

खड्गेन सहसा लूत्वा स्वकुचस्य प्रियं व्यधात् ॥ २९ ॥

करमुक्तेन चक्रेण कस्यचिद्देववैरिणः ।

धनुर्दण्डं द्विधा कृत्वा स्वभ्रुवोः प्रिरतिमातनोत् ॥ ३० ॥

शक्तिरन्या शरैः शातैः शातयित्वा विरोधिनः ।

कृपाणयष्टिं रोमाल्याः स्वकीयाया मुदं व्यधात् ॥ ३१ ॥

काचिन्मुद्गरपातेन चूर्णयित्वा विरोधिनः ।

रथचक्रं नितम्बस्य स्वस्य तेनातनोन्मुदम् ॥ ३२ ॥
रथकूबरमुग्रेण कस्यचिद्दानवप्रभोः ।
खड्गेन भिन्दती स्वस्य प्रियमूर्वोस्ततान ह ॥ ३३ ॥
अभ्यन्तरं शक्तिसेना दैत्यानां प्रविवेश च ।
प्रविवेश च दैत्यानां सेना शक्तिबलान्तरम् ॥ ३४ ॥
नीरक्षीरवदत्यन्ताश्लेषः शक्तिसुरद्विषाम् ।
सङ्कुलाकारतां प्राप्तो युद्धकाऽलेभवत्तदा ॥ ३५ ॥
शक्तीनां खड्गपातेन लूनशुण्डारदद्वयाः ।
दैत्यानां करिणो मत्ता महक्रोडा इवाभवन् ॥ ३६ ॥
इत्थं प्रववृते समरे वीराणां च भयङ्करे ।
अशक्ये स्मर्तुमप्यन्तः कातरत्ववतां नृणाम् ॥ ३७ ॥
भीषणानां भीषणे च शस्त्रव्यापार दुर्गमे ।
बलाहको महागृध्रं वज्रतीक्ष्ण सकञ्चुकम् ।
कालदण्डोपमं जंघाकाण्डे चण्डपराक्रमम् ॥ ३८ ॥
संहारगुप्तनामानं पूर्वमग्नेः समुत्थितम् ।
धूमवद्धूसराकारं पक्षक्षेपभयङ्करम् ।
आरुह्य विविधं युद्धं कृतवान्युद्धदुर्मदः ॥ ३९ ॥
पक्षौ वितत्य क्रोशार्धसम्मितौ भीमनिस्वनौ ।
अङ्गारकुण्डवत्तुण्डं विदार्याभक्षयच्चमूम् ॥ ४० ॥

संहारगुप्तः सहसा गृध्रः क्रूरविलोचनः।
बलाहकमुवाहोच्चैराकृष्टधनुषं रणे ॥ ४१ ॥
बलाहको धनुर्धून्वन् गृध्रपृष्ठकृतस्थितिः।
सपक्ष शैलकूटस्थो बलाहक इवाबभौ ॥ ४२ ॥
सूचीमुखश्च दैत्येन्द्रः सूचीनिष्ठुरपक्षतिम्।
काकावाहनमारुह्य कठिनं समरं व्यधात्॥ ४३ ॥
मत्तकासरशृङ्गाभं चञ्चूदण्डं समुद्वहन्।
कालदण्डप्रमाणेन जङ्घाकाण्डेन भीषणः॥ ४४ ॥
पुष्कलावर्तकसमौ जम्बालसदृशद्युती।
क्रोशमात्रायितौ पक्षावुभावपि समुद्वहन्॥ ४५ ॥
सूचीमुखाधिष्ठितोऽसौ करटः कटुवाशितः।
ममर्द चञ्चुघातेन शक्तीनां मण्डलं महत्॥ ४६ ॥
अथ फालामुखः फालं गृहीत्वा निजमायुधम्।
कङ्कमारुह्य समरं चकार गिरिसन्निभम्॥ ४७ ॥
विकटाख्यश्च दैत्येन्द्रश्चमूभर्ता महाबलः।
भेरुण्डपतगारूढः प्रचण्डं युद्धमातनोत्॥ ४८ ॥
विकटाननामानं विलसत्पट्टसायुधम्।
उवाह समरे चण्डः कुक्कुटोऽतिभयङ्करः॥ ४९ ॥
गर्जन् कण्ठस्थरोमाणि हर्षयन् ज्वलदीक्षणः।

पश्यन् पुरः शक्तिसैन्यं चचाल चरणायुधः ॥ ५० ॥

करालाक्षश्चमूभर्ता षष्ठोऽत्यन्तगरिष्ठदोः ।

वज्रनिष्ठुरघोषश्च प्राचलत्प्रेतवाहनः ॥ ५१ ॥

तपः श्मशानमन्त्रेण तेन संसाधितः पुरा ।

प्रेतो भूतसमाविष्टस्तमुवाह रणाजिरे ॥ ५२ ॥

अवाङ्ग्मुखो दीर्घबाहुः प्रसारितपदद्वयः ।

प्रेतो वाहनतां प्राप्तः करालाक्षमथावहत् ॥ ५३ ॥

अन्यः करटको नाम दैत्यसेनाशिखामणिः ।

मर्दयामास शक्तीनां सैन्यं वेतालवाहनः ॥ ५४ ॥

योजनायतमूर्तिः स वेतालः क्रूरलोचनः ।

श्मशानभूमौ वेताल मन्त्रेणानेन साधितः ॥ ५५ ॥

After the five commanders were destroyed along with a hundred Akshauhini of army, Bhandasura told his commander Kutilaksha worriedly, “ O Kutilaksha! We have obtained inauspicious results. A sinful, helpless sorceress has killed Karanka and the others, who had defeated the celestials previously. Even the serpent was destroyed. Now send Balahaka and other six powerful commanders to the battlefield. Let three hundred Akshauhinis of army accompany them. These commanders, well versed in witchcraft, shall defeat Lalita's army and return to me. These seven brothers are the sons of a demoness named 'Keekasaa'. They have obtained victory in all battles they have bought till date. They will certainly be victorious this time too”. The seven commanders were: Balahaka, Suchimukha, Phalamukha, Vikarna, Vikatanana, Karalaksha and Karataka. With Bhandasura's permission, they left for the battlefield. An army of three hundred Akshauhinis followed them. Previously Bhandasura had sent them to conquer the seven worlds. They had displayed immense valor in the completion of the designated task. Holding swords, now they approached the Shakti Sena angrily. Sridevi's army, ever ready with weapons, faced the army of demons with great courage. As if prepared to devour the entire army of demons, various Shaktis, sporting different weapons like noose, lance, discus, Mudgara, Pattasa, bow etc., plunged on the demons. The demons began to scream, “O wicked ladies! Sinners! Come to us, we are not fools, who can be defeated

easily with your magic. With our sharp arrows that resemble hissing snakes, we shall send you to the house of the Lord of dead spirits in no time!” In the battle that ensued, a Shakti slit the throat of a demon with Pattasa. Blood gushed from his throat. A number of vultures began to circle above the battlefield, waiting to feast on the corpses. A demon used his Shakti weapon on a Shakti of Sri Lalita. But she used the same weapon against him and killed him with an arrow. Another Shakti, riding on an elephant, killed a demon by crushing him under her elephant's foot. Meanwhile, Balahaka ascended a terrifying vulture named 'Samharagupta'. It had a diamond-like sharp beak and strong legs. It was born of fire. It had smoke-colored wings. Riding on this creature, Balahaka fought ferociously. The vulture, flapping its wings that were about half a Krosha in width, began to slit and feast on the Shaktis. Suchimukha was riding on a crow that had needle-like sharp wings. Its beak resembled the horn of a wild buffalo. It had strong legs that resembled the staff of Yama. It had moss-colored wings that were one Krosha long. With its beak, it began to torment the Shaktis. Phalamukha, holding a weapon named Phalayudha, was riding a vulture. Another commander Vikata, was riding on a bird called 'Bherunda'. Vikatanana, holding a gleaming Pattasa, was riding a terrifying cock. This cock, with stiff hair around its neck, was making horrific noises. Karalaksha, holding a sharp sword, was riding on a corpse. He had obtained the corpse by chanting mantras in the crematorium. An evil spirit inhabited the corpse. Its face was turned backwards and it had long arms and legs. Karataka, another commander of Bhandasura's army, was riding on a Bhetala (vampire). He had gained control over the Bhetala by chanting Bhetala mantra in the crematorium.

मर्दयामास पृतनां शक्तीनां तेन देशितः ।

तस्य वेतालवर्यस्य वर्तमानोम्ससीमनि ।

बहुधाऽयुध्यत तदा शक्तिभिः सह दानवः ॥ ५६ ॥

एवमेते खलात्मानः सप्त सप्तार्णवोपमाः ।

शक्तीनां सैनिकं तत्र व्याकुलीचक्रुरुद्धताः ॥ ५७ ॥

ते सप्तपूर्वं तपसा सवितारमतोषयन् ।

तेन दत्तो वरस्तेषां तपस्तुष्टेन भास्वता ॥ ५८ ॥

कैकसेया महाभागा भवतां तपसाऽधुना ।

परितुष्टोऽस्मि भद्रं वो भवन्तो वृण्वतां वरम् ।

इत्युक्ते दिननाथेन कैकसेयास्तपस्कृतः ।

प्रार्थयामासुरित्यर्थं दुर्दान्त वरमीदृशम्॥ ५९॥

रणेषु सन्निधातव्यमस्माकं नेत्रकुक्षिषु।

भवता घोरतेजोभिर्दहता प्रतिरोधिनः॥ ६०॥

त्वया यदा सनीहितं तपनास्माकमक्षिषु।

तदाक्षिविषयः सर्वो निश्चेष्टो भवतात्प्रभो॥ ६१॥

त्वत्सन्निधिसमृद्धेन नेत्राणास्माकमीक्षिताः।

स्तब्धशस्त्रा भविष्यन्ति प्रतिरोधकसैनिकाः॥ ६२॥

ततः स्तब्धेषु शस्त्रेषु वीक्षणादेव नः प्रभो।

निश्चेष्टा रिपवोऽस्माभिर्हन्तव्याः सुकरत्वतः॥ ६३॥

इति पूर्वं वरः प्राप्तः कैकसेयैर्दिवाकरात्।

वरप्रदानं यत्तत्र युद्धे सस्मेरुरुद्धताः॥ ६४॥

अतः सूर्यसमाविष्टनेत्रैस्तैर्विनिरीक्षिताः।

शक्तयः स्तब्धशस्त्रौघा विफलोत्साहतां गताः॥ ६५॥

कीकसातनयैस्तैस्तु सप्तभिः सत्वशालिभिः।

विष्टंभितास्त्रशस्त्राणां शक्तीनां नोद्यमोऽभवत्॥ ६६॥

उद्यमे क्रियमाणेऽपि शस्त्रस्तम्भेन भूयसा।

अभिभूताः सनिश्वासं शक्तयो जोषमासत॥ ६७॥

अथ तेऽवसरं प्राप्य नानाप्रहरणोद्यताः।

व्यमर्दयन् शक्तिसैन्यं दैत्याः स्वस्वामिदर्शिताः॥ ६८॥

शक्तयस्तास्तत्र सैन्ये निर्व्यापारनिजायुधाः ।

अक्षोभ्यन्त शरैस्तेषां वज्रकण्टकभेधिभिः ॥ ६९ ॥

शक्तयो दैत्यशस्त्रालि विद्धगात्रस्रुतासृजः ।

सपल्लवा रणे रेजुः कङ्केलिलतिका इव ॥ ७० ॥

हाहाकारं वितन्वानाः प्रपन्ना ललितेश्वरीम् ।

चुक्रुशुः शक्तयस्सर्वास्तैः स्तम्भितनिजायुधाः ॥ ७१ ॥

अथ देव्याज्ञया दण्डनाथा प्रत्यङ्गरक्षिणी ।

तिरस्करिणिकादेवी समुत्तस्थौ रणाजिरे ॥ ७२ ॥

तमोलिप्ताह्वयं नाम विमानं सर्वतोमुखम् ।

महामाया समारुह्य शक्तिनामभयं व्यधात् ॥ ७३ ॥

तमालश्यामलाकारा श्यामकंचुकधारिणी ।

श्यामच्छाये तमोलिप्ते श्यामयुग्यतुरङ्गमे ॥ ७४ ॥

वसन्ती मोहनाभिख्यं धनुरादाय सस्वनम् ।

सिंहनादं विनद्येषूनवर्षत्सर्पसन्निभान् ॥ ७५ ॥

कृष्णरूपभुजङ्गाभानयोमुसलसन्निभान् ।

मोहनास्त्रविनिष्ठ्यूतान् दैत्या बाणान्न सेहिरे ॥ ७६ ॥

इतस्ततो मृद्यमाना महामायाशिलीमुखैः ।

प्रकोपं परमं प्राप्ता बलाहकमुखाः खलाः ॥ ७७ ॥

अथो तिरस्करिण्यम्बा दण्डनाथा निदेशतः ।

अन्धाभिधं महाशस्त्रं मुमोच द्विषतां रणे ॥ ७८ ॥

बलाहकाद्यास्ते सप्त दिननथवरोद्धताः ।

अन्धास्त्रेण निजं नेत्रं दधिरे छादितं यथा ॥ ७९ ॥

तिरस्करिणिकादेव्या महामोहनधन्वनः ।

उद्धतेनान्धबाणेन चक्षुस्तेषां प्यधीयत ॥ ८० ॥

अन्धीकृताश्च ते सप्त न तु प्रैक्षन्त किञ्चन ।

तद्वीक्षणस्य विरहाच्छस्त्रस्तम्भः क्षयं गतः ॥ ८१ ।

पुनः ससिंहनादं ताः प्रोत्पत्यायुधपाणयः ।

चक्रुः समरसन्नाहं दैत्यानां प्रजिघांसया ॥ ८२ ॥

तिरस्करिणिकादेवीमग्रे कृत्वा महाबलाम् ।

सदुपायप्रसङ्गेन भृशं रुष्टा रणं व्यधुः ॥ ८३ ॥

साधु साधु महाभागे तिरस्करिणिकाम्बिके ।

स्थाने कृतस्तिरस्कारो दृशामेषां दुरात्मनाम् ॥ ८४ ॥

त्वं हि दुर्जननेत्राणां तिरस्कारमहौषधिः ।

त्वया बद्धदृशाऽनेन दैत्यचक्रेण भूयते ॥ ८५ ॥

देवकार्यमिदं देवि त्वया सम्यगनुष्ठितम् ।

अस्मादृशामजय्येषु यदेषु व्यसनं कृतम् ॥ ८६ ॥

तत्त्वयैव दुराचारानेतान् सप्त महासुरान् ।

निहतांललिता श्रुत्वा सन्तोषं परमाप्स्यति ॥ ८७ ॥

एवं त्वया विरचिते दण्डिनी प्रीतिमाप्स्यति ।
मन्त्रिण्यपि महाभागा यास्यत्येव परां मुदं ॥ ८८ ॥
तस्मात्त्वमेतान् सप्तैव निगृहाण रणाजिरे ।
एषां सैन्यं तु सकलं नाशयाम उदायुधाः ॥ ८९ ॥
इत्युक्त्वा प्रेरिता ताभिः शक्तिभिर्युद्धकौतुकात् ।
तमोलिप्तेन यानेन बलाहकबलं ययौ ॥ ९० ॥
अस्त्रेण च रुषा चान्धं बलाहक महासुरम् ।
आकृष्य केशेष्वसिना चकर्तान्तर्धिदेवता ॥ ९१ ॥
तस्य वाहनगृध्रस्य लुनाना पत्रिणा शिरः ।
सूचीमुखस्याभिमुखं तिरस्करिणिकाव्रजत् ॥ ९२ ॥
तस्य पट्टसपातेन विलूय कठिनं शिरः ।
अन्येषामपि पञ्चानां पञ्चत्वमकरोच्छरैः ॥ ९३ ॥
तैः सप्तदैत्यमुण्डैश्च ग्रथितान्योन्यकेशकैः ।
हारदाम गले कृत्वा ननर्तान्तर्धिदेवता ॥ ९४ ॥
समस्तमपि तत्सैन्यं शक्तयः क्रोधमूर्छिताः ।
हत्वा तद्रक्तसलिलैर्बह्वीः प्रावाहयन्नदीः ॥ ९५ ॥
तत्राश्चर्यमभूद्भूरि महामायाम्बिका कृतम् ।
बलाहकादिसेनानीदृष्टिरोधनवैभवात् ॥ ९६ ॥
हतशिष्टाः कतिपये बहुमित्रासससङ्कुलाः ।

शरणं जग्मुरत्यार्ताः क्रन्दन्तः शून्यकेश्वरम् ॥ ९७ ॥

दण्डिनी च महामायां प्रशंसन्ती पुनः पुनः ।

प्रसादमन्थरं चक्षुस्तस्यामाधाय पप्रिये ॥ ९८ ॥

साधु साध्विति तत्रस्थाः शक्तयः कम्पमौलयः ।

तिरस्करिणिकादेवीमश्लाघन्त पदे पदे ॥ ९९ ॥

The seven commanders, resembling the seven oceans, caused torment to the entire Shakti Sena. These seven demons had earlier pleased the sun god by severe penance. Lord Surya had blessed them saying, "O sons of Kekasaa! I am greatly pleased with your penance. I shall grant your desire". They had replied, "O sun! At the time of war, you should reside in our eyes and with your brightness, burn our enemies. All those who come in the purview of our sight should fall unconscious. We should be capable of immobilizing all the weapons of our enemies by mere sight". They had thus obtained a boon from Sri Surya. They now remembered the boon and as a result, the power of the sun god entered their eyes. As soon as they cast their eyes on the Shakti Sena, all their weapons were immobilized and the Shakti Sena lost its enthusiasm completely. They made no efforts to fight with the demons. The seven commanders took advantage of this situation and began to destroy the Shakti Sena with various weapons. Unable to retaliate, the Shaktis were greatly tormented by the demons. With bruised, bleeding bodies, the Shaktis resembled red creepers. When they were unable to bear the torture any longer, they sought refuge in Sri Lalita Parameshwari. As per Sridevi's orders, Sri Tiraskarini Devi, the bodyguard of Sri Varahi, arrived at the battlefield. Riding on a plane called 'Tamoilipta', she assured the Shaktis of protection. Her plane had the capability to travel anywhere in the universe. Of a dark complexion, Sri Tiraskarini Devi was wearing a black blouse. Seated in the plane driven by black horses, she was holding a bow named 'Mohana'. She began to shoot poisonous arrows on the demons. Then, according to the orders of Sri Dandanatha, she shot an arrow called 'Andhaka' at the demons. As a result, the seven commanders were forced to close their eyes. Further, they lost their sight due to the great weapon 'Andhaka'. Shakti Sena regained its vigor and began to attack the demons with increased valor. They addressed Sri Tiraskarini Devi happily thus: "O great goddess! You have done a wonderful job by destroying the sight of the seven demons. Mother, kill them now and this will make Sri Lalita Parameshwari extremely happy. Sri Varahi and Sri Shyamala also shall become pleased with you. In the meantime, we shall destroy the army of demons". Thus inspired by the Shaktis, she approached Balahaka and chopped off his head with her sword. After chopping off the wings of his vulture, she chopped off the head of Suchimukha with Pattasa. She also killed the other five commanders with sharp arrows. She made a garland of their heads and wore it around her neck. She began to dance in ecstasy in the battlefield. The Shakti Sena destroyed the

demons in no time. The remaining demons fled back to their city, screaming loudly. Pleased with Sri Tiraskarini, Sri Dandanatha Devi showered praises on her. All the Shaktis of the Shakti Sena repeatedly praised Sri Tiraskarini Devi and shook their heads with approval.

॥ श्री ब्रह्माण्डपुराणे उत्तरखण्डे हयग्रीवागस्त्यसम्वादे श्री ललितोपाख्याने

एकोनविंशः ॥

॥ बालार्कमण्डलाभासां चतुर्बाहुं त्रिलोचनाम् ।

पाशाङ्कुशधनुर्बाणान् धारयन्तीं शिवां भजे ॥ ॐ ऐं ह्रीं श्रीं साङ्गायै सायुधायै

सवाहनायै सपरिवारायै सर्वदेवतास्वरूपिण्यै श्रीललितामहात्रिपुरसुन्दर्यै परब्रह्मणे

नमः ॥



*Advaita Brahmavidya Pratishthana, Bangalore - Copy Right 2002*